ब्राह्मे बले क्षात्रबले च सारं निरीक्षितणां निकषोपलोऽभूत् ॥
गाधेः सुतः क्रूरतपोमहिम्ना प्रसेदुषि ब्रह्मणि भाषमाणे ।
अपि द्विजोऽसीत्यवृणीत यस्य तथाप्यनुज्ञां द्विजभावपूर्त्यै ॥
यस्यान्वये योगिवरस्य शक्तिपराशरव्यासशुकप्रधानाः ।
सञ्जज्ञिरे सर्वजगत्प्रसिद्धा महर्षयोऽब्धौ मणयो यथाच्छाः ॥
तस्यान्ववाये द्विजराज एकः क्षीरोदधौ चन्द्र इवा(धि)कश्रीः ।
सौम्यः सतां वर्त्मनि संप्रवृत्तो बालाजिनामाजनि पण्डितेन्द्रः ॥
अजायतास्मादरणेरिवाग्निर्दादाजिनामा तनयोऽप्यतेजाः ।
विरोधिनोऽभ्येत्य विलोलहेतिं चापल्यतो यं शलभीबभूवुः ॥
उमाम्बिका नाम हुताशनस्य स्वाहेव तस्याजनि धर्मपत्नी ।
अजीजनद्धर्ममिवात्तदेहं गोपालनामानमसौ कुमारम् ॥
उमाकुमारोऽयमुदग्रशक्तिर्बाल्यात् प्रतिक्ष्माभृदुरोविभेत्ता ।
दादाजिनेतुस्तनयो महात्मा बालेन्दुमौलेरिव बाहुलेयः ॥
गोपालभूपालवरस्य तस्य गुणौघमाणिक्यखनिः कनीयान् ।
रामस्य सौमित्रिरिवातिमात्रप्रेमाश्रयो विठ्ठलपण्डितोऽभूत् ॥
धर्मप्रतिष्ठापनतत्परस्य तथाविधोऽक्रूरहितस्य तस्य ।
सखानघः शङ्करपण्डितोऽभूद् गाण्डीवधन्वेव गदाग्रजस्य ॥

देवो द्विबाहुर्द्विजराजवंशे गोपाल एवाजनि गोप्तुमास्तान् ।
चापासिहस्तः स्वयमेष तस्मादास्ते विमुक्तारिररोगदश्च ॥
पुरा गृहीत्वा पृथुकान् कुचेलं गोपाल एकं कृतवान् धनाढ्यम् ।
अद्य प्रवादच्युतयेऽनुपाधिकुचेलसङ्घान् कुरुते कुबेरान् ॥
शापे च चापे च स रैणुकेयः शान्तौ च कान्तौ च स शारदेन्दुः ।
योगे च भोगे च स हैहयेन्द्रो ज्ञाने च दाने च स चेद्दधीचिः ॥
प्रत्यग्रकर्णः प्रतिपादनेऽसौ सत्ये हरिश्चन्द्रनृपो नवीनः ।
वीरान्विते नूतनविक्रमार्कों बोधे कलानां नवभोजराजः ॥
विरोधिसेनातृणवीतिहोत्रः कवीश्वरस्तोमकलापिमेघः ।
समाश्रितव्रातचकोरचन्द्रः स राजते सज्जनपद्मभानुः ॥
स सश्वरिष्णुर्भुवि चापवेदो दशाधिगम्यो द्विजभाग्ययोगः ।
दधार स स्वीकृतदेहबन्धः सचेतनः साम्बशिवप्रसादः ॥
राज्ञः शिवच्छत्रपतेः प्रसादात् प्राज्ञस्तदीयामवलम्ब्य मुद्राम् ।
चिदम्बरप्रान्तभुवं चिराय गोपायति ब्रह्मकुलानुकूलः ॥

बिभ्रद्धरित्रीभरमेष शेषं भुजेन बुद्ध्याप्यधरीकरोति ।
सरोजलक्ष्मीं च सतामलक्ष्मीं निजेक्षणेनैव निराकरोति ॥

नीलालकश्चन्द्रमुखोऽब्जनेत्रो बिम्बाधरः कम्बुगलोऽहिबाहुः ।
कवाटवक्षा स गभीरनाभिर्महोरुजङ्घो मदनो नु मूर्तः ॥

कान्त्या त्वदास्येन जितः कृशीयानिन्दुर्भजत्यन्वहमित्युडू द्वे ।
कर्णान्तिके कीर्तयतो धृतान्तश्छिद्रे नु मुक्ताच्छलतो मुदेऽस्य ॥

* * * *

तस्यानुकूलाऽजनि धर्मपत्नी सखाम्बिकानाम सतीमणिर्या ।
खनीव रत्नं कुलदीपमेनं खण्डोजिनामानमसूत सूनुम् ॥

स्वप्ने तमेनं शिवकामसुन्दर्यासाद्य दिव्याभरणोज्ज्वलाङ्गी ।
चिदम्बरेशार्पितचित्तवृत्तिं कदाचिदूचे करुणानुरूपम् ॥

वत्स प्रसन्नस्त्वयि विश्वनाथः सुखी चिरं जीव शृणूदितं मे ।
सरस्वती श्रीरिव भूरिव त्वां स्वयं शिवानुग्रहतो वृणीते ॥

सारस्वतं सारमिह प्रयुङ्क्ते क्षुद्रेषु देवेष्विरिणेष्विवैकः ।
स्वातीघनः शुक्तिपुटेष्विवान्यो धन्यो महत्स्वेव तु दैवतेषु ॥
नव्यं तदेकं नटनायकस्य प्रणीय काव्यं पुरुषार्थहेतुम् ।
रामस्य वाल्मीकिरिव त्रिलोक्यामाचन्द्रतारं यश आप्नुहीति ॥
तत्रान्तरे तालमृदङ्गतूर्यवीणारवैर्मागधरागभेदैः ।
प्रबोधितोऽसौ परदेवतायै कृताञ्जलिः काल्यविधिं व्यतानीत् ॥
शिवार्चनानन्तरमेव सभ्यान् स्वप्नानुवादेन सभाजयित्वा ।
तेषामनुज्ञामधिगम्य धीमान् काव्यं क्रमादारभतैष कर्तुम् ॥
विशुद्धवाधूलकुलाब्धिचन्द्रो विद्वन्मणिर्वेङ्कटकृष्णयज्वा ।
गोपालनेतुः कवने विनेता प्राचेतसस्येव पितामहोऽभूत् ॥

*　　*　　*　　*

श्रीमद्वैदिकमार्गखेलनकलाशुद्धान्तरङ्गः सुधी-
रद्वैतामृतलाभनिर्भरनिजानन्दानुभूतिः सताम् ।
गोप्ता मेटकरीकुलैकतिलको गोपालभूपालके
काव्येऽस्मिन् क्रमशो नटेशविजये सर्गं मुदाद्यं व्यधात् ॥

Colophon:

इति श्रीवाधूलवंशभूषणस्य विबुधकुलोत्तंसस्य महोपाध्यायवेङ्कटाद्रिविपश्चित्तनूभुवो वेङ्कटकृष्णाध्वरिवर्यस्य कृतौ नटेशविजयाख्ये काव्ये प्रथमः सर्गः ॥

End:

भव हर शिव शम्भो पा(पनाश) त्रिनेत्र प्रमथनुत नटेश प्रार्थितं नः प्रदेहि।
पटुतरमिह शब्दं प्राणिना रत्न स . . . प्रवरमिषतोन प्राणिरप्राणिनोऽपि(?) ॥

Colophon:

इति श्रीवाधूलकुलतिलकस्य वेङ्कटकृष्णदीक्षितस्य कृतौ नटेशविजयाख्ये महाकाव्ये सप्तमः सर्गः ॥

No. 11540. नलाभ्युदयः.
NALĀBHYUDAYAḤ.

Substance, paper. Size, $8\frac{3}{8} \times 6\frac{5}{8}$ inches. Pages, 128. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

Breaks off in the ninth Sarga.

A poem on the story of the marriage of Nala and Damayantī: by Vāmana Bhaṭṭabāṇa.

Beginning :

श्रीमान् नलो नाम गुणैः प्रतीतो निधिः कलानां निषधेषु राजा ।
अष्टादशद्वीपवर्तीमशेषामधत्त गामङ्गदनिर्विशेषम् ॥
शृङ्गाणि मेरोरवगाहमाना सहस्रधा भूवलये निषण्णा ।
यत्कीर्तिरापूरितभोगिलोका गङ्गेव लोकानखिलान् पुनीते ॥
तपत्यपि स्वैरमरातिवर्गैः प्रतापवह्नौ सुतरामसह्ये ।
पयस्समुद्रानुकृतिं दधानैर्यशोभिराप्यायत यस्य भूमिः ॥

* * * *

इति बहुविधचिन्तादूरकृष्टान्तरात्मा नृपतिरतिगभीरां चित्तवृत्तिं निगृह्य ।
अरमत सवयस्यैः कौतुकेनाभिपश्यन् मधुसमयसमुत्थां काननोपान्तलक्ष्मीम् ॥

Colophon :

इति वामनभट्टबाणकृतौ नलाभ्युदये प्रथमः सर्गः ॥

End :

यद्यस्ति तेनाभिहितं वचस्तन्मह्यं भवद्भिः प्रतिवेदनीयम् ।
वैराग्यभाजो विषयार्थिनोऽपि चिकीर्षितं तस्य च वेदनीयम् ॥
इति निगदितवत्यास्तत्र भैम्या निदेशान्नलविचयनकृत्ये नित्यबद्धाभिलाषाः ।
गिरिवनपुरदेशग्रामसौभाग्यलक्ष्मीसहृदयमनसस्ते बभ्रमुः क्ष्मामशेषाम् ॥

Colophon :

इति नलाभ्युदये अष्टमः सर्गः ॥

गते बहुतिथे काले पर्णादो नाम बाडबिः ।
प्रत्येत्य कुण्डिनं भैमीं रहस्येतदभाषत ॥

* * *

दमयन्त्युदितां वाचं जगदुस्तत्र तत्र ते ।
न किञ्चिदपि सर्वस्यां पृथिव्यामुत्तरं ददौ ॥

No. **11541.** नेमिनिर्वाणकाव्यम्.
NĒMINIRVĀṆAKĀVYAM.

Substance, paper. Size, $8\frac{4}{8} \times 6\frac{4}{8}$ inches. Pages, 254. Lines, 14 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Padmāvatīstōtram 128*a*, Dattātrēyacampū 130*a*, Draupadīpariṇayam 134*a*.

Complete.

A poem in 15 Sargas describing the chief incidents in the life of Nēminātha, the 22nd of the 24 Tīrthaṅkaras, all of whom are saluted in the introduction of this work. The hero was born as the son of Samudravijaya, King of Dvāravatī. The author of the work is Vāgbhaṭa, son of Dāhaṭa of Prāgvādi family, and is said to have been born at Aricchannapurī.

Beginning :

श्रीनाभिसूनोः पदपद्मयुग्मनखाः सुखानि प्रथयन्तु ते वः ।
समं नमन्नाक(कि)शिरःकिरीटसङ्घट्टविस्रस्तमणीयितं यैः ॥
निश्शेषविद्येश्वरमाश्रयामि तं बुद्धिहेतोरजितं जिनेन्द्रम् ।
अवादि सर्वानुपघातवृत्त्या येनागमः सङ्गमितः स्थितार्थः ॥
आदित्यचक्रेण कृतैककालप्रदक्षिणप्रक्रमणेन भक्त्या ।
लुप्तेव नालोक्यत यस्य कायच्छाया स वः पातु जिनस्तृतीयः ॥
श्रेयांसि दिश्यादभिनन्दनो वः स सर्वदा यस्य दृढव्रतस्य ।
व्यर्थीभवन्ती हृदि पुष्पबाणबाणावलिर्मुक्तिरव(वर)स्रगासीत् ॥
अपारसंसारसमुद्रनावं देयाद्दयालुः सुमतिर्मतिं नः ।
नित्यप्रियायोगकृते यदन्ते तपस्यतीवाविरतं रथाङ्गः ॥
पद्मासनस्थः स्फुटपद्मनेत्रः पद्मारुणश्रीर्धृतपद्मलक्ष्मा ।
पद्मप्रभो नः प्रभवेऽस्तु नित्यं पद्माप्रदानोद्यतपाणिपद्मः ॥
स्वस्तिक्रियास्वस्तिकलाञ्छनो नः स्तम्भायमानोरुभुजः सुपार्श्वः ।
विडम्बयामास विलासवेश्म श्रियं सदा यः करुणातरुण्याः ॥
चन्द्रप्रभाय प्रभवे त्रिसन्ध्यं तस्मै नमो विस्मयनीयभासे ।
यत्पादपद्मौ सविधस्थितेऽपि चन्द्रे विनिद्राद्भुतकान्तियुक्तौ ॥
भूरिप्रभानिर्जितपुष्पदन्तः करायतिन्यक्कृतपुष्पदन्तः ।
त्रिकालसेवागतपुष्पदन्तः श्रेयांसि नो यच्छतु पुष्पदन्तः ॥
मूर्ध्ना मुहुश्चुम्बितभूतलेन तं शीतलं देवमहं नमामि ।
यस्मिन्मनोवर्तिनि सर्वतोऽसौ निवर्तते दुर्गतिदुःखतापः ॥
सुवर्णवर्णद्युतिरस्तु भूत्यै श्रेयान् विभुर्वो विनताप्रसूतः ।
उच्चैस्तरां यः सुगतिं ददानो विष्णोः सदानन्दयति स्म चेतः ॥
श्रीवासुपूज्यः स जपारुणो वः श्रेयः क्रियाद्द्वादशतीर्थनाथः ।
सद्वृत्तमुक्तावलिमध्यवर्ती यः पद्मरागश्रियमादधाति ॥

वन्दामहे पादसरोजयुग्ममन्तः कृपालोर्विमलस्य तस्य ।
यश्वापषष्ट्या कलिताङ्गयष्टिस्तथापि पार्श्वस्थितकोलराजः ॥
ज्योतिर्गणैः सन्ततसेव्यमानमनन्तमाकाशमिव स्तवीमि ।
सूर्यायते यत्र विभावितानं निशाकरत्याननमण्डलं च ॥
तं धर्मनामानमहं महेशं भक्त्या भवच्छेदकरं स्मरामि ।
यः सुव्रताभानुसुतत्वमुच्चैः व्रतप्रभाभ्यां वदतीव देवः ॥
शान्तिं स वः शान्तिजिनः करोतु विभ्राजमानो मृगलाञ्छनेन ।
शशीव विश्वप्रमर्दैकहेतुः यः पापचक्रव्यथको बभूव ॥
देव्याः श्रियो यस्तनयः प्रसिद्धः श्रीकुन्थुरत्यद्भुतरूपमूर्तिः ।
विगाहमानोऽपि मनांसि नासीत् कस्यापि तापाय स वः पुनातु ॥
अराय तस्मै विजितस्मराय नित्यं नमः कर्मविमुक्तिहेतोः ।
यः श्रीसुमित्रातनयोऽपि भूत्वा रामानुरक्तो न बभूव चित्रम् ॥
तपःकुठारक्षतकल्पवल्ली मल्लिर्जिनो वः श्रियमातनोतु ।
कुरोः सुतस्यापि न यस्य जातं दुःशासनत्वं भुवनेश्वरस्य ॥
व्रते मतिं श्रीमुनिसुव्रताख्यः त्रिकालविद्वो विदधातु तुष्टः ।
अन्तर्निरुध्यान्नपयःप्रचारं येनात्मदुर्गादरिचक्रमस्तम् ॥
नमामि भक्त्या नमिनामधेयं सर्वज्ञमज्ञानतमोनिवृत्त्यै ।
खिन्नो भवाध्वभ्रमणेन नूनं यो योगनिद्रामभजज्जिनेन्द्रः ॥
श्रीनेमिनाथस्य जयन्ति कान्तास्ताः कान्तयो यामुनवीचिकल्पाः ।
धर्मोपदेशे दशनप्रभाभिः फेनायितं यत्र विसारिणीभिः ॥
श्रीपार्श्वनाथः स जयत्यजस्रं यस्मिन्ननेकान्तविधायिहेतौ ।
स्वनिग्रहव्यग्रतया स्थितानामेकान्तमन्तर्न सुखं परेषाम् ॥
श्रीवीरनाथाय नमः प्रकाममनन्तवीर्यातिशयाय तस्मै ।
अन्तस्स्थमेकाङ्गपरिग्रहो यः कामादिचक्रं युगपाज्जगाय ॥

* * * *

तत्र प्रसिद्धास्ति विचित्रहर्म्या रम्या पुरी द्वारवतीति नाम्ना ।
पर्यन्तविस्तारिविशालसालच्छायाच्छविर्यत्परिखा पयोधिः ॥

* * * *

भविष्यतस्तीर्थकरस्य नेमेर्निमित्तमत्यन्तमनोहरश्रीः ।
कृतिः सुराणां ससुरेश्वराणां या प्राप सौरीति ततः प्रसिद्धिम् ॥

सद्रत्नरत्नाकरचारुकाञ्चीं महीमिवान्यां यदुवंशवन्द्यः ।
अपालयत्तां विजयाभिधानं नृपः समुद्रोपपदं दधानः ॥

* * * *

अथात्मजं श्रीवसुदेवनाम्नः स्वभ्रातुरत्यद्भुतभक्तिभाजः ।
निवेशयामास स यौवराज्ये गोविन्दमानन्दितदेववृन्दम् ॥
समुच्चलत्कज्जलकोमलश्रीस्तत्कालजन्मा यमुनाप्रवाहम् ।
चिच्छेद यो दीप इव प्रभावान् तमस्समूहं सुदशोपगूढः ॥
कथं यथावन्ननु चक्रपाणेर्निरुच्यते तस्य चरित्रमत्र ।
वधोद्यतायाः किल पूतनाया यः पीतरक्तोऽपि बभूव कालः ॥

* * * *

तेनाथ निर्मथितदानव(नाथ)धाम्ना श्रीमान् लघूकृतमहीतलभूरभारः ।
राजा समुद्रविजयः सुतलाभहेतोः किं तन्न यद्भुतमसौ चिरमाचचार ॥
द्विरद[मद]मदजलार्द्रद्वारमाचारनम्रक्षितिपलुलितहारस्वस्तिकैः स्वस्तियुक्तम्।
तरलतनयशून्यं प्राङ्गणं वीक्षमाणो भवनमवनिनाथः काननं सोऽथ मेने ॥

Colophon:

इति श्रीनेमिनिर्वाणे वाग्भटविरचिते महाकाव्ये पुत्रचिन्ताभिधो नाम प्रथमः सर्गः ॥

End:

इत्थं विहरतस्तस्य धर्मचक्रं पुरस्सरम् ।
रराज रुचिरच्छायं भामण्डलमिवापरम् ॥
सर्वासु(दिक्षु) विरचय्य स धर्ममेवमेकातपत्रमवसादितमोहशत्रुम् ।
विच्छिन्नकर्मनिगडः सह मुक्तिवध्वा भेजे सुखानि भगवानविनश्वराणि ॥

Colophon:

इति श्रीवाग्भटविरचिते नेमिनिर्वाणे महाकाव्ये (निर्वाणागमनं) नाम पञ्चदशः सर्गः ॥

अरिच्छन्नपुरोत्पन्नः प्राग्वादिकुलशालिनः ।
दाहडश्च(स्य)सुतश्चक्रे प्रबन्धं वाग्भटः कविः ॥
नेमेरभूत् प्रबन्धोऽयं वाग्भटेन सुबोधिना ।
नेमेर्धर्मरथस्यास्य . . . . ॥

No. 11542. नेमिनिर्वाणकाव्यम्.
NĒMINIRVĀṆAKĀVYAM.

Substance, palm-leaf (Śrītāla). Size, 15 × 1¾ inches. Pages, 64. Lines, 9 on a page. Character, Kanarese. Condition, good. Appearance, old. Complete.

Same work as the above.

No. 11543. नैषधम्.
NAIṢADHAM.

Substance, paper. Size, 13¾ × 5¾ inches. Pages, 342. Lines, 10 on a aracter, Dēvanāgarī. Condition, good. Appearance, new. argas 1 to 22.

Mahākāvya composed by Śrīharṣa, son of Śrīhīra and and it describes the marriage of Nala and Damayantī.

Beginning:

निपीय यस्य क्षितिरक्षिणः कथास्तथाद्रियन्ते न बुधाः सुधामपि ।
नलः सितच्छत्रितकीर्तिमण्डलः स राशिरासीन्महसां महोज्ज्वलः ॥ १ ॥
रसैः कथा यस्य सुधावधीरिणी नलः स भूजानिरभूद्गुणाद्भुतः ।
सुवर्णदण्डैकसितातपत्रितज्वलत्प्रतापावलिकीर्तिमण्डलः ॥ २ ॥
पवित्रमत्रातनुते जगद्युगे स्मृता रसक्षालनयेव यत्कथा ।
कथं न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति ॥ ३ ॥

* * * *

श्रीहर्षं कविराजराजिमकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तच्चिन्तामणिमन्त्रचिन्तनफले शृङ्गारभङ्ग्या महा-
काव्ये चारुणि नैषधीयचरिते सर्गोऽयमादिर्गतः ॥

श्रीहर्षं (. . . . .) मामल्लदेवी च यम् ।
द्वैतीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥

श्रीहर्षं (. . . . .) मामल्लदेवी च यम् ।
तार्तीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥

श्रीहर्षं (. . . . .) मामल्लदेवी च यम् ।
तुर्यः स्थैर्यविचारणप्रकरणभ्रातर्ययं तन्महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥
श्रीहर्षं (. . . . .) देवी च यम् ।
तस्य श्रीविजयप्रशस्तिरचनाताततस्य नव्ये महा-
काव्ये चारुणि नैषधीयचरिते सर्गोऽभवत्पञ्चमः ॥
श्रीहर्षं (. . . . .) देवी च यम् ।
षष्ठः खण्डनखण्डतोऽपि सहजात्क्षोदक्षमे तन्महा-
काव्येऽयं व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥
श्रीहर्षं (. . . . .) देवी च यम् ।
गौडोर्वीशकुलप्रशस्तिभणितिभ्रातर्ययं तन्महा-
काव्ये (. . . . .) सर्गोऽगमत्सप्तमः ॥
श्रीहर्षं (. . . . .) देवी च यम् ।
तस्यागादयमष्टमः कविकुलादृष्टाध्वपान्थे महा-
काव्ये चारुणि वैरसेनिचरिते सर्गो निसर्गोज्ज्वलः ॥
श्रीहर्षं (. . . . .) देवी च यम् ।
सन्दृब्धार्णववर्णनस्य नवमस्तस्य व्यरंसीन्महा-
काव्ये (. . . . .) निसर्गोज्ज्वलः ॥
श्रीहर्षं (. . . . .) च यम् ।
तर्केष्वप्यसमश्रमस्य दशमस्तस्य प्रबन्धे महा-
काव्ये (. . . . .) निसर्गोज्ज्वलः ॥
श्रीहर्षं (. . . . .) देवी च यम् ।
शृङ्गारामृतशीतगावयमगादेकादशस्तन्महा-
काव्ये (. . . . .) निसर्गोज्ज्वलः ॥
श्रीहर्षं (. . . . .) देवी च यम् ।
तस्य द्वादश एष मातृचरणाम्भोजालिमौलेर्महा-
काव्येऽत्र न्यगलन्नलीयचरिते सर्गो निसर्गोज्ज्वलः ॥
श्रीहर्षं (. . . . .) देवी च यम् ।

स्वादूत्पादभृति त्रयोदशतयादेश्यस्तदीये महा-
काव्येऽयं व्यरमन्नलीयचरिते सर्गो (. . . .) लः ॥
श्रीहर्षं (. . . . .) देवी च यम् ।
यातस्तस्य चतुर्दशः शरदिजज्योत्स्नाच्छसूक्तेर्महा-
काव्ये चारुणि वैरसेनिचरिते सर्गो निसर्गोज्ज्वलः ॥
श्रीहर्षं (. . . . .) देवी च यम् ।
यातः पञ्चदशः कृशेतररसः स्वादाविहायं महा-
काव्ये (. . . . . : .) निसर्गोज्ज्वलः ॥
श्रीहर्षं (. . . . .) देवी च यम ।
काश्मीरैर्महिते चतुर्दशतयीं विद्यां विदद्भिर्महा-
काव्ये तद्भुवि नैषधीयचरिते सर्गोऽगमत् षोडशः ॥
श्रीहर्षं (. . . . .) च यम ।
यातः सप्तदशः स्वसुः सुद(स)दृशि च्छन्दःप्रशास्तेर्महा-
काव्येऽत्यद्भुतनैषधीय (. . . . .) लः ॥
श्रीहर्षं (. . . . .) देवी च यम् ।
यातोऽस्मिन् शिवभक्तिसिद्धिभगिनीसौभ्रात्रभव्ये महा-
काव्ये तस्य कृतौ नलीयचरिते सर्गोऽयमष्टादशः ॥
श्रीहर्षं (. . . . .) च यम ।
एकां न त्यजतो नवार्थघटनामेकोनविंशोऽगमत्
काव्ये तस्य कृतौ नलीयचरिते सर्गो निसर्गोज्ज्वलः ॥
श्रीहर्षं (. . . . .) देवी च यम ।
अन्यक्षुण्णरसप्रमेयभणितौ विंशस्तदीये महा-
काव्येऽयं व्यगमन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥
श्रीहर्षं (. . . . .) देवी च यम् ।
तस्यागादयमेकविंशगणनः काव्येऽतिनव्ये कृतौ
भैमीभर्तृचरित्रवर्णनमये सर्गो निसर्गोज्ज्वलः ॥

End:

स्वर्भानुप्रतिवारपारणमिलद्दन्तौघयन्त्रोद्भव-
श्वभ्रालीपतयालुदीधितिसुधासारस्तुषारद्युतिः ।

पुष्पेष्वासनतत्प्रियापरिणयानन्दाभिषेकोत्सवे
देवः प्राप्तसहस्रधारकलशश्रीरस्तु नस्तुष्टये ॥

Colophon :

श्रीहर्षं कविराजराजिमकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
द्वाविंशो नवसाहसाङ्कचरिते चम्पूकृतोऽयं महा-
काव्ये तस्य कृतौ नलीयचरिते सर्गो निसर्गोज्ज्वलः ॥

इति श्रीनैषधीयमहाकाव्ये द्वाविंशः सर्गः ॥

No. **11544.** नैषधम्.

NAIṢADHAM.

Substance, palm-leaf. Size, 12 × 1⅛ inches. Pages, 56. Lines, 6 on a page. Character, Kanarese. Condition, injured. Appearance, new.

Contains the first Sarga (wants two leaves in the beginning thereof), the second Sarga and 87 stanzas in the third Sarga.

Same work as the above.

No. **11545.** नैषधम्.

NAIṢADHAM.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 15. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the fifth Sarga complete.

Same work as the above.

The scribe gives the date of transcription :

अलिखदिह(विका)रिस्ससोमे दिने रसगणितविधिज्येष्ठमासे शिवाम् ।
नलजगदधिनाथं शिवं भारतीं गणपतिमपि नत्वा गुरून् राघवः ॥

No. **11546.** नैषधम्.

NAIṢADHAM.

Substance, palm-leaf. Size, 15¼ × 1 inches. Pages, 45. Lines, 5 on a page. Character, Telugu. Condition, tolerably good. Appearance, old.

Begins on foll. 1*a* and 102*b*. The other works herein are **Raghuvaṁśa 17*a*** and **Śiśupālavadha 57*a*.**

Contains the Sargas one and two complete, the third Sarga (one to five stanzas only) and the fifth Sarga (1 to 93 stanzas only).

Same work as the above.

No. 11547. नैषधम्.

NAIṢADHAM.

Substance, palm-leaf. Size, 15½ × 1¼ inches. Pages, 99. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Contains the Sargas one to five complete, and the sixth incomplete.

Same work as the above.

No. 11548. नैषधम्.

NAIṢADHAM.

Substance, palm-leaf (Śrītāla). Size, 7¼ × 1¼ inches. Pages, 154. Lines, 8 on a page. Character, Malayāḷam. Condition, good. Appearance, new.

Contains the Sargas one to five complete.

Same work as the above.

No. 11549. नैषधम्.

NAIṢADHAM.

Substance, palm-leaf. Size, 13½ × 1¼ inches. Pages, 114. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, new.

Contains the Sargas one to four complete.

Same work as the above.

No. 11550. नैषधम्.

NAIṢADHAM.

Substance, palm-leaf. Size, 16½ × 1⅜ inches. Pages, 12. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, new.

Begins on fol. 62*a*. The other work herein is Bhāratacampūtilaka 1*a*.

Contains the sixth Sarga incomplete.

Same work as the above.

No. 11551. नैषधम्.

NAIṢADHAM.

Substance, palm-leaf. Size, 17⅝ × 1¼ inches and 13⅝ × 1⅞ inches. Pages, 26 and 26. Lines, 8 and 9 on a page. Character, Grantha. Condition, injured and good. Appearance, old.

Begins on foll. 39*a* and 52*a*. The other works herein are Naiṣadhavyākhyā 1*a* and Rāmāyaṇavyākhyā 65*a*.

Contains two copies of the first Sarga, the first containing 130 stanzas and the other being complete.

Same work as the above.

No. **11552.** नैषधम्.

NAIṢADHAM.

Substance, palm-leaf. Size, $15\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 96. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, new.

Contains the Sargas one, two, and four, 134 stanzas in the fifth Sarga and 38 stanzas in the sixth Sarga.

Same work as the above

No. **11553.** नैषधम्.

NAIṢADHAM.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 13. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 23*a*. The other work herein is Naiṣadhavyākhyā 1*a*.

Contains the first two Sargas.

Same work as the above.

No. **11554.** नैषधम्.

NAIṢADHAM.

Pages, 17. Lines, 8 on a page.

Begins on fol. 30*a* of the MS. described under No. 1787.

Contains 131 stanzas in the first Sarga.

Same work as the above.

No. **11555.** नैषधम्.

NAIṢADHAM.

Substance, paper. Size, $11 \times 4\frac{5}{8}$ inches. Pages, 558. Lines, 7 on a page Character, Dēvanāgarī. Condition, good. Appearance, old.

Contains the Sargas 1 to 22 complete.

Same work as the above

No. **11556.** नैषधम्.

NAIṢADHAM.

Substance, paper. Size, $11 \times 4\frac{1}{4}$ inches. Pages, 312. Lines, 12 on a page. Character, Dēvanāgarī (badly written). Condition, injured. Appearance, old.

Contains the Sargas 1 to 22 complete; but wants seven stanzas at the end of the first Sarga and two stanzas in the beginning of the second Sarga.

Same work as the above.

No. 11557. नैषधम्.
NAIṢADHAM.

Substance, palm-leaf. Size, 17¼ × 1½ and 14⅝ × 1¼ inches. Pages, 44 and 76. Lines, 5 and 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Consists of two parts. The first part contains Sargas one to four, the fourth Sarga containing only 116 stanzas. The second part contains Sargas one to three complete and breaks off in the 84th stanza of the fourth Sarga.

No. 11558. नैषधम्.
NAIṢADHAM.

Substance, palm-leaf. Size, 17 × 1¼ inches. Pages, 106. Lines, 6 on a page. Character, Grantha Condition, injured. Appearance, old.

Begins on fol. *1a* The other work herein is Vikramōrvaśīya *54a*.

Contains the Sargas 11 to 16 complete and breaks off in the 46th stanza of the 17th Sarga.

No. 11559. नैषधम्.
NAIṢADHAM.

Pages, 48. Lines, 9 on a page.

Begins on fol. *1a* of the MS. described under No. 4147.

Contains the first Sarga, the second Sarga from the 40th stanza thereof, the third and the fourth Sargas and 88 stanzas of the fifth Sarga.

Same work as the above.

No. 11560. नैषधम्.
NAIṢADHAM.

Substance, palm-leaf. Size, 15¼ × ¾ inches. Pages, 52. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. *62a*. The other works herein are Raghuvaṁśa *1a*, Śiśupālavadhaḥ *25a*.

Contains Sargas one to three of which the first Sarga breaks off in the 38th stanza and the third Sarga in the 55th stanza.

No. 11561. नैषधम्.
NAIṢADHAM.

Substance, palm-leaf. Size, 12½ × 1⅝ inches. Pages, 82. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 24*a*. The other works herein are Śiśupālavadha 1*a*, Mēghasandēśa 21*a*.

Contains 1 to 60 stanzas of the first Sarga, the third Sarga and 1 to 121 stanzas of the fourth Sarga and 1 to 72 stanzas of the 12th Sarga.

Same work as the above.

No. 11562. नैषधम्.
NAIṢADHAM.

Substance, palm-leaf. Size, 16⅜ × 1¼ and 14¼ × 1¼ inches. Pages, 130. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains Sargas three to six complete.

Same work as the above.

The name of the scribe is given thus:

काश्चीपुरनिवासिनः वत्सान्ववायश्रितभानोः श्रीवेङ्कटाचार्यस्यैषा कृतिः ।

No. 11563. नैषधम्.
NAIṢADHAM.

Substance, palm-leaf. Size, 16¼ × 1⅜ and 18¼ × 1⅜ inches. Pages, 18. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 23*b*. The other work herein is Naiṣadhavyākhyā : Jīvātu 1*a*.

Contains the second Sarga only.

Same work as the above.

No. 11564. नैषधम्.
NAIṢADHAM.

Substance, palm-leaf. Size, 16¾ × 1½ inches. Pages, 16. Lines, 8 on a page. Character, Grantha. Condition, fair. Appearance, old.

Begins on fol. 23*a*. The other works herein are Naiṣadha with commentary 1*a*, Naiṣadhavyākhyā 17*a*.

Contains the tenth Sarga, the last four stanzas therein being wanting.

Same work as the above.

No. 11565. नैषधम्.
NAIṢADHAM.

Substance, palm-leaf. Size, 17½ × 1⅛ inches. Pages, 26. Lines, 10 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 61*a*. The other work herein is Naiṣadhavyākhyā 1*a*.

Contains the tenth Sarga, of which the first 20 stanzas are with commentary and the remaining portion without commentary, and the first 78 stanzas without commentary in the 11th Sarga.

Same work as the above.

No. 11566. नैषधम्.
NAIṢADHAM.

Substance, Śrītāla. Size, 18⅞ × 2⅛ inches. Pages, 4. Lines, 13 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Naiṣadhavyākhyā: Jīvātu 3*a*, Rāmāyaṇa 10*a*.

Contains the seventh Sarga only, but wants ten stanzas in the beginning.

Same work as the above.

No. 11567. नैषधम्.
NAIṢADHAM.

Substance, palm-leaf. Size, 14½ × 1⅛ and 15¾ × 1⅜ inches. Pages, 140 and 82. Lines, 5 and 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

The leaves of the first mentioned size contain the Sargas one to nine without the Sargas four to six; the remaining leaves contain the Sargas 2 and 4 to 15 of which the 2nd, 4th, 5th and the 14th are imperfect.

Same work as the above.

No. 11568. नैषधम्.
NAIṢADHAM.

Substance, palm-leaf. Size, 13½ and 14½ × 1¼ inches. Pages, 3. Lines, 5 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Begins on fol. 61*a*. The other works herein are Śiśupālavadha 1*a*, Anuvāyustuti 64*b*.

Wants the beginning and the end in the second Sarga.

No. 11569. नैषधम्—जीवातुव्याख्यासहितम्.
NAIṢADHAM WITH THE COMMENTARY JĪVĀTU.

Substance, palm-leaf. Size, 17⅛ × 1⅝ inches. Pages, 155. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the Sargas one to three complete, together with the well-known commentary of Mallinātha. The commentator refers to another prior commentary of which he speaks with contempt.

Beginning:

अतिधीरो महासत्त्वो दयालुरतिसुन्दरः ।
धार्मिको जानकीजानिः करोतु मम मङ्गलम् ॥
मातापितृभ्यां जगतो नमो वामार्धजानये ।
सद्योदक्षिणदृक्पातसङ्कुचद्वामदृष्टये ॥
षड्भिर्मुखैर्बाल्यवचोविनोदे शास्त्राणि षट् कीरवदुद्गिरन्तम् ।
अस्पष्टवर्णानि समीक्ष्य पुत्रं भजे हसद् द्वन्द्वमहं तदाद्यम् ॥
आलम्बे जगदालम्बं लम्बोदरपदाम्बुजम् ।
शुष्यन्ति यद्रजःस्पर्शात्प्रत्यूहव्यूहवार्धयः ॥
परेतभूतभेतालकरतालसमन्वितम् ।
प्रवर्तितमहानृत्तं कलये कालभैरवम् ॥
स्यात् स्रष्टा रक्षिता हर्ता योऽप्येको जगतां क्रमात् ।
तमीशं शरणं यामि शरणागतवत्सलम् ॥
वृन्दारका यत्र भवन्ति भृङ्गा मन्दाकिनी यन्मकरन्दबिन्दुः ।
तवारविन्दाक्ष पदारविन्दं वन्दे चतुर्वर्गचतुष्पथं तत् ॥
तद्दिव्यमव्ययं धाम सारस्वतमुपास्महे ।
यत्प्रकाशात् प्रलीयन्ते मोहान्धतमसच्छटाः ॥
वाणीं काणभुजीमजीगणदवासासीच्च वैयासिकी-
मन्तस्तन्त्रमरंस्त पन्नगगवीगुम्भेषु चाजागरीत् ।
वाचामाचकलद्रहस्यमखिलं यश्चाक्षपादस्फुरां
लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः ॥
श्रीमल्लिनाथविदुषा विदुषां मतेन तेनैष नैषधकथामृतकाव्यबन्धः ।
व्याख्यास्यते स्फुटसभावगुणार्थशब्दं सध्वन्यलङ्कृतिरहस्यविदां मुदे तत् ॥

क्षुद्रव्याख्याविषार्तानां श्रीहर्षकविदुश्रिताम् ।
उज्जीवनाय जीवातुर्जीयादेष मया कृतः ॥
इहान्वयमुखेनैव सर्वं व्याख्यायते मया ।
नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते ॥

अथ तत्रभवान् श्रीहर्षकविः "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे" इत्यालङ्कारिकवचनप्रामाण्यात् काव्यस्यानेकश्रेयस्साधनतां 'काव्यालापांश्च वर्जयेत्' इति निषेधस्यासत्काव्यविषयतां च पश्यन् नैषधाख्यं महाकाव्यं चिकीर्षुः चिकीर्षिताविघ्नपरिसमाप्तेः सम्प्रदायाविच्छेदलक्षणफलसाधनत्वात् 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इत्याशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च नायकस्य राज्ञो नलस्य कुलपराक्रमभूतिलक्षणं परममङ्गलं वस्तु निर्दिशति—

निपीय यस्य (. . . . . . .) महोज्ज्वलः ॥

निपीयेति । यस्य क्षितिं रक्षतीति क्षितिरक्षिणः क्ष्मापालस्य नलाख्यस्य चक्रवर्तिनः । कथाः उपाख्यानानि । निपीय नितरामास्वाद्य । पिब(पीङ)स्समासे क्त्वो ल्यबादेशः । न ल्यपीति पिबतेरित्य(रीत्व)प्रतिषेधात् । बुधास्तत्त्वज्ञाः सुराश्च । "ज्ञातृचाद्रिसुरा बुधाः" इति क्षीरस्वामी । सुधामपि तथा यथैतत्कथेत्यर्थः । नाद्रियन्ते न रोचन्त इत्यर्थः । . . . . त्कथा इति भावः । सितच्छत्रं कृतं सितच्छत्रितम् । श्वेतातपत्रीकृतमित्यर्थः; तत्करोतीति ण्यन्तात्कर्मणि क्तः; तत्कीर्तिमण्डलं यस्य सः । महसां तेजसां राशिः; रविरिव तेजस्वीत्यर्थः । महैरुत्सवैरुज्ज्वलः प्रकाशमानः । नित्यमहोत्सवशाली इत्यर्थः । "मह उद्धव उत्सवः" इत्यमरः । एतेन समृद्धिमद्वस्तुवर्णनमुदात्तालङ्कारो व्यज्यते । नलो नलाख्यः । स राजा । आसीदस्ति स्म । अत्र सुधाया अनादरसम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः; महसां राशिरिति तेजस्तद्वतोरभेदोक्तेर्भेदेऽभेदरूपातिशयोक्तिः; कीर्तिमण्डले सितच्छत्रत्वनिरूपणाद्रूपकालङ्कारः; इति त्रयाणां संसृष्टिः । अस्मिन् सर्गे वंशस्थवृत्तम् । "जतौ तु वंशस्थमुदीरितं जरौ" इति लक्षणात् ॥

No. 11570. नैषधम्—जीवातुव्याख्यासहितम्.

NAIṢADHAM WITH THE COMMENTARY JĪVĀTU.

Substance, palm-leaf. Size, 17⅛ × 1¼ inches. Pages, 88. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Raghuvaṁśa 45*a*.

Contains 1 to 18 stanzas in the fifth Sarga with commentary and with colophon and also some small portion towards the end of the commentary of the 14th Sarga with colophon and the 15th Sarga.

Same work as the above.

Colophon :

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचलमल्लिनाथसूरिविरचितायां नैषधव्याख्यायां जीवातुसमाख्यायां पञ्चमः सर्गः ॥

लक्ष्मीनारायणलिखितमिदं पुस्तकम् ।

* * * *

श्रीहर्षमिति । शरदिजाता शरदिजा . . . . . . प्रावृट्छरत्काल-दिवां जे इति सप्तम्या अलुक् । सा च सा ज्योत्स्ना च तद्वदच्छा मृष्टाः सूक्तयो यस्य तस्य । गतमन्यत् ॥

Colophon :

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचलमल्लिनाथसूरिविरचिते नैषधव्याख्याने जीवातुसमाख्याने चतुर्दशः सर्गः ॥

पञ्चदशः पूरणे डट् । सर्गः धा(या)तो गतः । समाप्त इति यावत् ॥

Colophon :

इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचलमल्लिनाथसूरि.

No. 11571. नैषधम्—जीवातुव्याख्यासहितम्.

NAIṢADHAM WITH COMMENTARY JĪVĀTU.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 132. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Contains the Sargas one and three complete.

Same work as the above, but wants three stanzas in the beginning of the introduction to the commentary.

No. 11572. नैषधम्—जीवातुसहितम्.
NAIṢADHAM WITH JĪVĀTU.

Substance, paper. Size, 11¾ × 7½ inches. Pages, 372. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the Sargas one to seven complete.

Same work as the above, but without the introductory stanzas.

No. 11573. नैषधम्—जीवातुसहितम्.
NAIṢADHAM WITH JĪVĀTU.

Substance, palm-leaf. Size, 15¼ × 1⅜ inches. Pages, 412. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the Sargas 10 to 13 complete, but wants 25 stanzas in the end of the 12th Sarga.

Same work as the above.

No. 11574. नैषधम्—जीवातुसहितम्.
NAIṢADHAM WITH JĪVĀTU.

Pages, 12. Lines, 16 on a page. Character, Dēvanāgarī.

Begins on fol. 10*a* of the MS. described under No. 2408.

Breaks off in the 19th stanza of the second Sarga.

Same work as the above.

No. 11575. नैषधम्—जीवातुसहितम्.
NAIṢADHAM WITH JĪVĀTU.

Substance, paper. Size, 9⅝ × 7¾ inches. Pages, 12. Lines, 26 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Mēghasandēśa with commentary 7*a*.

Contains the second Sarga which breaks off in the 24th stanza.

Same work as the above.

No. 11576. नैषधम्—जीवातुसहितम्.
NAIṢADHAM WITH JĪVĀTU.

Substance, palm-leaf. Size, 14½ × 1¼ inches. Pages, 53. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the first 75 stanzas of the first Sarga.

Same work as the above.

No. 11577. नैषधम्—जीवातुसहितम्.
NAIṢADHAM WITH JĪVĀTU.

Pages, 70. Lines, 7 on a page.

Begins on fol. 36*a* of the MS. described under No. 155.

Contains the first 108 stanzas of the sixth Sarga.

Same work as the above.

No. 11578. नैषधम्—जीवातुसहितम्.
NAIṢADHAM WITH JĪVĀTU.

Substance, palm-leaf. Size, 15⅜ × 1¼ inches. Pages, 76. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains the 12th Sarga only, but the colophon is apparently wrongly written.

Same work as the above.

Colophon :

इति पद्वाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचलमल्लिनाथसूरिविरचिते नैषधव्याख्याने सञ्जीविनी(जीवातु)समाख्याने द्वादशः सर्गः ॥

No. 11579. नैषधव्याख्या—जीवातुः.
NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

Substance, (Śrītāla) palm-leaf. Size, 14 × 1⅝ inches. Pages, 102. Lines, 7 on a page. Character, Malayāḻam. Condition, injured. Appearance, old.

Contains the first Sarga with the introductory stanzas of the commentary which here begin with the stanza commencing वृन्दारका यत्र भवन्ति भृङ्गाः ।

Same commentary as the above.

No. 11580. नैषधव्याख्या—जीवातुः.
NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

Substance, palm-leaf. Size, 15¼ × 1⅓ inches. Pages, 48. Lines, 8 on a page. Character, Telugu. Condition, good though the corners of the leaves are worn out. Appearance, old.

Contains the ninth Sarga only.

Same work as the above.

No. 11581. नैषधव्याख्या—जीवातुः.
NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

Substance, palm-leaf. Size, 14 × 1¼ inches. Pages, 50. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Abhītistava 26*a*, Nyāsaviṁśati 28*a*, Sudarśanaṣaḍakṣarī 30*a*.

Contains the fourth Sarga which breaks off in the 118th stanza.

Same work as the above.

No. 11582. नैषधव्याख्या—जीवातुः.

NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

Substance, palm-leaf. Size, 16¼ × 1¼ inches. Pages, 52. Lines, 7 on a page. Character, Grantha. Condition, fair. Appearance, old.

Contains the first 100 stanzas in the third Sarga.

Same work as the above.

No. 11583. नैषधव्याख्या—जीवातुः.

NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

Substance, palm-leaf. Size, 16¼ × 1½ inches. Pages, 65. Lines, 7 on a page. Character, Telugu. Condition, fair. Appearance, old.

Breaks off in the 141st stanza of the first Sarga.

Same work as the above.

No. 11584. नैषधव्याख्या—जीवातुः.

NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

Substance, palm-leaf. Size, 14¾ and 13½ × 1¼ inches. Pages, 51. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Rahasyatrayasāra 28*a*.

The first leaf is numbered 23, in which the commentary of the fourth Sarga ends and that of the fifth begins; the last 4 leaves are much broken.

Contains the fifth Sarga complete.

Same work as the above.

No. 11585. नैषधव्याख्या—जीवातुः.

NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

Substance, palm-leaf. Size, 11⅜ × 1½ inches. Pages, 6. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other works herein are Śiśupālavadhavyākhyā 4*a*, Campūrāmāyaṇa 8*a*.

Contains 1 to 13 stanzas in the second Sarga.

Same work as the above.

No. 11586. नैषधव्याख्या—जीवातुः.

NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

Substance, palm-leaf. Size, $15\frac{5}{8} \times 1\frac{1}{8}$ inches. Pages, 18. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 37*a*. The other works herein are Śuddhicandrikā 1*a*, Yājñavalkyasmṛti with Ṛjumitākṣarā 46*a*.

Breaks off in the 49th stanza of the second Sarga.

Same work as the above.

No. 11587. नैषधव्याख्या—जीवातुः.

NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

Substance, palm-leaf. Size, $17\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 292. Lines, 7 on a page. Character, Telugu and Grantha. Condition, injured. Appearance, old.

Contains up to the 34th stanza of the fourth Sarga, the whole of the tenth Sarga excepting the first two stanzas, the first 35 stanzas of the 12th Sarga and the first 100 stanzas of the 14th Sarga.

Same work as the above.

No. 11588. नैषधव्याख्या—जीवातुः.

NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 67. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, new.

Contains 140 stanzas in the first Sarga.

Same work as the above.

No. 11589. नैषधव्याख्या—जीवातुः.

NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

Pages, 14. Lines, 14 on a page.

Begins on fol. 3*a* of the MS. described under No. 11536.

Contains the seventh Sarga only.

Same work as the above.

No. 11590. नैषधव्याख्या—जीवातुः.

NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

Pages, 72. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 11551.

Contains the first Sarga complete, but without the first leaf.

Same work as the above.

No. 11591. नैषधव्याख्या—जीवातुः.

NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 151. Lines, 8 on a page. Character, Telugu. Condition, good. Appearnnce, old.

Contains the Sargas one to three complete.

Same work as the above.

No. 11592. नैषधव्याख्या—जीवातुः.

NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

Pages, 41. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 11553.

Contains the second Sarga complete.

Same work as the above.

No. 11593. नैषधव्याख्या—जीवातुः.

NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

Substance, palm-leaf. Size, $20 \times 1\frac{3}{4}$ inches. Pages, 165. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contians the Sargas three to six complete.

Same work as the above.

No. 11594. नैषधव्याख्या—जीवातुः.

NAIṢADHAVYAKHYĀ : JĪVĀTUḤ.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 325. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the Sargas five to nine.

Same work as the above.

No 11595. नैषधव्याख्या—जीवातुः.

NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

Substance, palm-leaf. Size, $17 \times 1\frac{1}{4}$ inches. Pages, 29. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, new.

Contains the commentary on 1 to 46 stanzas without the text and 47 to 52 with text in the first Sarga.

Same work as the above.

No. **11596.** नैषधव्याख्या—जीवातुः.
NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

Substance, palm-leaf. Size, 17⅜ × 1½ inches. Pages, 148. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Contains the Sargas one and two and four stanzas of the third Sarga; the introduction in the first Sarga is wanting.

Same work as the above.

No. **11597.** नैषधव्याख्या—जीवातुः.
NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 124. Lines, 6 on a page. Charater, Telugu. Condition, injured. Appearance, old.

Contains the Sargas six and seven complete.

Same work as the above.

No. **11598.** नैषधव्याख्या—जीवातुः.
NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 17*a* of the MS. described under No 11561.

Contains the 12th Sarga which breaks off in the 30th stanza

Same work as the above.

No. **11599.** नैषधव्याख्या—जीवातुः.
NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

Pages, 120. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 11565.

Breaks off in the third Sarga.

Same work as the above.

No. **11600.** नैषधव्याख्या—जीवातुः.
NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

Pages, 43. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 11563.

Contains 91 stanzas only in the second Sarga.

Same work as the above.

No. 11601. नैषधव्याख्या.

NAIṢADHAVYĀKHYĀ.

Substance, paper. Size, 11¼ × 4½ inches. Pages, 1493. Lines, 12 on a page. Character, Dēvanāgarī. Condition, fair. Appearance, old.

This is a commentary on the Naiṣadha, by Nārāyaṇa, son of Mahālasā and Narasiṁhapaṇḍita who is also called Vēdakara- or Vēdarakara-Narasiṁhapaṇḍita. See Burnell's Catalogue, page 156.

Complete.

Beginning :

नमामि शाङ्करं पादपङ्कजं शां . . . स्तुभम् । ?
मृडान्यलिनीसन्त . . सेवितं देवपूजितम् ॥
वैदेही यस्य वामे जयति जयजनिर्दक्षिणे लक्ष्मणोऽपि
श्रीमानग्रे हनूमानतुललव(बल)चयो हस्तविन्यस्ततत्त्वः ।
कोदण्डं काण्डमेकं दधदहति(हित)कुलध्वंसकारी समन्ता-
दव्यादव्याजभव्याकृतिसलिलनिधिर्जानकीजात(नि)रस्मान् ॥
दशकन्धरकारिसिंहः सीताचेतस्सरोज(रो)लम्बः ।
रघुकुलकैरवचन्द्रः पायादा(या)सतो रामः ॥
भव्याय भूयाद्भवतां (श्रीरामो भक्तिभावितः) ।
स्मृतेरजृ(रुज्जृ)म्भते यस्य पदवी सुरदुर्लभा ॥
नत्वा श्रीनरसिंहपण्डितपितुः पादारविन्दद्वयं
मातुश्चापि महालसेत्यभिभि(ध)या वि[आ]ख्यातकीर्तेः क्षितौ ।
श्रीरामेश्वरसंतियोः सुमनसोर्गुर्वोरगु(ग)र्वो यथा-
बुद्धि श्रीनिषधेन्द्रकाव्यविवृतिं निर्मीति नारायणः ॥
प्रशा(ण)म्य शङ्करं सोम(म)नन्तं श्रीपतिं समम् ।
कुर्वे नाम्ना नैषधीयप्रकाशं सुहृदां मुदे ॥

चिकीर्षितस्य निर्विघ्नसमाप्त्यर्थंशिष्टाचारपरिप्राप्तमाशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति मङ्गलाचरणं कर्तव्यमिति ग्रन्थकृच्छ्रीहर्षनामा कविर्मू(र्गू)ढं सबीजं रघुनाथमि(थाभी)ष्टदेवतानमस्काररूपं मङ्गलमाचरति । अन्ये तु विशिष्टवस्तुनिर्देशलक्षणं मङ्गलमित्याहुः ।

निपीय यस्य क्षितिरक्षिणः कथास्तथाद्रियन्ते न बुधाः सुधामपि ।
नलः सितच्छत्रितकीर्तिमण्डलः स राशिरासीन्महसां महोज्ज्वलः ॥

निपीयेति । अत्र पुण्यश्लोकनलरूपाविशिष्टवस्तुनिर्देशरुनवानोग्रग्रन्थसमाप्तिरित्यभिप्रायेणाह — स नलः आसीदिति। पृथ्वादीनां स्मरणमपि सकलाभीष्टहेतुः किं पुनः कीर्तनमिति । किंविशिष्टो नलः । महसां राशिः प्रतापानामाश्रयः । यद्वा महसां तेजसां राशिः सूर्य इव स्थितः । लुप्तोपमा लुप्तोत्प्रेक्षा वा । एतेन स एव तेजस्वी सूर्यवन्नान्य इति व्यङ्ग्यम् । स कः । बुधाः सुमतयः यस्य प्रजापालनरूपाः कथा गोष्ठीर्निपीय सादरं श्रुत्वा सुधामपि अमृतमपि तथा नाद्रियन्ते यथा पूर्वममृते यागादिसाध्ये सादरा आसंस्तथा नलकथाश्रवणानन्तरं नेति ततोऽप्यधिका नलकथेत्यर्थः । कथामिति पाठः साधीयान् । शर्करादिमधुरद्रव्यादपि सुधायामादर इत्यपेरर्थः । यदीया कथा अमृतादपि सरसेत्यर्थः । एतेनेन्द्रादीनां त्यागेन नले दमयन्त्यनुरागस्यौचित्यमुक्तम् । यद्वा, बुधाः देवाः सुधान्धसोऽपि तां नाद्रियन्ते; यस्य कथाः (अ)मृतादप्यतिमनोहरा इत्यर्थः ।

End :

इदानीं पण्डितानन्दजननद्वारा स्वकृतेरभ्युदयमाशास्ते—ताम्बूलेति । यः कान्यकुब्जेश्वरात् सकाशात् सकलपण्डिताधिक्यव्यञ्जनं ताम्बूलद्वयं विद्वद्योग्यमासनं च लभते । न केवलं राजपूज्य एव, किं तु यः समाधिषु अष्टाङ्गयोगेषु ध्यानेषु वा विषये प्रमोदानन्दं(र्णवं) परमानन्दं(न्द)स्वरूपं परं वागाद्यगोचरं ब्रह्म साक्षी(क्षात)कुरुते । न परं पूर्वोक्तगुणविशिष्टो ब्रह्मविदेव, किन्तु यदीयं काव्यं मधुवर्षि अतिसरसत्वादमृतवर्षि न परं पूर्वोक्तगुणविशिष्टोऽतिसरसो महाकविरेव, किन्तु तर्कशास्त्रेष्वपि यस्योक्तयः धर्षिताः पराभूताः परे प्रतिवादिनो याभिस्तादृश्यः । तस्य विद्वच्चक्रचूडामणेः श्रीहर्षकवेरियं काव्यरचनारूपा कृतिः सुकृतिनां सुधियां मुदे आनन्दायाभ्युदीयात् । कृतिनामानन्दं कुर्वती सत्याकल्पमतिवृद्धिं प्राप्नु(प्नु)यादित्याशीः । सर्वत्र यच्छब्द-[इति]निर्वाहो गुण एव । अभ्युदीयादिति इण् गतावित्यस्य रूपम् ॥ १९९ ॥

सन्तः सन्तु परप्रयोजनकृतः कल्पद्रुमन्तः सदा
यस्मिन्नेव पथि प्रवर्तनपराः सत्कीर्तयश्चापरे ।
अन्ये निस्पृहसा(णाः)श्रितश्रुतिपथा दीव्यन्तु भव्याशयाः
काकन्तः कलहप्रियाः खलजना जायन्तु(नश्यन्तु) जीवन्तु वा ॥

वासनामस्य रामस्य किङ्करस्य जगत्पते ।
नो चेत्पूरय कल्पेश कल्पस्य तुव किङ्करः ॥

Colophon :

इति श्रीवेदकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे द्वाविंशः सर्गः ॥ २२ ॥ समाप्तः ॥

No. **11602.** नैषधव्याख्या.

NAIṢADHAVYĀKHYĀ.

Substance, paper. **Size**, 12¼ × 6¼ inches. **Pages**, 75. **Lines** 13 on a page. **Character**, Dēvanāgarī. **Condition**, injured. **Appearance**, new.

Contains the Sargas two and four complete.

Same work as the above.

No. **11603.** नैषधव्याख्या.

NAIṢADHAVYĀKHYĀ.

Substance, palm-leaf. **Size**, 16½ × 1⅜ inches. **Pages**, 125. **Lines**, 8 on a page. **Character**, Telugu. **Condition**, injured. **Appearance**, old.

Contains the Sargas nine and ten only; but wants the first two stanzas in the beginning of the ninth Sarga and 13 stanzas in the end of the tenth Sarga.

This commentary is by Viśvēśvarasūri.

Beginning :

दिगीशसन्देशगिरमशृणोत्, निषेधस्य ज्ञानपूर्वकत्वात् तज्ज्ञानार्थमशृणोदित्यर्थः । किञ्च तदुक्तमात्रश्रवणेच्छया नलवागमृतपिपासयेत्यर्थः । दिगीशसन्देशगिरमशृणोत् । मात्रपदव्यावर्त्यमाह, गौरवादिति । दिगीशगिरादरान्न । अस्मिन् सर्गे वंशस्थवृत्तम् । लक्षणं तूक्तमाद्यिमसर्गे । वैदर्भीति । तेन नलेनार्पितां प्रयुक्तां दिगीशसन्देशमयीं तद्रूपां तां सरस्वतीं वाचम् । अश्रुतवद्विधाय अश्रुतामिव कृत्वा ; तेन तुल्यमिति(ल्यं) क्रिया चे(दिति व)तिः । उर्वीतलशीतलद्युतिम्, भूलोकचन्द्रम । तं नलमिदं वक्ष्यमाणं जगाद गदितवती । मयेति ।

* * * *

श्रीहर्षमिति । सन्दब्धं ग्रथितमर्णववर्णनाख्यप्रबन्धो येन अस्य सन्दब्धार्णववर्णनस्य नैषधीये चरिते साधुनि महाकाव्ये निसर्गोज्ज्वलो नवमः सर्गो व्यरंसीत् । ग्रन्थितं सन्दितं दब्धमित्यमरः ॥

Colophon:

इति विश्वेश्वरसूरिविरचितायां नैषधटीकायां नवमः सर्गः ॥

अथ स्वयंवरवृत्तान्तं वर्णयति—

अथ नलप्रयाणानन्तरम् । कुलजाः कुलीनाः । शस्त्रेषु शस्त्रविद्यासु, शास्त्रेषु काव्यादिषु च, दृष्टं पारं यैस्ते दृष्टपाराः पारदृश्वानः ।

End:

जागर्ति विलसति अथ नाके स्वर्गे अधोभुवने पाताले वा अस्ति यदि तत् तर्हि तातस्ततानां ततस्ततस्स्वर्गादिलोकादागतानाम्; तत आगत इत्यण्प्रत्ययः । अव्ययानां भमात्रे टिलोपः । बाधः सम्बाधः अस्य उत्तरत्र ता गच्छेयुरित्यर्थः । अत एवमनु(प)लब्धार्थापत्ति(र्यदि)स्याम(द)-स्यात्त्रैलोक्येऽपि तुलाभावो निश्चित इत्यर्थः । अत एवोपमानलोपात् लुप्तोपमालङ्कारः ॥ १२९ ॥

No. **11604.** पद्यचूडामणिः.

PADYACŪḌAMAṆIḤ.

Substance, paper. Size, 11 × 8½ inches. Pages, 123. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Contains the Sargas one to ten.

A poem describing the leading incidents in the life of Buddha, the founder of Buddhism up to his taking the ascetic order. The author of the work is Buddhaghōṣācārya.

A critical edition of this work is being brought out as a publication of this Library.

Beginning:

कारुण्यकल्लोलितदृष्टिपातं कन्दर्पदर्पानलकालमेघम् ।
कैवल्यकल्पद्रुममूलकन्दं वन्दे महःकन्दलमर्कबन्धुम् ॥
यस्यैकदेशं यतयोऽपि वक्तुं नालं बभूवुर्नलिनासनाद्याः ।
शास्तुस्तदेतच्चरितापदानं वक्तुं मनीषा मम मौग्ध्यमेव ॥

* * * *

अस्ति प्रशस्ता कपिलेति नाम्ना काचित्पुरी कामदुघा प्रजानाम् ।
यां वीक्ष्य शक्रो निजराजधान्याः श्लाघाभिसन्धिं शिथिलीकरोति ॥

* * * *

महीपतिस्तत्र बभूव मान्यः शाक्यान्वयः शाश्वतराजलक्ष्मीः ।
धर्मानुरोधार्जनशुद्धवृत्तिः शुद्धोदनो नाम यथार्थनामा ॥

* * * *

नदीव सिन्धोर्नलिनीव भानोः कलेव चेन्दोः कमलेव विष्णोः ।
सौदामिनीवाम्बुधरस्य तस्य मायेति नाम्ना महिषी बभूव ॥

End:

एवंविधैर्ललितभावरसानुविद्धैर्नृत्तक्रमैर्निरुपमैर्वचसां विलासैः ।
आलोक्य बुद्धमविकम्पितचित्तवृत्तिं लज्जावशात्प्रतिनिवृत्य ययुस्तरुण्यः ॥
इत्थं पुष्पशरासनस्य विजयव्यापारशुल्कस्थितां
सम्बोधिप्रमदां निवेश्य सुदृशं श्रीबोधिमूले वरः ।
सिद्धार्थश्चिरवासनापरिगतानुच्छिद्य दोषद्विषो
मुक्तिक्षेत्रकुटुम्बरक्षणविधौ मूर्धाभिषिक्तोऽभवत् ॥

Colophon:

इति श्रीबुद्धघोषाचार्यविरचिते पद्यचूडामणौ महाकाव्ये सिद्धार्थचरिते दशमः सर्गः ॥

No. 11605. पद्यचूडामणिः.
PADYACŪḌĀMAṆIḤ.

Substance, palm-leaf. Size, $15\frac{2}{3} \times 1\frac{1}{2}$ inches. Pages, 64. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Breaks off in the tenth Sarga.

Same work as the above.

No. 11606. पार्वतीरुक्मिणीयम्.
PĀRVATĪRUKMIṆĪYAM.

Substance, paper. Size, $8\frac{1}{2} \times 6\frac{3}{8}$ inches. Pages, 122. Lines, 12 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Yadunāthacarita 63*a*, Harilīlāvivēka 111*a*.

Contains the Sargas one to nine.

This is a poem the stanzas of which are so worded as to be capable of giving double meaning and thus it describes at the same time the marriage of Śiva with Pārvatī and that of Kṛṣṇa with Rukmiṇī: by Vidyāmādhava, a poet in the court of Sōmadēva of Culukya family. In the introductory stanzas it is stated that besides the author of this work, three other poets only, viz., Bāṇa, Subandhu and Kavirāja were skilled in writing works capab[illegible]f giving double significance.

Beginning :

जगत्त्रयं बिभ्रदुपात्तसत्त्वो वृषेण गच्छन् सुखबोधमूर्तिः ।
तनौ दधानोऽनुपमश्रियं तां शिवां शिवं वो विदधातु देवः ॥
जाताभ्रितो ला(वा)प्रथिताचलाद्या संप्राप नित्येश्वरदेहयोगम् ।
श्रियं दधानां श्रितसद्गुणौघां नमामि वन्द्यां जगतोऽम्बिकां ताम् ॥
द्विजैक्यरूढो विधुसङ्गताङ्गः स्तुतः सुरेन्द्रैरमृतस्य दाता ।
विनीतविघ्नो विनतार्तिहारी विनायकः स्याद्विनयश्रिये वः ॥

* * * *

कथाद्वयश्लेषकृतौ नवायां विमूढबुद्धेरपि विस्मयः स्यात् ।
अनर्घमेतद्भुवि काव्यरत्नं क एष न स्वीकुरुते गुणज्ञः ॥
यतोऽत्र गङ्गायमुनानुरूपे श्लिष्टे महेशाच्युतयोः कथे द्वे ।
अतश्चतुर्वर्गफलानि साक्षाद्भवेयुरस्याश्रयिणां नराणाम् ॥
जगत्यजय्यो जगतीपतीनां पतिः प्रतिष्ठाखिलसद्गुणानाम् ।
चुलुक्यवंशप्रभवः प्रभावान् पृथुप्रभावो भुवि सोमदेवः ॥
कलानिधेरीश्वरभूषणस्य प्रमादिनो विष्णुपदाश्रयस्य ।
सुधात्मकस्याब्धिभुवो निशेशो यस्यार्थयुक्ता भुवि सोमसंज्ञा ॥
ज्ञात्वा कलौ शत्रुभयं भविष्यद् भुवि त्रयीधर्मसुरद्विजानाम् ।
संरक्षणायेव ससर्ज धाता यद्राज्यदुर्गं विगतोपसर्गम् ॥
अधर्मधात्रा कलिनाखिलेषु खिलीकृतेषु क्षितिपालकेषु ।
निराश्रयाणां नृपसद्गुणानां परं भवत्यास्पदमक्षयं यः ॥
कलास्वभिज्ञः सकलासु वक्ता शृणोति सूक्तानि विपश्चितां यः ।
अर्थं विजानाति गुणान् मिमीते प्रसीदतीष्टं प्रददाति चार्थम् ॥
श्रिया हरिं भोगितया महेन्द्रं रूपेण कामं रुषितेन रुद्रम् ।
प्रदानशक्त्या सुरपादपं यो विडम्बयत्यम्बुनिधिं च धृत्या ॥
महीभृता तेन महाकवीनां प्रियेण रागात् परिपाल्यमानः ।
महीतलव्यापि महत्तदीयं यशश्शरीरं परिपालयिष्यन् ॥
महाकवीशोन्नतभद्ररुद्रो वादीन्द्रराजाधिपजामदग्न्यः ।
ज्योतिर्गतिज्ञानचतुर्मुखश्च विद्यामहामाधवपण्डिताख्यः ॥
हिमाद्रिकन्यासहितं महेशं लक्ष्मीसमेतं मधुसूदनं च ।

स्तोतुं तदुद्वाहकथैक्यचित्रप्रबन्धलक्ष्यादहमुत्सहिष्ये ॥
भ्राणः सुबन्धुः कविराजसंज्ञो विद्यामहामाधवपण्डितश्च ।
वक्रोक्तिदक्षाः कवयः पृथिव्यां चत्वार एते न हि पञ्चमोऽस्ति ॥
श्रीमानभूदाहितलोकसीमा समुन्नतः सद्गुणरत्नभूमिः ।
महीभृदीशो यशसा हिमाद्रिः श्रुतः क्षितौ भीष्मक आत्तसत्त्वः ॥
संश्रीयमाणो विबुधैः समन्तादलङ्घनीयो भृतबन्धुरागः ।
स्थितो गुरुत्वेऽनुपमेय एकः शक्त्या स्म यो भूमिमिमां बिभर्ति ॥

* * * *

नाम्नाकृतोमेशसमानधाम्ना सा रुक्मिणी रत्नततीर्द्विजेभ्यः ।
प्रयच्छता नाम गुणस्य वेत्रा पित्रा स्वमित्राभिवृतेन तेन ॥
महत्या सम्पत्त्या सह पुरवरे तत्र वसतां
जनानां देवानामपि रिपुजयाशा दृढतरा ।
कुमारी सा पित्रोरपि च परयानन्दधुरया
कलेवेन्दोराद्या प्रतिदिवसमावर्धत शुभा ॥

Colophon :

इत्थं काव्ये पार्वतीरुक्मिणीये हृद्ये विद्यामाधवीयेऽत्रः सर्गः ।
(श्रीशब्दादिः संपदानन्दमूर्धा स्पष्टार्थोऽभूदादिमोऽयं) समाप्तः ॥

* * * *

Colophon :

एवं नाम्ना पार्वतीरुक्मिणीये हृद्ये विद्यामाधवीयेऽत्र सर्गः ।
श्रीशब्दादिः सम्पदानन्दमूर्धा संपूर्णोऽभूदद्वितीयो द्वितीयः ॥

End :

वधूनां स्वजात्यादिभेदानुरूपैः मनोमोहनैर्मोहनैर्भूरभेदैः ।
कृतानन्दसम्पत्तिभिस्ते युवानः स्मराधूतनिद्रा निशान्तामनैषुः ॥

Colophon :

इह सुमहति काव्ये पार्वतीरुक्मिणीये
शुभमवसितराजन्(त्)सम्पदानन्दचिह्नम् ।
नवममनवमार्थं सर्गमाधत्त सश्री-
पदमुखमिति विद्यामाधवः पण्डितेन्द्रः ॥

नवमः सर्गः समाप्तः ॥

No. 11607. प्रसन्नरामायणम्.
PRASANNARĀMĀYAṆAM.

Substance, palm-leaf. (Śrītāla) Size, 13¾ × 1⅛ inches. Pages, 123. Lines, 11 on a page. Character, Grantha. Condition, fair. Appearance, old.

A poem in 22 Sargas briefly describing the story of the Rāmāyaṇa. The number of the Sargas corresponding to the Kāṇḍas of the Vālmīkirāmāyaṇa are given below :—

1 to 7	Sargas correspond to the		Bālakāṇḍa.
8 and 9	,,	,,	Ayōdhyākāṇḍa.
10 and 11	,,	,,	Āraṇyakāṇḍa.
12 and 13	,,	,,	Kiṣkindhākāṇḍa.
14 to 16	,,	,,	Sundarakāṇḍa.
17 to 22	,,	,,	Yuddhakāṇḍa.

By Dēvaradīkṣita or Dēvayārya, son of Śrīpatidīkṣita.

Beginning :

(नित्या)नुषङ्गादविचिन्त्यधाम्नो यस्याम्बुजावासमुखाः सुरेन्द्राः ।
विभान्ति वह्नेरिव विस्फुलिङ्गास्तस्मै परस्मै तनुमो नमस्याम् ॥ १ ॥
अनन्तधामानमचिन्त्यशक्तिमशेषलोकेशमनेकरूपम् ।
चतुर्भुजं चन्द्रसमानभासं प्रसन्नवक्त्रं प्रणमामि विष्णुम् ॥ २ ॥
प्रभाकरोद्भूतरघुप्रवीररत्नावलीनायकरत्नभूतम् ।
धीरोज्ज्वलोदात्तगुणाभिरामं रामं सरामं शरणं सरामः ॥ ३ ॥
शुद्धाशया सङ्गतराजहंसा सिद्धर्षिवन्द्या भुवनोर्जितश्रीः ।
सरस्वती सत्कविसेव्यमाना सदा प्रसन्ना सरसा पुनातु ॥ ४ ॥
सारस्वताम्बुप्रसरप्रवृद्धशाखाशताधिष्ठितदिव्यमूर्तिम् ।
आलिङ्गितं रामकथालताभिर्वाल्मीकिकल्पद्रुम(माश्रयामः) ॥ ५ ॥
श्रीकालिदासादिकवीन् प्रणम्य श्रीमत्पदाङ्कं सरसानुबन्धम् ।
काव्यं करिष्ये कविदेवयार्यः प्रसन्नरामायणनामधेयम् ॥ ६ ॥
आसीदयोध्यापतिरद्भुतश्रीः राजाधिराजो रघुवंशकेतुः ।
जम्भारिसम्भावितशौर्यशाली पृथ्वीपतिः पङ्क्तिरथाभिधानः ॥ ७ ॥
प्राधेन देवासुरसांयुगीनं साहाय्यकं येन मुहुर्मघोनः ।
राजन्वती भूमिरियं वितेने न केवलं द्यौरपि विक्रमेण ॥ ८ ॥

* * * *

इति श्रीदेवयार्येण कृते श्रीपतिसूनुना ।
प्रसन्नरामे काव्येऽस्मिन् सप्तमः सर्ग ईरितः ॥

Colophon:

इति प्रसन्नरामायणे सप्तमः सर्गः ॥
बालकाण्डः समाप्तः ॥

End:

कुर्वन्यज्ञाननेकांस्तरणिकुलभवो वाजिमेधान्सुमेधा
नष्टातङ्काभिशङ्कामखिलवसुमतीं पालयन्पुण्यकीर्तिः ।
रामो धर्मार्थकामैरिव भरतमुखैर्भ्रातृभिर्भक्तिनम्रै-
रन्यायोध्यामयोध्यामतुलभुजबलः श्रीमतीमध्युवास ॥ ९९ ॥
मध्ये दुग्धपयोनिधेर्मणिमयद्वीपे सकल्पद्रुमे
चश्वत्काश्चनमण्टपे श्रितमहासिंहासने श्रीमति ।
आसीनाममलपङ्कजेऽष्टदल . . . .
. . . . दयस्व सुयशोराशे दयाशेवधे ॥

Colophon:

यस्य श्रीपतिर्दीक्षितो जनयिता . . . .
. . . . ।
काव्यं देवनदीक्षितेन कविना तेन प्रणीतं जग-
त्याशैलावनिसागरं विजयतामाचन्द्रमातारकम् ॥
इति श्रीदेवयार्येण कृते श्रीपतिसूनुना ।
प्रसन्नरामे काव्येऽस्मिन् सर्गो द्वाविंश ईरितः ॥
इति प्रसन्नरामायणे द्वाविंश[ति]स्सर्गः ॥
इति प्रसन्नरामायणे युद्धकाण्डः समाप्तः ॥

The scribe adds—

इति श्रीहरितकुलोद्भवेन वरदराजसुतेन श्रीनिवासेन लिखितमिदं प्रस-न्नरामायणं सम्पूर्णम् ॥

No. 11608. बालभारतम्.

BĀLABHĀRATAM.

Pages, 171. Lines, 23 on a page.

Begins on fol. 355*a* of the MS. described under No. 5775.

Complete.

This is an epitome of the Mahābhārata in 20 Sargas. By Agastya.

The fly-leaf contains the following note. Copying was finished on the 28th October 1831. This was compared by Dēvarakoṇḍa Vīrēśvara Śāstri and Garimaḷḷa Veṅkayya and corrected. The signature of Vīrēśvara Śāstri is added in attestation of this statement.

Beginning :

अस्त्यत्रिनेत्रप्रभवः कलात्मा शशीति नक्षत्रगणस्य नाथः ।
यं वारिजश्रीहरमाप्तवाचो वामं हरेर्लोचनमामनन्ति ॥
सेव्यः सुराणां हिमवर्षिपादः सम्भावनीयः शिरसा शिवेन ।
महीध्रभर्त्रेव तमोऽपहन्त्रीं यः कौमुदीं दिव्यनदीं प्रसूते ॥
न जाह्नवीयैश्च न यामुनैश्च न चापरासां सरितां पयोभिः ।
यस्योदयेनैव सुजातनाम्नो बह्वीयसीं वृद्धिमुपैति वार्धिः ॥
बुधस्ततोऽभून्नवसु ग्रहेषु रत्नेषु मुक्ताफलवन्मनोज्ञः ।
यः कर्दमापत्यमिलाभिधानं पर्यग्रहीत् पञ्चशरायुधार्तः ॥
तस्यात्मजोऽभूत् पुरुहूतसारः पुरूरवा भूवलयस्य गोप्ता ।
नारायणोरुप्रभवां स्त्रियं यो जयश्रिया सार्धमलब्ध दैत्यात् ॥
तस्यायुरायुर्दमनो रिपूणामासीद्दनूनः स्वगुणैस्तनूजः ।
हृष्यद्धरित्रीपुलकाङ्कुराभा रराज यस्याध्वरयूपराजिः ॥
पुत्रस्तदीयो नहुषोऽधिरूढस्त्रिविष्टपं पुण्यपरम्पराभिः ।
कुत्रापि सुत्राम्णि चिरं प्रणष्टे स्वाराज्यमिन्द्रः स्वयमेव चक्रे ॥
अजायतास्मादनघो ययातिः पेष्टुं द्विषामुच्चलितस्य यस्य ।
नभस्युदीर्णो बलरेणुरासीद्वनो यशःकैतकजन्महेतुः ॥
पुण्यैस्ततस्तस्य बभूव पूरुः क्रोधोदितां दैत्यपुरोधसो यः ।
गुरोर्निदेशान्निजवंशलक्ष्म्याः प्रागेव जग्राह जरां प्रहृष्टः ॥
तदन्वयोदन्वति जन्मभाजामुदग्रतेजोभृतदिक्मुखानाम् ।
मध्ये बहूनां भरतः प्रतीतो राज्ञां मणीनामिव कौस्तुभोऽभूत् ॥

* * * *

सेनासु येनासुरनायकानां नीतासु शान्तिं निशितैः क्षुरप्रैः ।
शरासनं शातमखं नवानामम्भोमुचामाभरणं बभूव ॥
गोत्रे तदीये महति प्रशस्तो बभूव हस्ती महनीयसत्त्वः ।
यः शत्रुशुद्धान्तवधूमुखेषु तमालपत्रापचयं वितेने ॥

वस्वौकसाराममरावतीं च श्रीचारुताभ्यामतिवर्तमानम् ।
यक्षामरेशाभ्यधिकेन येन चक्रे पुरं हास्तिननामधेयम् ॥
कुले गुरुस्तस्य पतिर्धरित्र्याः कुलाद्रिसारः खलु जन्म लेभे ।
असम्मितैश्वर्यवतो विचित्रं यस्यातपत्रं सितमेकमेव ॥
तत्सन्ततौ शन्तनुरूर्जितश्रीरुच्छ्रायवत्यामुदपादि राजा ।
दातुर्यतः स्वास्थ्यमियाय नित्यं प्रत्यर्थिनां संहतिरर्थिनां च ॥

End:

स चैनमाह स्म चिराश्रितेन शुना शुनासीर विनामुना मे ।
न रोचते नाकविहारसौख्यं श्लाघ्यं परं भ्रातृसमागमो वा ॥
विहाय तच्छौनकरूपमग्रे मूर्तेन धर्मेण सह क्षितीशः ।
आरोपितो मातलिचोदिताश्वं रथं मघोना दिवमारुरोह ॥
आन्दोलयन्नभ्रनदीतरङ्गान् नवोदयो नन्दनगन्धवाहः ।
नृपाय कल्पद्रुमपुष्पगन्धमुपायनत्वं गमयाम्बभूव ॥
पाश्चाल्या सममुत्थितैर्निरयतः कर्णादिभिर्भ्रातृभिः
स्वं स्वं धाम गतैरभिष्टुतयशा दिव्यैश्च तैर्बन्धुभिः ।
सिन्धौ दिग्गजदानदिग्धपयसि त्यक्त्वा वपुर्मानुषं
सर्वासां दिविषद्दृशां स विदधे शर्माणि धर्माकृतिः ॥

Colophon:

इति श्रीअगस्त्यकृतौ बालभारते महाकाव्ये विंश[ति]स्सर्गः ॥

No. **11609.** बालभारतम्.

BĀLABHĀRATAM.

Substance, palm-leaf (Śrītāla). Size, 19½ × 2½ inches. Pages, 98. Lines, 10 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as the above.

No. **11610.** बालभारतम्.

BĀLABHĀRATAM.

Substance, palm-leaf. Size, 17½ × 1⅝ inches. Pages, 86. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the Sargas 14 to 20.

Copying is said to have been finished on Wednesday, the 7th day of the Āṣāḍha Bahula of the Śukla year by Maudha Śrīrāmacandra.

The first folio is numbered 76 and the numbers are continued up to 118.

Same work as the above.

No. **11611.** बालभारतव्याख्या—मनोहरा.

BĀLABHĀRATAVYĀKHYĀ : MONŌHARĀ.

Substance, palm-leaf. Size, 13½ × 1⅛ inches. Pages, 242. Lines, 5 on a page. Character, Telugu. Condition, fair. Appearance, old.

Contains the commentary of the Sargas four and five complete and portions of the sixth Sarga, viz., stanzas 1 to 7 and 10 to 80.

A commentary on the Bālabhārata by Sālva Timmayadaṇḍanātha, the prime minister of Kṛṣṇarāya, the king of the Karnata country.

Beginning :

उल्लसद्वेणि चाणूरमल्लमर्दि महात्मनाम् ।
वल्लभं वस्तु किमपि वल्लवीवल्लभं भजे ॥

कौरवस्येति । पुरोचनः पुरोचनाख्यः । कौरवस्य सुयोधनस्य । सचिवो मन्त्री ; "मन्त्री सहायसचिवौ" इत्यमरः । प्रथमं युधिष्ठिरगमनात्पूर्वमेव । तत्पुरं वारणावतं प्रस्थितः, वारणावतमुद्दिश्य प्रस्थित इत्यर्थः ।

* * * *

Colophon :

इति श्रीमद्राजाधिराज(राज)परमेश्वरकर्णाटेश्वरश्रीकृष्णरायशिरःप्रधान-सकलागमपारावारपारीणश्रीसाल्वतिम्मयदण्डनाथविरचितायां बालभारत-व्याख्यायां मनोहराख्यायां चतुर्थः सर्गः ॥

अस्तु वैरश्ववक्त्राब्जवास्तव्यं परवस्तु वः ।
यद्वीणाकलनिक्वाणाः सामस्य ब्रह्मचारिणः ॥

अथेति । वीरवर्यः वीरश्रेष्ठः । "शूरो वीरश्च विक्रान्तः" इत्यमरः । सः धृष्टद्युम्नः । एवं यः पातयेत् स परिणेष्यति मत्स्वसारमित्युक्तप्रकारेण आख्याय उक्त्वा ।

* * * *

Colophon :

इति श्रीमद्राजाधिराजराजपरमेश्वरकर्णाटेश्वरश्रीकृष्णरायशिरःप्रधान-सकलागमपारावारपारीणश्रीसाल्वतिम्मयदण्डनाथविरचितायां बालभारत-व्याख्यायां मनोहराख्यायां पञ्चमः सर्गः ॥

वन्दारुजनमन्दारं शरारुशतकोटिकम् ।
नन्दनप्रसवापीडं कलये नन्दनन्दनम् ॥

अथेति । अथानन्तरं कदाचित् जातु । काश्चित् द्विजातिर्ब्राह्मणः नृपतिद्वारं राजद्वारमुपागतः प्राप्तः सन्नुदस्तबाहुः उत्क्षिप्तभुजः सन् ।

End:

(त)दीयं द्रौपदीसम्बन्धि । वासो वस्त्रम् । अपहर्तुमाक्रष्टुम । आरभत आरब्धवान् । रभेर्लङि तङ् ॥ ७९ ॥

ज्येष्ठेति । चपलेन चञ्चलेन । दु . . . . माणमपाह्रियमाणं । वसनं वस्त्रं यस्याः सा तथोक्ता । साध्वी पतिव्रता द्रौपदी । भर्तॄन् भीमादीन् पतीन् । ज्येष्ठस्य अग्रजस्य यु(धिष्ठिरस्य) . . . . . ।

No. 11612. बालभारतव्याख्या—मनोहरा.

BĀLABHĀRATAVYĀKHYĀ : MANŌHARĀ.

Substance, palm-leaf. Size, 12 × $1\frac{5}{8}$ inches. Pages, 186. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the Sargas 10 to 12, which last breaks off with the 27th stanza.

Same work as the above. In the colophon of the commentary on the tenth Sarga extracted here, the commentator's name is stated as Sālva Timmaṇṇadaṇḍanātha.

Beginning:

विराटपर्व (स)मारभते—पार्था इति । पार्थाः पाण्डवाः । मात्स्यस्य विराटस्य । पुरे नगरे । दृढच्छन्नं यथा भव(ति तथा ।) अन्ते भवः अन्त्यः । दिगादित्वाद्यत् ।

* * * *

Colophon:

इति श्रीमद्राजाधिराजराजपरमेश्वरकर्णाटकेश्वरश्रीकृष्ण(राय)शिरःप्रधानसकलागमपारावारपारीणश्रीसाल्वतिम्मणदण्डनाथविरचितायां बालभारतव्याख्यायां दशमः सर्गः ॥

Colophon:

विराटपर्वकथा समाप्ता । इति बालभारतव्याख्याने एकादशस्सर्गः ॥

589-A

उद्योगपर्वकथामारभते— धर्मात्मज इति । धर्मात्मजः युधिष्ठिरः । बन्धुतया बन्धुसमूहेन । ग्रामजनबन्धुसहायेभ्य इति तत् । समेतः सङ्गतः सन्.

* * * *

End:

शन्तनुसूनुसू(सु)न्व्या भीष्मादयः सर्वेऽपि कौरवाः आगतं तं कृष्णं प्रत्ययुः प्रत्युद्गतवन्तः ॥

यथाक्रममिति । यथाक्रमं क्रममनतिक्रम्य । यया सम्भावनया । प्रहृष्टैः ते(तैः) भीष्मादिभिः ॥

No. 11613. भट्टिकाव्यम्.

BHAṬṬIKĀVYAM.

Substance, paper. Size, 13¾ × 6 inches. Pages, 160. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 1*b*. The other works herein are Jānakīpariṇayam 82*b*, Bhāgavatacampu 176*b*, Vikramārkacaritram 233*b*.

Complete in 22 Sargas.

A famous Mahākāvya dealing with the story of the Rāmāyaṇa. It is written with a view to illustrate the grammatical Sūtras of Pāṇini as well as the rules of rhetoric and poetics. The work is divided into four Kāṇḍas, viz., Prakīrṇa, Prasanna, Adhikāra and Tiṅanta, each Kāṇḍa consisting of several Sargas: by Bhaṭṭi, son of Svāmin. For further particulars see the edition of this work printed in the Bombay Sanskrit Series.

Beginning:

अभून्नृपो विबुधसखः परन्तपः श्रुतान्वितो दशरथ इत्युदाहृतः ।
गुणैर्वरं भुवनहितच्छलेन यं स नातनः पितरमुपागमत्स्वयम् ॥ १ ॥
सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट पितॄनपारीत् सममंस्त बन्धून् ।
व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलघातं न्यवधीदरींश्च ॥ २ ॥

* * * *

Colophon:

इति रावणवधे भट्टिकाव्ये प्रकीर्णकाण्डे प्रथमः सर्गः ॥

End:

अथ ससम्भ्रमपौरजनावृतो भरतपाणिधृतोज्ज्वलचामरः ।
गुरुजनद्विजवन्द्यभिपूजितः प्रविशति स्म पुरीं रघुनन्दनः ॥ १० ॥
प्रविधाय धृतिं परां जनानां युवराजं भरतं ततोऽभिषिच्य ।
अयजे तुरगाध्वरेण यज्ञं कृतसम्भारविधिः पतिः प्रजानाम् ॥ ११ ॥

Colophon:

इति भट्टिकाव्ये तिङन्तकाण्डे लुङ्विलासितं नाम आदितः द्वाविंशतितमः सर्गः ॥

भट्टिकाव्यं मूलं समाप्तम् ॥

No. 11614. भट्टिकाव्यम्.
BHAṬṬIKĀVYAM.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 32. Lines, 6 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Contains the Sargas 10 to 12.

Same work as the above.

No. 11615. भट्टिकाव्यम्.
BHAṬṬIKĀVYAM.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 6. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Bhaṭṭikāvyavyākhyāna: Manōhara 4*a*.

Contains the last two stanzas of the first Sarga, the second Sarga, and 14 stanzas of the third Sarga. The first leaf is much injured and half lost.

Same work as the above.

No. 11616. भट्टिकाव्यव्याख्यानम्—मनोहरम्.
BHAṬṬIKĀVYAVYĀKHYĀNAM : MANŌHARAM.

Pages, 22. Lines, 6 on a page.

Begins on fol. 4*a* of the MS. described under the last number.

Begins in the course of the second stanza of the second Sarga and breaks off in the course of third stanza of the third Sarga.

A well-known commentary by Śrīdhara on the Bhaṭṭikāvya.

Beginning:

नि सन्ति रेजुः शुशुभिरे । राजेर्लिटि फणां च सप्तानामित्येत्वाभ्यासलोपौ । चलितानां पत्राणां त्वभिशिखातुल्यत्वं षट्पदानां धूमतुल्यत्वमिति कृत्वा सधूमदीपाभिरुचीनीत्युक्तम् । विभागतैरिति । विभागतैः प्रतिबिम्बितैः ; तृतीयेति योगविभागात् समासः । तैः कुसुमितैः तीरवनैः करणैः । पयोभिः कर्तृभिः.

End :

अथेति । पुरुः महान् जवो वेगः तेन योगात् । पूर्यते वर्धत इति पुरुः । कु(रि)त्यधिकृत्य पृच्छतीं(पृभिदी)त्यादिना कुप्रत्ययः । अतो हेतोः • दूरसंस्थमुर्वीविभागं नेदयत् अन्तिकं कुर्वत्

* * * *

आङ्पूर्वात् यातेर्लुं(र्ले)ङि रूपम् ।

गाधेययज्ञरक्षार्थे . . . . राघवः ।
कृत्वा तत्कार्यमासाद्य सीतां चागात्पुनः पुरम् ॥

Colophon :

व्याख्याने भट्टिकाव्यस्य श्रीधरीये मनोहरे ।
सीतापरिणयो नाम द्वितीयः सर्ग आगमत् ॥

अथ रामप्रवासादि वर्णयन् तृतीयसर्गमारभ(माणो)रामस्य पट्टाभिषेकोद्योगरूपां तद्भूमिकामाह—वधेनेति । सङ्ख्ये युद्धे पिशिताशनानां वधेन हननेन ।

* * * *

पादपीठेन सह वर्तमानं तस्य रामस्यादिक्षत् । एवंविधं कारयेत्यादिष्टवान् । स्वरितेतो दिशेर्लुङि शल इगुपधेति क्सः । क्रियाफलस्यानात्मगामि.

No. 11617. भट्टिकाव्यम्, जयमङ्गलामुग्धबोधिनीव्याख्यासहितम्.

BHAṬṬIKĀVYAM WITH THE COMMENTARIES JAYAMAṄGALĀ AND MUGDHABŌDHINĪ.

Substance, paper. **Size,** $8\frac{1}{2} \times 6\frac{1}{2}$ inches. **Pages,** 44. **Lines,** 23 on a page. **Character,** Telugu. **Condition,** good. **Appearance,** new.

Contains the first 26 stanzas of the first Sarga with two commentaries thereon, viz., Jayamaṅgalā and Mugdhabōdhinī. In the introductory stanzas of the former commentary, the author of the text is stated to be Bhaṭṭi, son of Svāmin, while in the latter commentary the author Bhaṭṭi stated to be Bhartṛhari. The author of Mugdhabōdhinī is stated to be Bharata, son of Ambaṣṭha Gaurāṅga Mallika. He salutes Śaṅkara and mentions Kavikalpadruma (of Bōpadēva). See also Notices of Sanskrit MSS. by Rajēndralāla Mitra, Vol. VI, Page 144.

Beginning of the Jayamaṅgalā :

प्रणिपत्य सकलवेदिनमतिदुस्तरभट्टिकाव्यसलिलनिधेः
जयमङ्गलेति नाम्ना नौकेव विरच्यते टीका ॥

लक्ष्यं लक्षणं चोभयमेकत्र विदुषः प्रदर्शयितुं श्रीस्वामिसूनुः कविर्भट्टिनामा रामकथाश्रयमहाकाव्यं चकार । तथाहि—अस्योपनिबन्धनं कविना द्विधा कृतम् । एकं लक्षणसूचकैः प्रकीर्णकाधिकारप्रसन्नातिङन्तकाण्डैश्चतुर्भिः । द्वितीयं लक्ष्यसूचकैः रामसंभवादिभिः द्वाविंशत्या सर्गैः । तत्र लक्षणं द्विविधम्—

शब्दलक्षणं काव्यलक्षणं च । तत्र प्रथमस्य प्रकीर्णकाधिकारतिङन्तकाण्डानि । द्वितीयस्य प्रसन्नकाण्डम् । यत्रोच्चावचेन बहूनां लक्षणानां प्रकरणं तत् प्रकीर्णकाण्डम् । तदेवात्र प्रथममुक्तम्, तस्य व्यापित्वात् । उत्तरत्रापि द्वयमिति प्रदर्शनार्थम् । अत्र यद्यप्यादौ कविना देवतानमस्कारो न कृतः ; तथापीष्टदेवतासङ्कीर्तनमपि विघ्नोपशमहेतुर्भवतीति मन्यमान आह—अभूदित्यादि । तस्य हीष्टदेवता सनातनो विष्णुः । स चादौ कीर्तितः । तत्प्रतिबन्धना चेयं कथेति प्रबन्धेनैवात्र सङ्कीर्तनम्, रामायणवत् । तत्र विष्णोर्यस्मिन् काले जगत्कार्यवशादवतारः कृतः तदेव प्रथमं दर्शयति ।

Beginning of the Mugdhabōdhinī :

नत्वा शङ्करमम्बष्ठगौराङ्गंमल्लिकात्मजः ।
भट्टिटीकां प्रकुरुते भरतो मुग्धबोधिनीम् ॥
विहिताः पाणिनीयाद्यैः पठनीयादिबोधकाः ।
भट्टिटीका मम त्वेष मुग्धबोधार्थ उद्यमः ॥
कविकल्पद्रुमोक्तानां धातूनामनुबन्धतः ।
स्पष्टानि यानि कार्याणि ततो बोध्यानि तानि तु ॥
नातिस्पष्टानि कार्याणि ग्रन्थगौरवभीतितः ।
वाच्यान्यत्र न चाप्यर्थो अतिविस्तृतवाग्भवाः ॥

भर्तृहरिनामकविः श्रीरामकथाश्रयं महाकाव्यं चकार । अत्र सर्गबन्धो लक्ष्यसूचनाय, काण्डबन्धो लक्षणसूचनाय । अत्र सर्गाः द्वाविंशतिः । प्रकीर्णाधिकारप्रसन्नतिङन्तकाण्डानि चत्वारि । शब्दलक्षणकाव्यलक्षणभेदात् लक्षणं द्विविधम् । तत्र काण्डत्रये शब्दलक्षणं, प्रसन्नकाण्डे काव्यलक्षणम् । आदौ बहुलक्षणप्रदर्शनं प्रकीर्णकाण्डव्यापकत्वात् दर्शितम् । महाकाव्यस्यादावाशीर्नमस्क्रिया वस्तुनिर्देशो वा कर्तव्य इति संप्रदायानुरोधाद्वस्तुनिर्देशं कुर्वन्नेवेष्टदेवतास्मरणात्मकं मङ्गलमप्यादौ प्रकाशयति—

अभून्नृपो विबुधसखः परन्तपः श्रुतान्वितो दशरथ इत्युदाहृतः ।
गुणैर्वरं भुवनहितच्छलेन यं सनातनः पितरमुपागमत्स्वयम् ॥

जयमङ्गला—

अभूदिति भूतसामान्ये लुङ् ; भूत इत्यर्थः । अन्यथा राज्ञश्चिरातीतत्वात् कवेः परोक्षत्वाच्च लिट् स्यात् । गातिस्थेति सिचो लुक् । भूसुवोस्तिङीति गुणप्रतिषेधः ।

* * * *

यं पितरं जनकमङ्गीकृतवान् सोऽभूदिति योज्यम् । स्वयमित्यात्मना ; न कर्मणाऽन्येन वा प्रेरित इत्यर्थः ।

मुग्धबोधिनी—

अभूदिति । दशरथ इति नाम्ना उदाहृतः ख्यातो नृपो राजा अभूत् । स कथंभूतः विबुधसखः । विबुधानां देवानां सखा मित्रम् । अथवा विबुधस्येन्द्रस्य सखा ; सामान्यदेवतावाचिनोऽपि विबुधशब्दस्य विशेषपरत्वात्प्राधान्याद्वा इन्द्रवाचित्वम् । एतेन विजयित्वं दर्शितम् ।

End :

इषुमति रघुसिंहे दन्दशूकान् जिघांसौ धनुररिभिरसह्यं मुष्टिपीडं दधाने ।
व्रजति पुरतरुण्यो बद्धचित्राङ्गुलित्रे कथमपि गुरुशोकान्मा रुदन्माङ्गलिक्यः[1] ॥

ज-ला—

इषुमती(ति) । रघुसिंहे रामे । रघुषु रघुवंशभवेषु सिंह इव शौर्यादियोगात् । व्रजति सति । इषुमति सनिषङ्गे ; प्रशंसायां मतुप् ।

* * * *

रामो गत इति गुरुः शोको यासां ताः । कथमपि नारुदन् न रुदितवत्यः । रुदेरिरितो वेति च्लेरङ् । यतो माङ्गलिक्यः मङ्गलप्रयोजनाः । तदस्य प्रयोजनमिति ठञ् । टिड्ढाणञित्यादिना ङीप् ।

मु-नी—

इषुमतीत्यादि । रघुसिंहे रघुश्रेष्ठे रामे । व्रजति सति । तद्विच्छेदजात् गुरुशोकात्

[1] गुरुशोका नारुदन् इति पाठान्तरम्.

No. 11618. भिक्षाटनकाव्यम्.
BHIKṢĀṬANAKĀVYAM.

Substance, paper. Size, 13 × 8¼ inches. Pages, 35. Lines, 26 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 109*a*. The other works herein are Vasumaṅgalānāṭaka 1*a*, Vaikuṇṭhavijaya 81*a*.

This is the same poem as that described under No. 3852 of the India Office Library Catalogue, Vol. VII, which consists of 42 Paddhatis, whereas the present MS., which is apparently incomplete, contains 20 Paddhatis and the edition in the Kāvyamāla contains 40 Paddhatis. The headings of the Paddhatis in the three books do not coincide in all cases and Paddhatis two to four of this MS. are not represented in the other two books. The story of the poem is that Śiva goes about as a mendicant begging for alms from Rājarāja, a king of the solar race who reigned in the Cōḷa country, with a view to test his liberality, and that the women of the town who were attracted to Him discover their love when separated from Him. The name of the author, Utprēkṣāvallabha, given in the India Office MS. is not found in this MS.

Contains the Paddhatis one to twenty, the subject headings of which are given below :—

१. काव्यमुखपद्धतिः.
२. ब्रह्मस्थानपद्धतिः.
३. चोलदेशवर्णनपद्धतिः.
४. राजगुणपद्धतिः.
५. मण्डनपद्धतिः.
६. मण्डनप्रतिषेधपद्धतिः.
७. निर्गमनपद्धतिः.
८. निर्गमनोक्तिपद्धतिः.
९. दर्शनपद्धतिः.
१०. अङ्गवर्णनपद्धतिः.
११. विलासचरितपद्धतिः.
१२. उक्तिप्रत्युक्तिपद्धतिः.
१३. भिक्षाप्रदानपद्धतिः.
१४. भिक्षाप्रदानोक्तिप्रत्युक्तिपद्धतिः.
१५. पारवश्यपद्धतिः.
१६. पारवश्योक्तिपद्धतिः.
१७. विश्लेषारम्भपद्धतिः.
१८. प्रश्नोक्तिपद्धतिः.
१९. अनुगमनपद्धतिः.
२०. हितोपदेशपद्धतिः.

Beginning :

कल्याणमावहतु नः शिवयोस्तदेकं गात्रं यदीयमसितच्छवि कण्ठमूलम् ।
वामेतरेऽपि कुरुते स्मितभासि भागे वारणशैलतनयापरिणामशङ्काम् ॥

सद्यस्तुषारगिरिजौषधसेवयेव यः स्वोपभुक्तगरलं शमयाञ्चकार ।
अन्यैरशक्यशमनाज्जननामयाद्वः पायादपायनिलयादधमादिवैद्यः ॥
नित्यं करोतु भगवान् स करीन्द्रवक्त्रः प्रारभ्यमाणशुभकर्मविघातलोपम् ।
रागादिदोषरहितः स शिवोऽपि यस्य भृङ्गेषु गन्धमदचुम्बिषु साभ्यसूयः ॥
काश्यं क्षिणोतु भवतां परमेश्वरस्य भिक्षाटनं तदनुसंहितदेहिशब्दम् ।
यन्मानिनामपि विधेर्विपरीतभावे याच्ञोक्तिदैन्यसहमेव मनश्चकार ॥
वाल्मीकिरस्ति विजयी प्रथमः कवीनां तस्यानुसारसरलः स च कालिदासः ।
अन्ये भवन्तु जयिनः कवयोऽथवा मा येषां कृतः कृतिषु नैव मयावगाहः ॥
सर्वे खलास्तिलकयन्तु चिराय पृथ्वीं यत्संभवो बहुमितेः सुजनेषु हेतुः ।
घोरेषु घर्मदिवसेष्वतिलङ्घितेषुच्छायाद्रुमान्मृगयते न हि कोऽपि मर्त्यः ॥
भूयानसत्कविजनो जगतीति खेदान्मौनग्रहः सुकविभिर्न कदापि कार्यः ।
काकैरसह्यनिनदैर्निचितेऽपि लोके किं कोकिला न दधते कलकूजितानि ॥
दुर्दान्तदुर्जनचिते भुवने नराणां प्रायो वरं विकलतैव कलोपपत्तेः ।
राहुग्रहेण न कदापि कलाविहीनः पूर्णस्तु हन्त परिभूयत एव चन्द्रः ॥
सन्त्येव सूक्तिरसिका बहवो मनुष्याः स्वर्गौकसो नवसुधारसनिर्वृताश्च ।
तौ दुर्लभौ कविवचस्स्खलितस्य सोढा मर्त्येषु सागरगरस्य च यः सुरेषु ॥
भूत्वा चिराय गलिताः कति नाम सन्तः पृथ्वीश्वराश्च कति नाम तथेतरेऽपि ।
अद्यापि कीर्तिवपुषा कवयः पृथिव्यां जीवन्ति ये च विहितस्तुतयोऽथवा तैः ॥
एकेन सूक्तिमणिना हृदयंगमेन प्राज्ञस्य सत्कविपदं कुकविः प्रयाति ।
वक्षोगतेन मणिनेव परस्य पुंसो रत्नाकरत्वगणना लवणार्णवस्य ॥
सन्त्येव केऽपि मितवाङ्मयदुर्विदग्धास्तेषां पुरः सुकविभि र्न गिरः प्रकाश्याः ।
तेजस्यपि प्रविततै सति तिग्मरश्मेर्मुञ्चन्ति केचिदुपला निजमल्पतेजः ॥
नापेक्षते महदपि प्रथमानदोषं निर्दोषमल्पमपि वाञ्छति वस्तु लोकः ।
मूर्ध्ना बिभर्ति कृशमप्यमृतांशुबिम्बमीशः कलङ्करहितं न तु पूर्णबिम्बम् ॥
वृत्तं वसन्ततिलकं विषयः शिवस्य भिक्षाटनं कविरसौ शिवभक्तदासः ।
शृङ्गार एव हि रसस्तदिह प्रबन्धे श्रद्धा न कस्य यदि सूक्तिविनोदशीलः ॥
सन्तः क्षतानि जनयन्तु यथेष्टमस्यामाभाति तैरधिकमेव सरस्वती मे ।
दत्तं क्षतं प्रियतमैरनुभूतिकाले किं मण्डनाय न भवेद्वरसुन्दरीणाम् ॥
म मा परत्र विषये विषमेक्षणान्मे तस्मिन् सदा पततु हीनगुणाऽपि वाणी ।

यो मूर्ध्नि मुग्धहृदयो जनगर्हणीयां धत्ते सुधांशुकलयैव सहास्थिमालाम् ॥
आकर्णयन्तु मम सूक्तिविदः प्रबन्धं तैर्नन्द्यतां कृतिरियं खलु निन्द्यतां वा ।
तत्कर्णगोचरतयैव भवेद्गरीयानस्माकमस्तु सफलो रचनाप्रयासः ॥

Colophon :

इति भिक्षाटने काव्यमुखपद्धतिः प्रथमा ॥

End:

श्वासेन हुङ्कृतिमता स्तनितैः कठोरैरुत्तुङ्गशृङ्गयुगलेन च भीषणेन ।
यस्त्रासमावहति भीरुजनस्य शम्भो हित्वा जरद्गवमिमं कुरु भैक्षचर्याम् ॥
मा दूषयः पदयुगं नलिनप्रकारं सन्ध्यासु नाथ पितृकाननचङ्क्रमेण ।
यत्क्षालयत्यविरतं परिषत्सुराणामुत्तंसपुष्पगलितैर्मकरन्दपूरैः ॥
गीर्वाणलोकसरिता सह नित्यमेतां मत्स्यावलिं शिरसि मा वह गर्हणीयाम् ।
लोके समस्तविदिति प्रथितस्य शम्भो मा भूत्तवापि न विशेषविदित्यवद्यम् ॥
योगोचिते मदनसूदन सान्ध्यकाले शोकोचितैः शवशतैर्विशसि श्मशाने ।
प्रेतप्रमोदनटनं भवता न कार्यं धिग् देशकालगणनाविधुरं चरित्रम् ॥ ॥

Colophon :

इति भिक्षाटने हितोपदेशपद्धतिर्विंशतिः ॥

No. 11619. भूवराहविजयः.

BHŪVARĀHAVIJAYAḤ

Pages, 31. Lines, 8 on a page.

Begins on fol. 90*a* of the MS. described under No. 4212.

Contains the Sargas one to eight complete, but wants a portion in the middle of the eighth Sarga.

This poem consists of eight Sargas, and its plot is based on the Sthalamāhātmya of the sacred shrine Śrīmuṣṇa which is, as stated herein, situated between the rivers Kāvērī and the Veḷḷār and is about 24 miles from Chidambaram in the South Arcot district. By Śrīnivāsa Kavi, son of Vīravalli Varadārya. The poem describes the incarnation of Viṣṇu as a boar made with a view to recapture the earth, the sacrifice performed by Him at Śrīmuṣṇam, the origin of the rivers Kṛṣṇā and Śuklā (Veḷḷār), the destruction of the father of Daṇḍaka and the festival of God Bhūvarāha at Śrīmuṣṇam, and His marriage with Lakṣmī.

Beginning :

ओङ्काररूपावसथाय तस्मै श्रीभूमिनीला . . . . . .

. . . . वेदान् विधात्रे विशदीचकार ।
यज्ञेषु देवान् समचोदयत्तं श्रीमुष्णनाथं शिरसा नमामि ॥
योऽनुग्रहे निग्रहणे वसिष्ठस्तत्त्वे तु शक्तेस्तनयः श्रुतेषु ।
(व्या)सो दमे श्रीशुक एव धीरं (धैर्ये) तं मद्गुरुं सन्ततमाश्रयामि ॥
श्रीभूवराहस्य हरेश्चरित्रं ब्रह्मादिभिश्चिन्तितुमप्यशक्यम् ।
अत्यद्भुतं तज्जडमानवेन ध्यातुं च वक्तुं च कथं विधेयम् ॥
तथापि नाथस्य कटाक्षलेशाज्जडोऽपि सद्यश्चतुराननः स्यात् ।

* * *

पूर्वाम्बुधेः पश्चिमतीरभागे श्रीमुष्णनाम्नी नगरी चकास्ति ।
यत्सेविनामत्र महोन्नतश्रीर्मुक्तिश्च सिद्धेति तथा यदाख्या ॥
श्वेतापगासेव्यनिजोत्तराशा सह्यात्मजालङ्कृतदक्षिणाशा ।
श्रीरङ्गलक्ष्म्यावरजेति दोर्भ्या . . . . . . ॥

* * * *

तस्यां हरिर्नित्यसरःप्रतीरे लक्ष्म्या समं यज्ञ(श)तं विधाय ।
ब्रह्मादिभिर्यज्ञवराहदेवेत्यभिष्टुतो यज्ञवराह आसीत् ॥

* * * *

Colophon:

वीरवल्लिवरदार्यतनूजश्रीनिवासकविकेसरिणोक्ते ।
भूवराहविजयाभिधकाव्ये शोभनः प्रथमसर्ग इहासीत् ॥

End:

विधिरपि विहितश्रीः पुष्पयागं विधाय ध्वजपटमवरोप्य प्रेषितेन्द्रादिकः सन् ।
हरिमपि कमलाभूभूषिते भद्रपीठे सुदृढमुपनयन् सन् मङ्गलान्याशशंस ॥

Colophon:

वीरवल्लिवरदार्यतनूजश्रीनिवासकविकेसरिणोक्ते ।
भूवराहविजयाभिधकाव्ये वारसङ्ख्यशुभसर्ग इहासीत् ॥
यस्योत्सवस्य श्रवणेन पुंसां भुक्तिश्च मुक्तिश्च करे स्थिता स्यात् ।
श्रीभूवराहस्य हरेस्तमेतं चैत्रोत्सवं संप्रति वर्णयामि ॥

* * * *

नित्याख्यां सरसीं विगाह्य निगमैः श्रीभूवराहं स्मरन्
नत्वा ब्रह्मसमानशर्म च भजन् भयो दिवं प्रत्ययात् ॥

Colophon:

वीरवल्लिवरदार्यतनूज (. .) नागसङ्ख्यशुभसर्ग इहासीत् ॥
भूवराहविजयकाव्यं संपूर्णम् ॥

No. 11620. यदुनाथचरितम्.
YADUNĀTHACARITAM.

Pages, 93. Lines, 14 on a page.

Begins on fol. 63*a* of the MS. described under No. 11606.

Contains the Sargas one to ten.

A poem describing the birth of Kṛṣṇa and other leading incidents and stories connected with His life, as found related in the tenth Skandha of the Bhāgavata. The work is also called Bhāgavatasaṅgraha. In the introduction it is stated that the author, whose name is not known, wrote this work at the command of a queen called Annapūrṇēśvarī of Kūpaka family, who was probably a ruler in Malabar.

Beginning :

वन्दारुजनसन्दोहचिन्तासन्तानपादपम् ।
सन्तानमिन्दुचूडस्य वन्दे दन्तावलाननम् ॥
वाणीगुणतृणीभूतवीणामेणाङ्करोचिषम् ।
वाणि(णी)माराधये पीनश्रोणीमेणीविलोचनाम् ॥
वंशीसंशीलनपरं धेनुबृन्दावने रतम् ।
बृन्दावनचरं गोपी(काम)पूरमुपास्महे ॥
वतंसिनीचकोरालीसाम्राज्येनास्तमन्मथा ।
कापि मे करुणा भूयादरुणाचलगा मुदे ॥
अस्ति कूपकभूपालवंशमङ्गलदीपिका ।
निलयः सद्गुणालीनां राज्ञी प्राज्ञैकसंमता ॥
धन्यामन्नप्रदानेन तन्वतीं जनसंसदम् ।
अन्नपूर्णेश्वरां मान्यां मन्यन्ते यां महाजनाः ॥
लावण्यसिन्धोर्मथितादाविर्मोदं मनोभुवा ।
उदितां मन्वते लोका मुदितां यां नवां रमाम् ॥
यत्कीर्तिनर्तकी दिक्षु विदिक्षु च कृतक्रमा ।
स्वर्गिणामाखय(लयं) प्राप्य निष्कलङ्काद्य नृत्यति ॥
साहित्यसारसर्वस्वखा(पा)रीणतालिमेशया ।
श्यामला नातितस्वापा भाति यत्कुलदेवता ॥
कामागमार्थसर्वस्वं वामाङ्गेन समुद्वहन् ।
श्यामाजीवातुना मौलिसीमानमपि भूषयन् ॥

यद्राजधान्यामनिशं कद्रूसुतविभूषणः ।
सर्वत्र कुशलं कुर्वन् ववर्ति परमेश्वरः ॥

भ्रातापि यस्या भूलोकत्राता नीतेनिह(प्सित)स्सताम् ।
निर्मोति नित्यमादित्यपदा(महाः) शर्माणि धर्मवित् ॥

ईदृश्यपि गुणैः सर्वैर्वैदुष्यं दधती महत् ।
राजतेजोमयी लोके राजते यत्कनीयसी ॥

श्रावं श्रावं कथा विष्णोर्मोदं मोदं महीयसी ।
आज्ञाविधेयसामन्ता राज्ञी या वर्तते सदा ॥

[धव] तस्याः कलाधरास्यायाः प्रीत्यै माध्वीगिरा मया ।
सङ्क्षिप्ता साक्षरप्रासा क्रियन्त(ते) भगवत्कथा ॥

यदि सन्ति गुणाः केचिदस्यां गृह्णन्तु तान् बुधाः ।
न सन्ति चेद्धरिकथाः सन्त(न्तु) तत्कर्णपारणाः ॥

न विद्याविभवेनेदं न कवित्वेन भूयसा ।
रचितं वैष्णवी भक्तिर्मुखरीकुरुतेऽथ मा ॥

देशिकस्य कटाक्षेण राज्ञीवाक्याङ्कुशेन च ।
भक्त्या च कृष्णे प्रारब्ध बहुभिः साधनैर्मया ॥

अविघ्नं विघ्नराजो मे वाणी शब्दार्थकौशलम् ।
प्रारब्धान्तगतिं कृष्णो विदध्यान्मुदितास्त्रयः ॥

अभूदपूर्वसौराज्यं(ज्य)मधुरा मधुरा गुणैः ।
अपरीकृतपाकारिनगरी नगरी भुवि ॥

सद्गुणालिनिकेतानां न्यक्क(कृ)तामरवैरिणाम् ।
धरातलभुजामासीत्पुरी सा यदुजन्मनाम् ॥

उग्रसेनार्दिताराातिवर्गदुर्गपरम्परः ।
उग्रसेनोऽवसत्तस्यामग्रणीर्यदुभूभुजाम् ॥

अनुजन्मा च तस्यासीन्मनुजानामधीशितुः ।
देवकार्यपरो नित्यं देवका नाम धार्मिकः ॥

उग्रसेनादभूत्कंसः शक्रवैरिसखः सुतः ।
अन्यस्य जज्ञे कन्यापि धन्या यां देवकीं विदुः ॥

अथ शूरसुतो नाम्ना वसुदेवो वसूपमः ।
देवकीमुपयेमे तां देवकन्यासमाकृतिम् ॥

Colophon :

इति यदुनाथचरिते भागवतसङ्ग्रहे प्रथमः सर्गः.

End:

सुत्रामवित्तेशपुरीविभूतिं विश्रावयन्त्यां निजया समृद्ध्या ।
स द्वारकायां पुरि शार्ङ्गधन्वा पुत्रैश्च पौत्रैर्मुमुदे समेतः ॥
स्थिरीकुर्वन् धर्मं भुवि निरुपमं धर्मजमुखैः
भुवो भारं भीमार्जुनतपनजाद्यैः प्रशमयन् ।
कलिं तुच्छीकुर्वन्नतिमधुरयात्मीयकथया
रमानाथः पुर्यामवसदवसन्नारिरनिशम् ॥

Colophon:

इति यदुनाथचरिते भागवतसंग्रहे दशमः सर्गः ॥

No. 11621. यमकरत्नाकरम्, सव्याख्यानम्.

YAMAKARATNĀKARAM WITH COMMENTARY.

Substance, paper. Size, $11\frac{3}{8} \times 9$ and $11\frac{1}{2} \times 8\frac{7}{8}$ inches. Pages, 668. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete in 16 Āśvāsas.

This is a poem written throughout in the Āryā metre and dealing with the leading incidents in the life of Kṛṣṇa from His birth to the killing of Kaṁsa in a single combat. The stanzas of the poem illustrate the figure of speech called Yamaka; and the author Śrīvatsāṅka, the grandson of Śrīvatsāṅka or Kūrattāḻvār, adds a commentary of his own. He is the son of Rāmamiśra of Hāritagōtra and is said to have been called by the name of Parāśara at the command of God Raṅganātha of Srirangam.

Beginning:

प्रणिपत्य परं पुरुषं श्रीवत्साङ्कः पराशराभ्याह्वः ।
स्वयमेव यमकरत्नाकरविवृतिं कर्तुमारभते ॥

यत्किल भगवतः पुराणस्य पुंसः भूभारावतरणाय (अवतीर्णस्य) वासुदेवस्य कंसवधान्तचरित्रविषय यमकरत्नाकराख्यं पथ्यागीतिपथ्योपगीत्यार्याजातिभेदैः आश्रितयमकश्लोकैरस्माभिर्निबद्धं तस्य मन्दबुद्धिसुग्रहमेव व्याख्यानं कर्तुमारभ्यते । पद्माक्षमासमेतमित्याद्याः पथ्यागीतयः, मायाहीन इत्येवंजातीयाः पथ्योपगीतयः, यो ज्येष्ठ इत्येवंजातीयाः आर्यागीतयः । तत्रेप्सितकाव्याङ्गभूतेष्टदेवतानमस्कारादिभिर्विघ्नं निघ्नन्तः कवयो दृश्यन्ते । तदर्थमुच्यते ।

मू—पद्माक्षमासमेतं प्रसन्नतोयद्गतिस्वभावस्थम् ।
पद्माक्षमासमेतं प्रसन्नतो यद्गतिः स्वभावस्थम् ॥

न्या ॥ पद्माक्षमासमेतं श्रीभूमिभ्यां सहितम् । प्रसन्नतोयदगतिस्वभावस्थम् प्रसन्नतोयदस्येव गतिर्यस्याः सा प्रसन्नतोयदगतिः ; स्वस्था आत्मीयायाः भायाः कान्त्याः अवस्था प्रसन्नतोयदगतिस्वभावस्था यस्य स तथोक्तः तमेनम् ।

* * * *

बुद्धे भविष्यसि श्रितपराङ्कुशा प्रस्यमानमाया हि ।
यायास्तत्पदभक्तिं परां कुशाग्रस्य मानमायाहि ॥

* * * *

भूयान्नमस्कृतिरसावरणीया यामुनार्येण ।
समनुश्रियास्म च गतिं वरणीया यामुनार्येण ॥

* * * *

कुर्मो नमः सशिरसा वाचा रामानुजायेह ।
यः सुचरितैरतियथावाचारा मानुजा ये ह ॥

* * * *

सर्वस्मिन् कविलोकेऽधीव प्राचेतसाद्यास्तु ।
सेव्या तद्गीरीश्वरधीवप्रा चेतसाद्यास्तु ॥

* * * *

लभतां रामायणमिह महनिष्यन्दं भजन्मानम् ।
यज्ज्ञाने कवयो जवमहानिष्यन् दम्भजन्मानम् ॥

* * * *

कः किल लोकेऽत्र शुभावहो महाभारतादरादन्यः ।
यत्परिचितयो भूमावहो महाभा रता दरादन्यः ॥

* * * *

नद्यां भवतापार्ताः पराङ्कुशलसद्गिरिप्रभूतायाम् ।
अलभामहि विश्रान्तिं परां कुशलसद्गिरि प्रभूतायाम् ॥

* * * *

या श्रुतिरिह तमसां सप्रणवा महतां तराय तया ।
संवेद्यमाद्यपुरुषं प्रणवाम हतान्तरायतया ॥

* * * *

अखिलस्य योऽस्य जगतो योनिर्माता च देवकी यस्य ।
शर्मण इहावतारैर्यो निर्माता च देवकीयस्य ॥

* * * *

स श्रीवत्साङ्कः संयस्य श्रीरङ्गनाथशेषस्वः ।
इदमकृताश्रित्य हरिं यस्य श्रीरङ्गनाथ शेषः स्वः ॥

* * * *

पितरं रामाह्वं गुरुमाङ्गीरसमञ्जसानूनम् ।
उपसन्नं नोपेयान्मां गीरसमञ्जसा नूनम् ॥

* * * *

व्या—तदेवमारभ्येदं काव्यमिदानीमारभ्यते ।
पूर्वं किल भूमिरियं सदा नवानीतिसाध्वसम्बाधम् ।
तिष्ठन्त्यथाभिपेदे सदानवानीतिसाध्वसं बाधम् ॥

व्या—किलशब्द ऐतिह्ये । पूर्वं कंसादीनामुत्पत्तेः प्राक् सदा सततं भूमिरियम् । नवा असुराद्युपद्रवरहितत्वेनाभिनवरूपा, शान्तिमती सती । अनीति उपद्रवरहितम् ।

End :

वर्षाण्यनवग्रहगतिजोषणमायन्तु सुजनानाम् ।
वर्षाण्यनवग्रहगतिजोषणमायन्तु सुजनानाम् ॥

एवमभिलषितकंसवधावधौ काव्येऽस्मिन् समापनीयेनाशीर्वादेन समापयितुमारभ्यते । वर्षाणि वृष्टयः ।

* * * *

मू—परमोऽक्षरो महीयान्नागाध्यासी स मे तु नरकान्तः ।
परमोक्षरो महीयान् नागाध्यासी समेतु नरकान्तः ॥

परमः पूज्यः अक्षरः क्षरणरहितः, अविकार इत्यर्थः । क्षरतेः पचाद्यजन्तस्य नञ्समासः । महीयान् महत्तरः । नागाध्यासी नागराजमनन्ताख्यमासीनः । सः उक्तविशेषणविशिष्टः मे मम । तुशब्दो विशेषं द्योतयति । नरकान्तः नरकाख्यस्यासुरस्यान्तभूतः परमोक्षरः परमुत्कृष्टं मोक्षं स्वानुभवरूपं प्रयच्छन् ।

* * * *

Colophon :

इति हरितकुलतिलकश्रीराममिश्रसोमसुत्सूनोः श्रीरङ्गराजदिव्याज्ञालब्धश्रीपराशरापरनामधेयस्य श्रीवत्साङ्कस्य कृतौ यमकरत्नाकरे महाकाव्ये तत्कृतौ यमकरत्नाकरव्याख्याने चोभयोरपि षोडशाश्वासः ॥

य(म)कानामाकरोऽयं कंसध्वंसकथा तथा ।
चकार चरितं कृत्स्नं श्रीवत्साङ्कः पराशरः ॥
कथमृच्छेत्काव्योत्थं यमकोपहतामतीव संयमने ।
क इहाविष्टां प्रीतिं यमकोपहतामतीव संयमने ॥
अतिरससादृश्यं ते न क्वचिदपि सूक्तयो यस्य ।
अतिरससादृश्यं ते पाठ्यमिदं तत्पाराशरं काव्यम् ॥
स्फुरन्नानारीतिव्यतिकरदशाभीषणमपि
प्रकृत्या कल्याणं गगनमिव गम्भीरमधुरम् ।
परिच्छेत्तुं बुद्ध्या क इव खलु रत्नाकरमिह
प्रगल्भो लोके स्यादपियमकरत्नाकरमपि ॥

यदाकारं चित्ते लिखितुमपि काव्यव्यसनिनं
परं क्लिश्यन्ते ते निपुणमतयोऽद्यापि कवयः ।
कवेः श्रीवत्साङ्कात्सुनिभृतपदं निर्गतवती
जयत्येषा यावद्भुवि यमकरत्नाकरमिति ॥

* * * *

श्रीवत्साङ्कमहं वन्दे श्रीरङ्गेशपदाश्रयम् ।
रामानुजार्यपादाब्जविन्यस्तात्ममरं सदा ॥

* * * *

रघुनाथपदाम्भोजविनिवेशितमानसम् ।
रामदूतमहं नौमि स्वामिकार्यधुरन्धरम् ॥

No. 11622. यमकरत्नाकरम्, सव्याख्यानम्.

YAMAKARATNĀKARAM WITH COMMENTARY.

Substance, Śrītāla. Size, 16¼ × 1⅞ inches. Pages, 178. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Nānārtharatnamālā 90*a*.

Breaks off in the fifth Āśvāsa.

Same work as the above.

No. 11623. यमकरत्नाकरम्.

YAMAKARATNĀKARAM.

Substance, palm-leaf. Size, 6¼ × 1½ inches. Pages, 213. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Same poem as the above.

No. 11624. यादवाभ्युदयम्.
YĀDAVĀBHYUDAYAM.

Substance, paper. Size, 10¾ × 8⅝ inches. Pages, 263. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good Appearance, new.

Contains the Sargas 1 (of which the last stanza is wanting), 3 to 5, 7 to 17 (which last breaks off with the 58th stanza), and 20 to 24.

A poem in 24 Sargas written by Vēṅkaṭanātha, well-known as Vēdāntadēśika, on the model of the Raghuvaṁśa of Kālidāsa and dealing with the stories and incidents relating to Kṛṣṇa from His birth, as found in the Harivaṁśa. This work has been printed partly.

Beginning:

श्रीमान् वेङ्कटनाथार्यः(. . .)सन्निधत्तां सदा हृदि ॥
वन्दे बृन्दावनचरं वल्लवीजनवल्लभम् ।
जयन्तीसंभवं धाम वैजयन्तीविभूषणम् ॥
यदेकैकगुणप्रान्ते श्रान्ता निगमवन्दिनः ।
यथावद्वर्णने तस्य किमुतान्ये मितंपचाः ॥
शक्त्या शौरिकथास्वादः स्थाने मन्दधियामपि ।
अमृतं यदि लभ्येत किं न गृह्येत मानवैः ॥
वसुधाश्रोत्रजे तस्मिन् व्यासे च हृदयस्थिते ।
अन्ये च कवयः कामं बभूवुरनपत्रपाः ॥
स कविः कथ्यते स्रष्टा रमते यत्र भारती ।
रसभावगुणीभूतैरलङ्कारगुणोदयैः ॥
तदात्वे नूतनं सर्वमायत्यां च पुरातनम् ।
न दोषायैतदुभयं न गुणाय हि कल्पते ॥
प्रवृत्तामनघे मार्गे प्रमाद्यन्तीमपि क्वचित् ।
न वाचमवमन्यन्ते नर्तकीमिव भावुकाः ॥
विहाय तदहं व्रीडां व्यासवेदार्णवामृतम् ।
वक्ष्ये विबुधजीवातुं वसुदेवसुतोदयम् ॥
क्रीडातूलिकया तस्मिन् कृपारूषितया स्वयम् ।
एको विश्वमिदं चित्रं विभुः श्रीमानजीजनत् ॥
अगद्यावे(ह्रा)दनो जज्ञे मनसस्तस्य चन्द्रमाः ।
परिपालयितव्येषु प्रसाद इव मूर्तिमान् ॥

यदपत्यसमुद्भूतः पुण्यकीर्तिः पुरूरवाः ।
सतामाहितवह्नीनां विहारस्थेयतां ययौ ॥
समवर्धत तद्वंश उपर्युपरि पर्वभिः ।
यशोमुक्ताफलैर्यस्य दिशो दश विभूषिताः ॥
नहुषः समभूत्तस्मिन्नैरावत इवाम्बुधौ ।
यमिन्द्रविगमे देवाः पदे तस्य न्यवीविशन् ॥
नरेन्द्रास्तस्य वीरस्य नामचिह्नैरलङ्कृताः ।
जङ्गमाः पृथिवीचक्रे जयस्तम्भा इवाभवन् ॥

* * * *

वीरो रस इवोत्साहान्नहुषादप्यजायत ।
ययातिर्नाम येनैन्द्रमर्धासनमधिष्ठितम् ॥

* * * *

यदुर्नाम ततो जज्ञे यत्सन्ततिसमुद्भवैः ।
समानगणनालेख्ये नि(नि)स्समानैर्निषद्यते ॥

* * * *

वंशे समभवत्तस्य वसुदेवः क्षितीश्वरः ।
जनकः प्राग्भवे योऽभूद्देवदानवयूथयोः ॥
आनकानां च दिव्यानां दुन्दुभीनां च निस्वनैः ।
सह जातं तमाचख्युराख्ययानकदुन्दुभिम् ॥

End:

आसीदेवं परिणतमयि(यी) द्वारका द्वापरान्ते
व्यासप्रख्या विभजनभवद्वेदशाखोपमानम् ।
चिन्तातीतं यदुपतिमनःप्रीतिचिन्तामणीना-
मेकं तासां नवरसभुजां भाग्यमेकातपत्रम् ॥
गुरुभिरनघचित्तैराहितोदारभूमा सुरहितरसमेतत्सूनृतं वेङ्कटेशः ।
व्यतनुत यदुवीरप्रीतिमिच्छन् प्रभूतां कविकथकमृगेन्द्रः क्षेमदं [काव्यरत्नम् ।

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु यादवाभ्युदये काव्यरत्ने चतुर्विंशः सर्गः ॥

No. 11625. यादवाभ्युदयम्.
YĀDAVĀBHYUDAYAM.

Substance, palm-leaf. Size, 16½ × 1¼ inches. Pages, 202. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Contains the Sargas 1 to 16 and 58 stanzas only of the 17th Sarga.

Same work as the above.

No. 11626. यादवाभ्युदयम्.
YĀDAVĀBHYUDAYAM.

Substance, palm-leaf. Size, 13 × 1¼ inches. Pages, 100. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

A number of stray leaves, the left hand corners of which are completely injured.

These contain, roughly speaking, the Sargas 17 (from the 57th stanza) to 24.

Same work as the above.

No. 11627. यादवाभ्युदयम्.
YĀDAVĀBHYUDAYAM.

Substance, palm-leaf. Size, 14⅝ × 1⅝ inches. Pages, 72. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the Sargas 20 to 24.

Same work as the above.

No. 11628. यादवाभ्युदयम्, सव्याख्यानम्.
YĀDAVĀBHYUDAYAM WITH COMMENTARY.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 92. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new.

Contains the first Sarga complete.

Same poem as the above, followed by a commentary of Appayadīkṣita, son of Raṅgarājādhvarin of Bhāradvājagōtra.

Begnining:

वन्दे वृन्दावनचरं वल्लवीजनवल्लभम् ।
जयन्तीसम्भवं धाम वैजयन्तीविभूषणम् ॥

तत्र तावत् शास्त्रेण वा (आशीर्नमस्क्रिया)वस्तुनिर्देशेन वा(शो वापीति) शास्त्रमनुसृत्य विशिष्टेष्टदेवतानमस्कारलक्षणं मङ्गलमारचय्य प्रथमश्लोकेन निबध्नाति—वन्द इति। बृन्दावनं नाम मथुरोपकण्ठे वनविशेषः। तत्र (चरतीति) बृन्दावनचरम्। चरेष्ट इति टप्रत्ययः। तत्पुरुषे कृति बहुलमित्यलुग्विधानस्य बाहुलकत्वात् सुपो लुक्। वल्लव्यः गोपजातीयाः स्त्रियः। वल्लवशब्दाज्जातिलक्षणो ङीष्। वल्लव्य इति जनाः वल्लवीजनाः इति कर्मधारयः। स्त्रीलिङ्गस्य परनिमित्तस्याभावात् (पुंवत्)कर्मधारयेत्यादिना वल्लवीशब्दस्य न पुंवद्भावः। तेषां वल्लभम् "सत्यवा(गा)र्जवरतिरूपं(तैरुप)कुर्वन् प्रियं वदनत्(न्)। भजते यः स्वयं प्रीतः प्रियः स भवति स्त्रियः॥" इत्युक्तलक्षणं प्रि(य)म्। "दयितं वल्लभं प्रियम्" इत्यमरः। जयन्ती रोहिणीसहिता श्रवणमासस्य कृष्णाष्टमी। "जयं पुण्यं च तनुते जयन्तीं तेन तां (विदुः)" (इति पौरा)णिकैर्निरुक्ता। पृषोदरादित्वात्साधुः। तस्यां (संभवं प्रादु)र्भूतम्। भवतेः पचाद्यच्; कजायः (अज्विधिः) सर्वधातुभ्य इति वचनात्। सप्तमीति योगविभागात्समासः। वैजयन्ती वनमाला। सा विभूषणं यस्य तथाभूतं धाम स्वप्रकाशज्योतिर्मयं वस्तु वासुदेवाख्यं वन्दे प्रणमामीति योजना। वन्द इति वर्तमाननिर्देशः स्ववन्दनस्य सदानुवृत्तिपरः। न तु प्रबन्धारम्भसमये वर्तमानत्वमात्रप्र(रः), सङ्कोचे हेत्वभावात्।

End:

साधूनां स्वपदसरोजषट्पदानां धर्मस्य स्थितिमनघां विधातुकामः।
यद्गर्भे जगदखिलं स एव गर्भो देवक्याः समजनि देवदेववन्द्यः॥

साधूनामिति। अखिलं जगत् यद्गर्भे यस्य कुक्षिस्थम्। "कुक्षौ कुक्षिस्थिते जन्तौ" इति नानार्थे वैजयन्ती।

* * * *

संज्ञापूर्वकविधित्वेन वृद्धिशास्त्रस्यानित्यत्वात्। स्वपदसरोजेत्यत्र परम्परितरूपकालङ्कारः। प्रहर्षणी वृत्तमेतत्॥

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु व्यासवेदार्णवामृते यादवाभ्युदये काव्यरत्ने प्रथमः सर्गः॥

No. 11629. यादवाभ्युदयम्, सव्याख्यानम्.
YĀDAVĀBHYUDAYAM WITH COMMENTARY.

Substance, paper. Size, 11 × 8⅝ inches. Pages, 397. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains the commentary on the Sargas 13 and 14 with text and 16 to 18 without text.

Same work as the above.

See under the previous number for the beginning.

End:

मू—बाणाभिख्यं बलिसुतमथो बद्धबन्धुं जिगीषुः
सेनोत्थानं सुमहति पुरे श्वस्तनं घोषयित्वा ।
चिन्तारूढत्रिभुवनहितश्चिन्तनीयो मुनीनां
वासागारं प्रभुरधिगतो वासतेयीं निनाय ॥

व्या – बाणेति । अथो अनन्तरम् । बद्धो बन्धुरनिरुद्धो येन तं बाणाभिख्यं बाणनामानं बलेः सुतं जिगीषुः जेतुमिच्छुः, चिन्तारूढत्रिभुवनहितः सदा त्रैलोक्यहितं ध्यायन्, मुनीनां चिन्तनीयः प्रभुः सुमहति अतिविशाले पुरे श्वस्तनं परेद्युः भावि सेनोत्थानं सेनायाः प्रयाणसन्नाहं घोषयित्वा वासागारमधिगतः शयनगृहं प्राप्तः सन् वासतेयीं निनाय रात्रिमतिवाहयामास । "वसतिर्वासतेयी च श्यामा रात्रिश्च कथ्यते" इति हलायुधः । श्वस्तनमिति श्वस्शब्दात् सायंचिरंप्राह्ण इत्यादिना ट्युल्प्रत्ययः तुडागमश्च ॥

Colophon:

मू—

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य श्रीवेदान्ताचार्यस्य कृतिषु यादवाभ्युदये काव्यरत्ने अष्टादशः सर्गः ॥

Colophon:

व्या—

इति श्रीमद्भरद्वाजकुलतिलकविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनुना अप्पयदीक्षितेन विरचिते श्रीयादवाभ्युदयव्याख्याने अष्टादशः सर्गः ॥

No. 11630. यादवाभ्युदयम्, सव्याख्यानम्.
YĀDAVĀBHYUDAYAM WITH COMMENTARY.

Substance, paper. Size, 11 × 8¼ inches. Pages, 247. Lines, 120 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the Sargas seven to ten.

Same work as the above.

No. 11631. यादवाभ्युदयम्, सव्याख्यानम्.

YĀDAVĀBHYUDAYAM WITH COMMENTARY.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 38. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the eighth Sarga (without the first Stanza) and two stanzas in the ninth Sarga

Same work as the above.

No. 11632. यादवाभ्युदयम्, सव्याख्यानम्.

YĀDAVĀBHYUDAYAM WITH COMMENTARY.

Substance, palm-leaf. Size 17⅞ × 1⅛ inches. Pages, 60. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the first Sarga only complete.

Same work as the above.

The former owner of the MS. is said to be one Rājagōpālan.

No. 11633. यादवाभ्युदयम्, सव्याख्यानम्.

YĀDAVĀBHYUDAYAM WITH COMMENTARY.

Substance, palm-leaf. Size, 17½ × 1⅝ inches. Pages, 132. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Contains the Sargas three, five, and seven complete, but wants many leaves in the middle.

Same work as the above.

No. 11634. युधिष्ठिरविजयम्.

YUDHIṢṬHIRAVIJAYAM.

Substance, palm-leaf. Size, 15⅛ × 1⅝ inches. Pages, 158. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new.

Complete in eight Āśvāsas.

The poem begins with a description of the hunting sport of Pāṇḍu in the forest and narrates the chief events leading to the regaining of the kingdom by Yudhiṣṭhira after defeating the Kauravas in the battle field. The stanzas of the poem afford good illustrations of the figure of speech known as Yamaka. By Vāsudēva, a native of the Kērala country and a disciple of Bhārataguru, a resident of Viprasattama village (Pāpānallūr?) and a teacher of the Vēdas, at the time of the King Kulaśēkhara. The stanzas appear in the form of Padavibhāga, i.e., the words simple and compound comprising the stanzas are written without Sandhi (euphony).

Beginning:

काश्यपोऽत्रिर्वसिष्ठश्च विश्वामित्रोऽथ गौतमः ।
जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृता(ः) ।

[शस्तिम् । इताम् ।
प्रदिशतु । गिरिशः । स्तिमिताम् । ज्ञानदृशम् । वः । श्रियम् । च । गिरि।
प्रशमितपरमदमायम् । सन्तः । सञ्चिन्तयान्ति । परमदमाः । यम् ॥ १ ॥
यः । वा । मन्दरवपुषम् । ममर्द । मातङ्गवरम् । अमन्दरवपुषम् ।
कान्ताम् । च । आप । धरात् । यः । क्षपितः । येन । अङ्गजः । अपि ।
[चापधराद्यः ॥ २ ॥
शिरसाम् । सकले । शकले । स्खलिता । सरिताम् । वरा । च । सकलेशकले ।
यस्य । च । कोटीरम् । इता । स्फुटम् । विबभ्राम । वर्षकोटीः । आमेताः ॥
अस्ति । सः । गजराजगतिः । राजवरः । येन । गतशुक् । अजरा । जगती ।
भीषणम् । अधिकम् । कवयः । स्तुवन्ति । जन्यम् । यदीयम् । अधिकङ्कवयः ॥
तरवः । भूरिच्छायाः । समानफलदायिनी । च । भूः । इच्छायाः ।
सविना(न)यशोभा । जनता । यद्राज्ये । यस्य । भुवि । यशोभाजनता ॥
तस्य च वसुधामवतः काले कुलशेखरस्य वसुधामवतः ।
वेदानामध्यायी भारतगुरुरभवदाद्यनामध्यायी ॥
यं प्राप रमा चार्यं देवी च गिरां पुराणपरमाचार्यम् ।
यमशुभसन्तोदान्तं परमेश्वरमुपदिशन्ति सन्तो दान्तम् ॥
ज्ञानसमग्रामेयं निवसन्तं विप्रसत्तमग्रामे यम् ।
तिलकं भूमावाहुः यस्यार्थिषु दत्तभूतिभूमा बाहुः ॥
समजनि कश्चित्तस्य प्रवणः शिष्योऽनुवर्तकश्चित्तस्य ।
काव्यानामालोके पटुमनसो वासुदेवनामा लोके ॥
कीर्तिमदभ्रां तेन स्मरता भारतसुधामदभ्रान्तेन ।
जगदुपहासाय मिता पार्थकथा कल्मषापहा सा धीमता ॥
अथ मृगराजद्विपिनं प्रविश्य पाण्डुर्गिरिं विराजद्विपिनम् ।
मृगयासङ्गरसेन स्वैरं व्यहरज्जितारिसङ्गरसेन ॥
यं नरदेवं शस्यस्वमातृवचनेन सम्पदे वंशस्य ।
मुनिवर्योऽजनयत्तं भ्रातृकलत्रे जगत्प्रयोजनयत्नम् ॥

तेन शरेणाकारि व्यसु मुनिमिथुनं गतायुरेणाकारि ।
तत्र यमाभो गहनं शापं मुनिरमुचदसुसमाभोगहनम् ॥

* * * *

मुदितविनायकमित्रा सेत्युक्त्वा चोदितार्चनाय कामित्रा ।
यमपवमानमघोनां पूजामाधत्त सबहुमानमघोनाम् ॥
धर्मात् परमत्यन्तं युधिष्ठिरं नाम धर्मपरमत्यन्तम् ।
भीमं च मरुत्तनयं पार्थं शक्रादवाप च मरुत्तनयम् ॥
मुदितमना देवाभ्यामश्विभ्यां तदनुशासनादेवाभ्याम् ।
सुललितमितराजनयन्नकुलं सहदेवमनुजमितराजनयम् ॥

* * * *

Colophon:

इति युधिष्ठिरविजये प्रथमाश्वासः ॥

End:

वसुधान्यवतीम् । वशयन् । वसुधाम् । परमम् । हयमेध[न]म् । अ(न)ल्परमम् ।
सहितो यजनाभिमुखैः । सहितः । महितम् । विततान । निकामहितम् ॥१००॥
सुखेन । नागा(ग)साह्वये । पुरे । अवसत् । सः । भारतः ।
ररक्ष । गाम् । पुरूरवाः । पुरा । इव । सत्सभारतः ॥ १०१ ॥

Colophon:

इति युधिष्ठिरविजये अष्टम आश्वासः ॥

No. 11635. युधिष्ठिरविजयम्, सव्याख्यानम्.
YUDHISTHIRAVIJAYAM WITH COMMETARY.

Substance, paper. Size, 10¾ × 8⅜ inches. Pages, 259. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the Āśvāsas one, seven and eight only.

The same work as the above, but together with a commentary thereon. The author of the commentary is Śokkanātha, son of Āccī Ambā and Sudarśanabhaṭṭa of Bhāradvājagōtra and a disciple of Hastigiribhaṭṭa of Vatsagōtra. He lived in Śattanūr village, a place near Śri-

rangam, and had an elder brother named Rāmacandrabhaṭṭa, skilled in the investigation of the meaning of the Smṛtis, such as Manusmṛti, etc.

The commentary is called Bālavyutpattikāriṇī.

Beginning:

हस्तैरङ्कुशपाशमोदकरदं देदीप्यमानान्सदा
बिभ्राणं कमपि प्रभासमुदयं सर्वार्थसिद्ध्यै भजे ।
यं पश्यन् सततं गलन्मदतया हस्ती किमन्यादृशः
किं वा हस्तिपकोऽयमङ्कुशधृतेरित्यद्भुतं बुध्यते ॥

बिभ्रन् मालां सगरतनय(यान्)प्रीणयित्रीं किरीटे
रेखां काञ्चित् कुमुदसुभगंभावुकामप्यजस्रम् ।
अङ्के कुर्वन् गिरिवरकुलश्लाघनीयामभिख्यां
भूमा कश्चित् कलयतुतरामन्तरानन्दसिन्धुम् ॥

यो वत्सान्वयवार्धिकौस्तुभमणिर्यश्चन्द्रचूडार्चन-
ध्यानस्तोत्रनमस्क्रियाद्यविकलव्यापारसर्वङ्कषः ।
यश्चाम्नायपुराणनाटककलावैदग्ध्यवासैकभू-
स्तस्मै हस्तिगिरीश्वराख्यगुरवे कुर्वेऽञ्जलिं सादरम् ॥

सह्याद्रिप्रभवा समुद्रदयिता सर्वाघसङ्घापहा
शम्भुस्थानसहस्रभूषिततटा श्रीरङ्गनाथाश्रिता ।
कावेरी परितो विभात्यतितरां यं शात्तनूराभिधं
ग्रामं सर्वकलाधुरीणसुजनं श्रीचोलभूभूषणम् ॥

तस्मिन् सोमकलावतंसचरणध्यानैकतानात्मनो
भारद्वाजकुलाब्धिशीतमहसश्चक्राह्वयं बिभ्रतः ।
छन्दोगप्रवरस्य चारुकवितासञ्जातकीर्तेः सतः
पुत्रः पुण्यगुणाग्रणीर्निवसति श्रीशोकनाथः सुधीः ॥

शान्तिः किन्नु शरीरिणी किमु दया कूलङ्कषा देहभाक्
शुद्धिर्मूर्तिमती तथा किमथ वा लक्ष्मीरुमा वेति च ।
आख्याता जनताभिरादरभरात्तत्तद्गुणानां गणैः
आच्चीनामवली जयत्यतितरां यस्य प्रसूर्भूतले ॥

मन्वादिधर्मशास्त्राणामर्थालोचनकोविदः ।
यस्याग्रजो रामचन्द्रभट्ट इत्यतिविश्रुतः ॥

भावाद्यलङ्कृतिरसध्वनिभासमानं धर्मार्थमोक्षफलभारतबद्धसख्यम् ।
द्राक्षातिशायिरसवद्यमकप्रभेदं श्रीवासुदेवकलितं भुवि काव्यमिन्धे ॥
गाम्भीर्यास्पदवाच्यवाचकतया व्याख्यापथागोचरं
काव्यं मद्विषणा तु मान्द्यविभवप्राचुर्यपाथोनिधेः ।
व्याख्यातुं प्रयते तथापि तदिदं हा हन्त हन्ताधुना
साध्यासाध्यविवेकशून्यहृदयः सर्वत्र संनह्यति ॥
कृतेन विद्वत्कलितेन नूनं व्याख्या मदीया बहुमानपात्रम् ।
रन्ध्रेण किं वा कृतिना कृतेन न जायते दिव्यमणी गुणाढ्या ॥
व्याख्या मदीया नितरामहृद्याप्याद्या भवेत्प्रीतिकरी भवित्री ।
अव्यक्तभाषाकलनं प्रकामं शिशोर्मनोहारि न किं गुणानाम् ॥
पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना ।
आक्षेपोक्तेः समाधानं व्याख्यानं पञ्चलक्षणम् ॥

इत्यभियुक्ताः ।

अस्यान्वयमुखेनैव पदानां विवृतिं परम् ।
विधत्ते शोकनाथोऽयं बालव्युत्पत्तिकारिणीम् ॥

अथ कथं काव्यमुपादेयं येन तत्र प्रवृत्तिः सफला स्यात् । काव्यमुपादेयं[न] भवतीत्युच्यते । [ते]न तावन्मृषा(ऋषि)प्रणीतत्वाभावादनुपादेयत्वम् । वाल्मीकिबोधायनप्रमुखैर्महर्षिभिरपि काव्यस्य प्रणयनात् । नापि पुरुषप्रणीतत्वात्, शास्त्रनिबन्धनानामपि तथात्वेनानुपादेयत्वप्रसङ्गात् । नापि काव्यत्वादनुपादेयत्वम् ।

* * * *

तस्मात् दृष्टादृष्टफलतया काव्यमुपादेयमेव । ततश्च काव्यकरणं सफलमेवेति निश्चित्य वासुदेवनामा केरलीयः कविः कीर्तिकामनयैव काव्यकरणे प्रवृत्तः । कीर्तिमदभ्रान्तेनेति वक्ष्यमाणपद्येन स्वकाव्यस्य कीर्तिरेव प्रयोजनमिति वक्ष्यन् सन् "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" मित्याचार्यदण्डिवचनादादावाशिषमाह ।

मूल—प्रदिश(. . . .)परमदमा यम् ॥

व्या—प्रदिशत्विति । परमदमाः परमः उत्तमः दमः इन्द्रियनिग्रहः तादृशाः । परमः श्रेष्ठ उत्कृष्टे इति निगमः । दम इन्द्रियनिग्रह इति केशवः ।

* * * *

Colophon :

इति वासुदेवविरचिते युधिष्ठिरविजये प्रथमाश्वासः ।

कविः काव्यनामकथनपूर्वकमाश्वाससमाप्तिमाह—इतीति । इति एवंप्रकारेण; इति हेतुप्रकर्षादिसमाप्तिष्विति अमरः । युधिष्ठिरविजय इति काव्यनाम । आश्वासः सर्गपर्यायः मात्रावृत्तनिबन्धन इत्यभियुक्ताः । अथावा(श्वा)सो विश्रमे त(था) । ग्रन्थावच्छेदभेदे च काव्यादीनां प्रकीर्तितः इति केशवः ।

भारद्वाजान्ववायेन शोकनाथेन सूरिणा ।
व्याख्याताः सप्तनवतिश्लोकाः शोभाकृतः कृतेः ॥

इति भारद्वाजकुलतिलकच्छन्दोगप्रवरसुदर्शनभट्टात्मजेन आच्चियम्बागर्भसंभवेन मन्वादिस्मृतिमर्मज्ञ

* * * *

Colophon :

इति श्रीभारद्वाजकुलतिलकच्छन्दोगप्रवरसुदर्शनभट्टात्मजेन आच्चियम्बागर्भसंभवेन मन्वादिस्मृतिमर्मज्ञरामचन्द्रभट्टानुजेन हस्तिगिरिभट्टशिष्येण शात्तनूरग्रामवासिना शोकनाथेन विरचितायां बालव्युत्पत्तिकार्या(रिण्या)ख्यायां युधिष्ठिरविजयव्याख्यायां सप्तमाश्वासः ॥

End :

षट्त्रिंशद्वर्षं रक्षितवान् । युधिष्ठिरस्यायुरष्टोत्तरशतमिति ज्ञेयम् । अत्रोपमानोपमेयसत्त्सभारतत्वरूपसाधारणधर्मेवशब्दानां चतुर्णामुपादानात् पूर्णा श्रौत्युपमा । वृत्तं प्रमाणिकाख्यम् ॥

एकाधिकशतश्लोकानष्टमाश्वासभाषितान् ।
यथाविधि व्याकृतवान् शोकनाथसुधीमणिः ॥

* * * *

युधिष्ठिरो युद्धसमये द्विसप्ततिवयाः ।

Colophon :

इति भारद्वाजकुलतिलकश्रीसुदर्शनभट्टात्मजेन आच्चियम्बागर्भसंभवेन मन्वादिस्मृतिमर्मज्ञरामचन्द्रभट्टानुजेन हस्तिगिरिभट्टशिष्येण शात्तनूरग्रामवासिना शोकनाथेन विरचिता बालव्युत्पत्तिकार्या(रिण्या)ख्या युधिष्ठिरविजयव्याख्या समाप्ता ॥

अष्टाश्वासे निगदितान् सप्तत्रिंशत्समन्वितान् ।
व्याख्यन्नवशतश्लोकान् शोकनाथो यथामति ॥

प्रथमाश्वासश्लोकाः	...	...	...	...	९७
द्वितीया-	,,	...	...	...	१२०
तृतीया-	,,	...	...	...	११३
चतुर्थी-	,,	...	...	...	९७
पञ्चमा-	,,	...	...	...	११०
षष्ठा-	,,	...	...	...	१५४
सप्तमा-	,,	...	...	...	१४६
अष्टमा-	,,	...	...	...	१०१
				आहत्य ...	९३८

No. 11636. रघुवंशम्.

RAGHUVAṀŚAM.

Substance, paper. Size, $13\frac{7}{8} \times 5\frac{5}{8}$ inches. Pages, 193. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new. Contains the Sargas 1 to 19.

A well-known Mahākāvya describing the chief incidents in the life of the kings that reigned in the line of the Raghu dynasty: by Kālidāsa.

Beginning:

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥
क सूर्यप्रभवो वंशः क चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥
मन्दः कवियशःप्रार्थी गमिष्याम्यपहास्यताम् ।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ॥
अथ वा कृतवाग्द्वारे वंशेऽस्मिन्पूर्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥
सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम् ।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ॥
यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम् ।
यथापराधदण्डानां यथाकालप्रबोधिनाम् ॥

त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम् ।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥
शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥
रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥
तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥
वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ।
आसीन्महीभृतामाद्यः प्रणवश्छन्दसामिव ॥
तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेन्द्र इन्दुः क्षीरनिधाविव ॥

End:

तस्यास्तथाविधनरेन्द्रविपत्तिशोका-
दुष्णैर्विलोकनजलैः प्रथमाभितप्तः ।
निर्वापितः कनककुम्भमुखोद्धृतेन
वंशाभिषेकविधिना शिशिरेण गर्भः ॥
तं भूत्यर्थं प्रसवसमयाकाङ्क्षिणीनां प्रजाना-
मन्तर्गूढं क्षितिरिव नभोबीजमुष्टिं दधाना ।
मौलैः सार्धं स्थविरसचिवैर्हेमसिंहासनस्था
राज्ञी राज्यं विधिवदशिषद्भर्तुरव्याहताज्ञा ॥

Colophon:

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ एकोनविंशतितमः सर्गः ॥

No. 11637. रघुवंशम्.

RAGHUVAMŚAM.

Substance, palm-leaf. Size, 14 × $1\frac{1}{8}$ inches. Pages, 182. Lines, 5 on a page. Character, Telugu and Grantha. Condition, injured. Appearance, old.

Contains the Sargas one to nine, but the second Sarga is found in triplicate.

Same work as the above.

No. 11638. रघुवंशम्.
RAGHUVAṀŚAM.

Substance, palm-leaf. Size, 12¾ × 1⅝ inches. Pages, 66. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains the Sargas one, two, nine, and 44 stanzas in the seventh Sarga.

Same work as the above.

This MS. is said to have been copied by Gōvinda and completed on the 5th day of the bright fortnight of the Jyēṣṭha month in the year Citrabhānu.

No. 11639. रघुवंशम्.
RAGHUVAṀŚAM.

Begins on fol. 1*a* of the MS. described under No. 11835.

Complete.

By Vāsudēva. This is the poem referred to in the Kōkilasandēśa—vide No. 11835 *ante*.

Beginning :

हर्म्ये रम्ये बहुलविलसच्चन्द्रिकायां निशायां
मन्दं नन्दत्कुमुदसुरभौ शीतले वाति वाते ।
लोलापाङ्ग्या मनसिजकलाखेलनायासिताङ्ग्या
साकं निद्रां सुकृतिसुलभां कोऽपि कामी सिषेवे ॥

तं निद्राणं मदनविवशा काचिदालक्ष्य यक्षी
हस्ते धृत्वा मलयशिखरे हन्त रन्तुं प्रयान्ती ।

स्यानन्दूरे निजपतिमुपायान्तमालोक्य भीता
विन्यस्यैनं क्वचन विमनास्तेन सार्धं प्रयाता ॥

* * * *

मा मा सीद प्रियजनवियोगामयात्कामयाना
यक्षी सौधादपहृतवती प्रस्वपन्तं भवन्तम् ।
कान्ता श्रान्तापि च तव सखे नापदं प्रापदन्यां
तद्गन्तव्यं द्रुतमिति दिवः शुश्रुवे तेन वाणी ॥
आकर्ण्यासौ गिरममृतनिष्यन्दिनीमाधिमन्दोऽ-
प्यन्तर्धैर्याङ्कुरमधिवहन् गन्तुमुद्युक्तचेताः ।
प्राप्तां मूर्च्छद्विरहिमिथुनां माधवीं वीक्ष्य लक्ष्मी-
मार्तो भृङ्गं कमपि पुरतो वीक्ष्य मन्दं बभाषे ॥

End:

इत्थङ्कारं त्वयि विनिहिते सूक्तिपुष्पोपहारैः
दीनामश्वत्प्रियसहचरीं भ्रातरामोदयेथाः ।
किन्त्वस्माकं स(म)मुपगतं पूर्वमेकत्र यात्रां
नैवेच्छामि प्रियसखि न चेद्दस्ति कार्यातिपातः ।
आपन्मित्रं मम हरिपदाम्भोजभक्तं दयालुं
त्वामाराध्य व्यसनविततिः स्पन्दतां दूरदूरे ।
भूयादेवं प्रियसख पुनर्दर्शनायावियोगः
स्वप्नेऽपि स्याद्भवतु युवयोः सर्वमाङ्गल्यलक्ष्मीः ॥

Colophon:

इति भृङ्गसन्देशः समाप्तः ॥

सन्देशेऽस्मिन् कथमपि गुरुश्रीपदाम्भोजयुग्म-
ध्यानोद्भूतप्रबलतमसा वासुदेवेन बद्धे ।
पूर्णैर्दो(र्णे दो)षैरपि यदि गुणानां कणाः संप्रथेर-
न्नेतान् प्रीत्या मनसि परिगृह्णन्तु सन्तो महान्तः ॥

No. 11866. मणिमञ्जरी.

MAṆIMAÑJARĪ.

Pages, 20. Lines, 5 on a page.

Begins on fol. 78*a* of the MS. described under No. 3529.

Breaks off in the eighth stanza of the third Sarga.

This is a short poem of which a commentary is described under R. No. 1083 of the Triennial Catalogue of MSS., Vol. II. By Nārāyaṇa-Paṇḍitācārya, son of Trivikrama-Paṇḍitācārya.

Beginning:

वन्दे गोविन्दमानन्दज्ञानदेहं पतिं श्रियः ।
श्रीमदानन्दतीर्थार्यवल्लभं परमक्षरम् ॥
ससर्ज भगवानादौ त्रीन् गुणान् प्रकृतेः परः ।
महत्तत्वं ततो विष्णुः सृष्टवान्ब्रह्मणस्तनुम् ॥
महत्त(त्त्वा)दहङ्कारं ससर्ज शिवविग्रहम् ।

* * *

निकुक्षिः समभूत्तस्य पुरञ्जयपुरोगमाः ।
बभूवुर्भगवद्भक्तास्तपोज्ञानपरायणाः ॥
तस्मिन् वंशे दशरथो बभूवात्यन्तभाग्यवान् ।
सोऽर्चन् वैमानिकं विष्णुं ररक्ष महतीं महीम् ॥
तस्मिन् काले सुराः सर्वे महाराक्षसपीडिताः ।
दुग्धाब्धिशायिनं विष्णुं शरण्यं शरणं ययुः ॥
त आदिष्टाः श्रियः पत्या जज्ञिरे क्षितिमण्डले ।
शाखामृगादिभावेन हनूमान् मारुतोऽभवत् ॥
अभयाय सतां हत्यै राक्षसानां ततो हरिः ।
रामनामा दशरथात् कौसल्यायामजायत ॥
ततो लक्ष्मणशत्रुघ्नौ सुमित्रायां बभूवतु. ।
कैकेय्यां भरतो जज्ञे सदा शुभरतो नृपात् ॥

* * * *

Colophon:

इति श्रीमत्कविकुलतिलकश्रीमत्रिविक्रमपण्डिताचार्यसुतश्रीमन्नारायण-पण्डिताचार्यविरचितायां मणिमञ्जर्यां प्रथमः सर्गः ॥

* * * *

तेषां मोक्षपदं दत्वाभ्यनुज्ञाप्य मरुत्सुतम् ।
राघवः सीतया सार्धं विवेश स्वं परं पदम् ॥
सत्येन भक्त्या च विरक्तिमत्या मत्या च धृत्या च तपस्यया च ।
हा राम रामेति सदोपगायन् प्राञ्जनी(नि)ःकिम्पुरुषेषु रेमे ॥

Colophon:

इति (. . .) द्वितीयः सर्गः ॥

हिमांशोरात्रिपुत्रस्य बुधो नाम सुतोऽभवत् ।
पुरूरवा महाराजस्तस्य पुत्रो व्यजायत ॥

* * *

भूभारक्षपणापे(क्षाः) तस्मिन्काले दिवौकसः ।
दुग्धाब्धिशायिनं देवमुपेत्य शरणं ययुः ॥ ७ ॥
विप्रक्षत्रादिभावेन तेनादिष्टाः सुरादयः ।
बभूवुर्भगवत्सेवां विदि(धित्सन्तः समस्तशः) ॥

No 11867. मणिमञ्जरी, बालमनोरमाव्याख्यासहिता.

MAṆIMAÑJARĪ WITH THE COMMENTARY BĀLAMANŌRAMĀ.

Substance, palm-leaf. Size, 16⅛ × 1¼ inches. Pages, 35. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the first two Sargas.

The text is the same as the above and the commentary, called Bālamanōramā, is by Anantācārya, son of Jammi Bhavanāśyācārya and disciple of Vēṅkaṭācārya, son of Timmaṇārya. The author's maternal grandfather was Ciṇḍi Vēṅkaṭācārya.

Beginning :

वन्दे वन्दारुमन्दारमम्मन्दानन्दमन्दिरम् ।
गोविन्दमिन्दिरानन्दकन्दलं लोकसुन्दरम् ॥

रामं रामवरश्रेष्ठं कृष्णं पाण्डववल्लभम् ।
व्यासं चानन्दतीर्थार्यप्रियबन्धुमहं भजे ॥

मतिमन्दरमन्थेन मि(वि)मथ्यागमसागरम् ।
यः सुधां सुप्रधा लेभे तं जयार्यहरिं भजे ॥

श्रीतिम्मणार्यदुग्धाब्धिलब्धजन्मा गवां निधिः ।
वेङ्कटाचार्यचन्द्रो मे लसतां हृदयाम्बरे ॥

आन(न्द)तीर्थतीर्थाब्धिनित्यसेवासुदीक्षितान् ।
श्रीचिण्डिवेङ्कटाचार्यान्वन्दे मातामहान्मम ॥

श्रीजम्मिभवनाश्यार्यसूनुनानन्तशायिना ।
क्रियते मणिमञ्ज(र्या)ष्टीका बालमनोरमा ॥

अथ तत्रभवान् श्रीमा(म)दानन्दतीर्थभगवत्पादाचार्यप्रियान्तेवासिक-
विकुलतिलकश्रीमत्रिविक्रमपण्डिताचार्यसु[illegible]नारायणपण्डिताचार्यवर्यः श्री-

शतु(मत)सकलमनोरञ्जनीं श्रीहरिगुरुचित्रचरितप्रगुणमणिमञ्जरीं कर्तुकामस्तस्या निर्विघ्नपरिसमाप्तये अविगतिशिष्टाचारपरम्पराप्राप्तं श्रीपतिन(म)स्तु(स्कृ)-तिरूपं मङ्गलं विधाय शिष्यशिक्षा(यै) ग्रन्थादौ निबध्नाति—वन्द इति ॥

वन्दे गोविन्दमानन्दज्ञानदेहं पतिं श्रियः ।
श्रीमदानन्दतीर्थीयवल्लभं परमक्षरम् ॥

अहं गोविन्दं वन्द इत्यन्वयः । वदि अभिवादनस्तुत्योरिति धातोः स्तौमि नमामि चेत्यर्थः ।

* * * *

Colophon:

इति श्रीमणिमञ्जरीव्याख्यायां बालमनोरमाख्यायां श्रीजम्मिभवनाश्याचार्याणां पुत्रेण श्रीकौविदिवेङ्कटाचार्यात्रिव(र्यप्रिय)शिष्येणानन्तेन विरचितायां प्रथमः सर्गः ॥

End:

प्रभञ्जनस्य वायोरपत्यं पुमान् प्राभञ्जनिर्हनूमान् । हे राम सर्वमनोहर । रामः सर्वाभिरामत्वादित्युक्तेः । हे राम हा सुखमिति । उप समीपे गायन् सन् एते रामो रूपान्तरेण हतस्य आकल्पक्रीडानादिति । इन्द्रवज्रा वृत्तम् । लक्षणं तूक्तम् ॥

Colophon:

दिव्यश्रीमणिमञ्जरीसमाभिधश्रीकाव्यसम्बन्धिनी
टीका बालमनोरमा शामिकुलीनानन्तनाम्ना कृता ।
श्रीमत्कीरिगिवेङ्कटार्यचरणाम्भोजद्विरेफत्विषा
तस्यां सत्कृपया समाप्तिमगमत्सर्गो द्वितीयो गुरोः ॥

इति श्रीमणिमञ्जरीटीकायां श्रीमद्भवनाश्याचार्याणां पुत्रेणानन्तेन विरचितायां बालम्या(मनो)रमाख्यायां द्वितियः सर्गः ॥

No. 11868. मुनिसुव्रतकाव्यम्.
MUNISUVRATAKĀVYAM.

Substance, paper. Size, 11 × 8½ inches. Pages, 65. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete in ten Sargas.

Same work as that described under R. No. 348(*a*) of the Triennial Catalogue of MSS., Vol. I.

No. 11869. मेघसन्देशः.
MEGHASANDEŚAḤ.

Pages, 216. Lines, 20 on a page.

Begins on fol. 407*a* of the MS. described under No. 1800.

Complete.

The well-known descriptive and lyrical poem in two Sargas of Kālidāsa.

Beginning:

कश्चित्कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तं गमितमहिमा वर्षभोग्येण भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥
तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः ।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥

End:

श्रुत्वा वार्तां जलदकथितां तां धनेशोऽपि सद्यः
शापस्यान्ते सदयहृदयः संविधायास्तकोपः ।
संयोज्यैतौ विगलितशुचौ दम्पती हृष्टचित्तौ
भोगानिष्टानविरतसुखं भोजयामास शश्वत् ॥ ११८ ॥

Colophon:

इति श्रीकालिदासकृतं मेघदूताख्यं काव्यं समाप्तम् ॥

No. 11870. मेघसन्देशः.
MEGHASANDEŚAḤ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 21*a* of the MS. described under No. 11561.

Contains only the first 25 stanzas of the first Sarga.

Same work as the above.

No. 11871. मेघसन्देशः.
MEGHASANDEŚAḤ.

Substance, palm-leaf. Size, $15\frac{5}{8} \times 1\frac{3}{8}$ inches. Pages, 34. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, new.
Complete.
Same work as the above.

No. 11872. मेघसन्देशः.
MEGHASANDEŚAḤ.

Substance, palm-leaf. Size, $12\frac{1}{4} \times 1\frac{1}{8}$ inches. Pages, 43. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.
Complete.
Same work as the above.

No. 11873. मेघसन्देशः.
MEGHASANDEŚAḤ.

Substance, palm-leaf. Size, $14\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 25. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.
Complete.
Same work as the above.

No. 11874. मेघसन्देशः.
MEGHASANDEŚAḤ.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{3}{8}$ inches Pages, 30. Lines, 6 on a page. Character, Grantha. Condition, fair. Appearance, old.
Breaks off in the 25th stanza of the second Sarga.
Same work as the above.

No. 11875. मेघसन्देशः.
MEGHASANDEŚAḤ.

Substance, palm-leaf. Size, $13\frac{7}{8} \times 1\frac{5}{8}$ inches. Pages, 57. Lines, 7 on a page. Character, Kanarese. Condition, injured. Appearance, old.
Contains 1 to 35 stanzas in the first Sarga together with meaning in Kanarese.
Same work as the above.

No. 11876. मेघसन्देशः.
MEGHASANDEŚAḤ.

Pages, 8. Lines, 9 on a page.
Begins on foll. 40a and [illegible] of the MS. described under No. 11477.

Complete.

Same work as the above.

The copying of the latter half of the poem is said to have been finished by Viñjimūri Subbarāyaḍu on Saturday, the bright fortnight of the Kārttikai month in the year Nala.

No. 11877. मेघसन्देशः.
MĒGHASANDĒŚAḤ.

Substance, palm-leaf. Size, 14⅜ × 1¼ inches. Pages, 17. Lines, 6 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Begins on fol. 6*a*. The other work herein is Vṛttisiddharūpasaṅgraha 1*a*.

Contains the second Sarga only

Same work as the above, but the colophon is wrongly written.

No. 11878. मेघसन्देशव्याख्या—सञ्जीविनी.
MĒGHASANDĒŚAVYĀKHYĀ : SAÑJĪVINĪ.

Pages, 70. Lines, 9 on a page.

Begins on foll. 45*a* and 70*a* of the MS. described under No. 11477, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

The commentary of Mallinātha, entitled Sañjīvinī, on the Mēghasandēśa The MS. is said to have been transcribed in the year Nala and the commentary on the first Sarga is said to have been completed on Monday, the 3rd day of the bright fortnight in the month of Āśvija.

Beginning :

मातापितृभ्यां जगतो नमो वामार्धजानये ।
सद्यो दक्षिणदृक्पातसङ्कुचद्वामदृष्टये ॥

अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्यवैभवम् ।
तं नरं वपुषि कुञ्जरं मुखे मन्महे किमपि तुन्दिलं महः ॥

शरणं करवाणि शर्मदं ते चरणं वाणि चराचरोपजीव्यम् ।
करुणामसृणैः कटाक्षपातैः कुरु मामम्ब कृतार्थसार्थवाहम् ॥

भारती कालिदासस्य दुर्व्याख्याविषमूर्छिता ।
एषा सञ्जीवनी टीका तामद्योज्जीवयिष्यति ॥

इहान्वयमुखेनैव सर्वं व्याख्यायते मया ।
नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते ॥

अथ तत्रभवान् कालिदासो नाम कविः "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।" इत्याद्यालङ्कारिकवचनप्रामाण्यात् काव्यस्यानेकश्रेयस्साधनतां "काव्यालापांश्च वर्जयेत्" इति निषेधशास्त्रस्यासत्काव्यविषयतां च पश्यन् मेघसन्देशाख्यं काव्यं चिकीर्षुश्चिकीर्षिताविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलसाधनत्वादाशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति शास्त्रादाशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वात्काव्यादौ यक्षस्य गिरिनिवासरूपं वस्तु निर्दिशति—कश्चिदिति। स्वाधिकारात्प्रमत्तः अनवाहितः; "प्रमादोऽनवधानता" इत्यमरः। अत एवापराधाद्धेतोः कान्ताविरहगुरुणा "गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरे" इति शब्दार्णवे।

End:

"अन्ते काव्यस्य नित्यत्वे कुर्यादाशिषमुत्तमाम्।
सर्वत्र प्राप्तये विद्वान्नायके चानुरूपिणीम्"।

इति सारस्वतालङ्कारदर्शनात्काव्यान्ते नायके चानुरूपोऽयमाशीर्वादः प्रयुक्त इत्यनुसन्धेयम्॥

Colophon:

इति श्रीमहोपाध्यायकोलचलमल्लिनाथसूरिविरचितायां मेघसन्देशव्याख्यायां सञ्जीविनीसमाख्यायामुत्तरमेघः समाप्तः॥

No. 11879. मेघसन्देशव्याख्या—सञ्जीविनी.
MĒGHASANDĒŚAVYĀKHYĀ: SAÑJĪVINĪ.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 58. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains 1 to 67 stanzas of the first Sarga.

Same work as the above. By Mallinātha.

No. 11880. मेघसन्देशव्याख्या—सञ्जीविनी.
MĒGHASANDĒŚAVYĀKHYĀ: SAÑJĪVINĪ.

Substance, palm-leaf. Size, $8\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 176. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Almost complete.

Same work as the above. By Mallinātha.

No. 11881. मेघसन्देशः, सव्याख्यः.

MEGHASANDĒŚAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 13 × 1⅜ inches. Pages, 86. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains the second Sarga which wants the beginning and end.

Same work as the above, but with text.

No. 11882. मेघसन्देशः, सव्याख्यः

MEGHASANDĒŚAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 15 × 1⅜ inches. Pages, 89. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the first Sarga.

Same work as the above.

No. 11883. मेघसन्देशः, सव्याख्यः.

MEGHASANDĒŚAḤ WITH COMMENTARY.

Pages, 22. Lines, 26 on a page.

Begins on fol. 7*a* of the MS. described under No. 11575.

Contains 1 to 46 stanzas of the first Sarga.

Same work as the above.

No. 11884. मेघसन्देशव्याख्या, सञ्जीविनी.

MEGHASANDĒŚAVYĀKHYĀ : SAÑJĪVINĪ.

Substance, palm-leaf. Size, 16¼ × 1¼ inches. Pages, 82. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the first Sarga.

Same commentary as the above. By Mallinātha.

No. 11885. मेघसन्देशव्याख्या—सञ्जीविनी.

MEGHASANDĒŚAVYĀKHYĀ : SAÑJĪVINĪ.

Pages, 76. Lines, 5 on a page.

Begins on fol. 42*a* of the MS. described under No. 5784.

Contains 55 stanzas in the first Sarga.

Same commentary as the above. By Mallinātha.

No. 11886. मेघसन्देशव्याख्या— सञ्जीविनी.

MEGHASANDĒŚAVYĀKHYĀ : SAÑJĪVINĪ.

Substance, paper. Size, 11¼ × 6¼ in[illegible] Pages, 136. Lines, 20 on a page. Character, Telugu. Con[illegible] injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Uttarakādambarī 68*b*, Citramīmāṁsā 177*b*, Nītisārasamuccaya (with Telugu commentary) 304*b*, Cāṭuślōkas 323*a*, Sūryaśataka 349*a*, Cāṭudhārā 360*b*.

Complete.

Same work as the above. By Mallinātha.

No. 11887. कृष्णलीलातरङ्गिणी.

KṚṢṆALĪLĀTARAṄGIṆĪ.

Substance, palm-leaf. Size, $13\frac{5}{8} \times 1\frac{3}{8}$ inches. Pages, 196. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete in 12 Taraṅgas, the headings of which are given below.

Same work as that described under R. No. 389 of the Triennial Catalogue of MSS., Vol. I, but with different readings.

By Nārāyaṇatīrtha, disciple of Śivarāmānandatīrtha

१. कृष्णप्रादुर्भाववर्णनम्.	७. रासक्रीडामहोत्सववर्णनम्.
२. कृष्णबाललीलावर्णनम्.	८. रासक्रीडावर्णनम्.
३. गोवत्सपालनवर्णनम्.	९. श्रीकृष्णमधुराप्रवेशवर्णनम्
४. बालगोपालवर्णनम्.	१०. कंसनिर्हरणवर्णनम्.
५. गोपीवस्त्रापहारगोवर्धनोद्धारणवर्णनम्.	११ द्वारवतीप्रवेशवर्णनम्.
६. गोपीसमागमवर्णनम्.	१२. रुक्मिणीकल्याणमहोत्सववर्णनम्.

Beginning:

हिमगिरितनयापत्यं हेमाचलचापसमुदितं तेजः ।
किमपि महत्तमवश्यं स्मरणीयं विघ्नतिमिरहरणाय ॥
गिरिराजसुतासूनुः गजराजवराननः ।
परिपन्थिगणध्वंसी सुरसेव्यो विराजते ॥

* * * *

सर्वज्ञानक्रियाशक्तिं सर्वयोगीश्वरप्रभुम् ।
सर्ववेदमयं विष्णुं प्रभविष्णुमुपास्महे ॥

* * * *

वासुदेवे भगवति भक्तिप्रवणया धिया ।
य(यु)ज्यते भक्तिसाराढ्या कृष्णलीलातरङ्गिणी ॥
आदौ कृष्णावतारस्तदनु नरहरेर्बाललीलाविलासः
वत्सानां पालनं तच्च [illegible] गवां पालनं प्रौढभावः ।

गोपीवस्त्रापहारस्तदनु गिरिवरोद्धारणं रासलीला
कंसादीनां निरासस्तदनु जलनिधौ द्वारकायां प्रवेशः ॥
रौहिणेयस्य कृष्णस्य विवाहस्तदनन्तरम् ।
रुक्मिण्याद्यष्टमहिषीसहितो गीयतेऽमरैः ॥
इत्येवं सङ्ग्रहेणोक्ता कृष्णलीलातरङ्गिणी ।
आद्यः कृष्णावतारोऽयं सङ्ग्रहेण विधीयते ॥
उग्रसेनस्ततः कंसो देवकीवसुदेवयोः ।
तयोः कारागृहे वासः कंसेन विहितः किल ॥
ब्रह्मा सुरेन्द्रा धरणी सनकाद्यास्ततो हरः ।
भगवत्प्रार्थना तेषां तत्तत्स्थाननिवेशनम् ॥
नारदस्योपदेशेन षट्सुतानां विदारणम् ।
देवक्याः सप्तमो गर्भः सङ्कर्षण इतीरितः ॥
गोकुले कृष्णगमनं दुर्गाया मधुरागमः ।
कथायाः सङ्ग्रहस्त्वेवं चरित्रेऽस्मिन्निगद्यते ॥

* * * *

Colophon :

इति श्रीशिवरामानन्दतीर्थपादसेवक श्रीनारायणतीर्थविरचितायां श्रीकृष्णलीलातरङ्गिण्यां श्रीकृष्णप्रादुर्भाववर्णनं नाम प्रथमस्तरङ्गः ॥

End :

कामदा कामिनामेषा मुमुक्षूणां च मोक्षदा ।
शृण्वतां गायतां भक्त्या कृष्णलीलातरङ्गिणी ॥

डोलायन्त्रमहोत्सवश्लोकः—

स्वामिन् सर्वजगन्निवास रचितां डोलां सुरेन्द्रादिभिः
वज्रस्तम्भविचित्ररत्नखचितस्वर्णस्फुरन्मण्डपे ।
आरुह्यामरवर्यगीत मुनिभिर्ध्येयात्ममूर्ते हरे
लावण्यामृतवारिधे विहर सत्कीर्तिं सुविस्तारय ॥

Colophon :

इति श्रीशिवरामानन्दतीर्थपादसे[illegible]श्रीनारायणतीर्थविरचितायां श्रीकृष्णलीलातरङ्गिण्यां श्रीकृष्णरुक्मिणी[illegible]णमहोत्सवं(वो)नाम द्वादशस्तरङ्गः ॥

No. 11888. यमकभारतम्.
YAMAKABHĀRATAM.

Substance, palm-leaf. Size, 14⅜ × 1¼ inches. Pages, 18. Lines, 5 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, old.

Complete.

A short Yamaka poem narrating the story of the Mahābhārata: by Ānandatīrtha.

Beginning:

ध्यायेत्तं परमानन्दं यन्माता पतिमार(प)द्परमानन्दम् ।
उज्झितपरमानं दम्पत्याद्याद्याश्रमैस्सदैव परमानन्दम् ॥
यस्य करालोलं चक्रं कालः परस्य हि करालोऽलं चक्रम् ।
यस्य गदा पवमानः सव्यो व्यासोऽभवत्सदापवमानः ॥
यस्य रमा नमनोगं जगृहे विश्वम्भरापि नमनोऽगम् ।
यस्य पुमानानन्दं भुङ्क्ते यद्धाम कपतिमानानन्दम् ॥
परमेषु यदा तेजः परमेषु[यदा]चकार वासुदेवोऽजः ।
मानधि बिभ्रत्सुमनो मानधिमासीन्नवासुदेवो जः ॥
सोऽजनि देवक्यन्ते यस्मादनुकम्पनावदेवक्यन्ते ।
अवदन्देवक्यन्ते भुवनं हि सुरास्सदैव देवक्यन्ते ॥
नीतो वसुदेवेन स्वततेन(स)गोकुलं सुवसुदेवेन ।
तत्र यशोदातनयं मेने कृष्णं स्वकीयमवदातनयम् ॥

End:

कृष्णकथेयं यमिता सुखतीर्थेनोदितानेनेषं यमिता ।
प(भ)क्तिमता परमेशो सर्वोद्रेकात्सदानुता परमेशो ॥
इति नारायणनामा सुखतीर्थसुपूजितस्सुरायणनामा ।
पूर्णगुणैरधिकज्ञानेच्छाभक्तिभिः स्वधिकपूर्णः ॥

Colophon:

इति (श्री)मदानन्दतीर्थभगवत्पूज्यपादाचार्यविरचितं यमकभारतं समाप्तम् ॥

No. 11889. यमकभारतम्.
YAMAKABHĀRATAM.

Substance, palm-leaf. Size, 16⅞ and 15 × 1¼ inches. Pages, 11. Lines, 5 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, new.

Begins on fol. 17*a*. The other works herein are Yamakabhāratatīkā 1*a*, Rāmatārāvalī 23*a*, Taittirīyōpaniṣadbhāṣya 29*a*.

Complete.

Same work as the above, but with a slightly different colophon which is given below :—

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः यमकभारततात्पर्यनिर्णय-स्समाप्तः ॥

No. 11890. यमकभारतटीका.

YAMAKABHĀRATAṬĪKĀ.

Pages, 31. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under the previous No.

Incomplete.

A commentary on the work described under the last number. The author refers to the existence of a prior commentary written in verse on this work and says that he has followed it.

Beginning :

श्रीमुखाम्भोजहंसाय संसार(र्णवसे)तवे ।
सोमवंशावतंसाय नमः कंसाद्व(द्य)सद्विदे ॥
व्यासं भारतकर्तारं मध्वमूलगुरुं तथा ।
चेतो वाग्देवतां वाणीं गुरुं च प्रणमाम्यहम् ॥
अथ देवेशयोगीन्द्रशिक्षा . . . . . . ।
करिष्ये मन्दबोधाय टीकां यमकभारते ॥
यद्यपि श्लोकरूपास्ति टीकास्य सुगमा . . ।
अतस्तामनुसृत्यैव टीकेयं क्रियते मया ॥

इह हि सकलसुजनानां प्रत्यहं पठनेन महाभारतपठनजनितफलसिद्ध्यर्थं सङ्क्षेपेण महाभारतार्थप्रतिपादकं काव्यं करिष्यन् श्रीमदानन्दतीर्थमुनिः स्वस्वान्तरायविधुरतया आदौ श्रीहरिध्यानरूपं मङ्गलमवश्यं कर्तव्यमिति स्वजनं शिक्षयति—ध्यायेदिति । अत्र सुधीरिति कर्तृवाचकपदं विष्णुमिति विशेष्यपदं चाध्याहार्यम् ।

End :

सर्वेऽपि देवास्तव पराजिताः इति [illegible]याति—पुरमिति । अरिदरी अरिश्चक्रं दरः शङ्खः तावस्य स्तः इति [illegible] अरिदरी चक्रशङ्खधरः श्रीकृष्णः

पुरं द्वारवतीमभीयाय पुनरागतः सन् पृथासुताय पार्थाय भद्रां सुभद्रां स्वाव-रजां दत्वा अरिदरी चक्रादिशब्देन तत्कार्यमुपलक्ष्यते । तथाच दुर्योधनकाम-दरणवानित्यर्थः । दुर्योधनस्य सुभद्रायां कामोऽभूत् शक्रपुरीमिन्द्रप्रस्थं प्रति अभियातः प्रयातः

* * * *

यद्वा सतां युद्धार्थमागतानामिन्द्रादीनां सङ्कल्पात् अतोऽस्य वह्नेरभिघात.

No. 11891. यादवराघवीयम्.
YĀDAVARĀGHAVĪYAM.

Substance, palm-leaf Size, $14\frac{1}{4} \times 1\frac{1}{8}$ inches. Pages, 11. Lines, 7 on a page. Character, Grantha. Condition, fair. Appearance, new.

Begins on fol 28*a*. The other work is Yādavarāghavīya with commentary 1*a*.

Complete in 62 stanzas.

Same text as that described under R. No. 135 of the Triennial Catalogue of MSS , Vol. I.

This is a short poem consisting of 300 stanzas each of which, read in their natural order, narrates the story of the life of Rāma, but when read in the reverse order relates the story of Kṛṣṇa.

It was composed by Vēṅkaṭādhvarin (of Araśāṇipālai), son of Raghunātha and grandson of Śrīnivāsadīkṣita, a descendant of Pranatārtihara who was a disciple of Rāmānuja. Vādihaṁsāmbuda (teacher of Vēdāntadēśika) is also said to be a descendant of Pranatartihara.

Beginning:

वन्देऽहं देवं तं (श्रीतं)रन्तारं कालं भासा यः ।
रामो रामाधीराप्यागो लीलामारायोध्ये वासे ॥
सेवाध्येयो रामालाली गोप्याराधी मारामोराः ।
यस्साभाऊङ्कारन्तारं तं श्रीतं वन्देऽहं देवम् ॥
साकेताख्या ज्यायामासीद्या विप्रादीप्तार्याधारा ।
पूराजीतादेवाद्याविश्वासाग्र्या सावाशारावा ॥
वाराशावासाग्र्या साश्वा विद्यावादेताजीरा पूः ।
राधार्याप्ता दीप्रा विद्यासीमा या ज्याख्याता के सा ॥

End:

चिरचारु रसादास लङ्कन।वरजार्तिहा ।
याततानवसाकेतं ना वेद्रेतकृपारधीः ॥
धीरपाकृतदेवेऽनातङ्के [illegible] ता तया ।
हार्तिजारवनाकेऽलं स[illegible] रुचाराचि ॥

Colophon :

प्रख्यातः प्रणतार्तिहृद्गुरुरिति श्रीभाष्यकर्तुर्मुने-
र्यो माहानसिकस्तदुक्तिरसिकः श्रीमान्स यत्राभवत् ।
वंशे तत्र हि वादिहंसजलदाचार्यादिभिर्भूषिते
यज्वाभूद्रघुनाथदीक्षितकविः श्रीश्रीनिवासेष्टिनः ॥
तत्सूनुः किल वेङ्कटाध्वरिकविस्तस्यानुमत्या गुरोः
श्रीमद्यादवराघवीयचरितं श्लोकैः शुभैस्त्रिशता ।
तैराख्याति निगद्यतेऽक्षरगणैर्यत्रानुलोम्योदितैः
रामस्य प्रतिलोमतस्तु पठितैः कृष्णस्य यत्क्रीडितम् ॥
किंचित् सचिन्तये गोपीकिलकिंचितवञ्चितम् ।
अञ्चितं ज्योतिरमरैरञ्जनाद्रावुदञ्चितम् ॥

No. **11892.** यादवराघवीयम्, सव्याख्यानम्.

YĀDAVARĀGHAVĪYAM WITH COMMENTARY.

Pages, 76. Lines, 7 on a page.

Begins on fol. 1*a* of the MS described under No 10227.

Complete.

Same work as that described under R No 135 of the Triennial Catalogue of MSS, Vol. I, Part I, wherein see for the beginning. There is some divergence in reading in this MS. beyond the 48th stanza.

End :

साग्र्यतामरसागारामक्षामा घनभार गौः ।
निजदेपरजित्यास श्री रामे सुगराजभा ॥

सा, अग्र्यतामरसागाराम्, अक्षामा, घनभा, (आर,) गौः, निजदे, परजिति, आस, श्रीः, रामे, सुगराजभा ।

रामप्रवेशानन्तरं सा गौः अयोध्याभूमिः गौर्नाके वृषभे चन्द्रे वाग्भि-(ग्दिग्) दिब्धे(दृग्धे)नष(नुषु)स्त्रियामिति रत्नमाला । अक्षामा अकृशा घनभा अतिदीप्तिश्च[साति अग्र्या तामसागिराम्] -अग्र्यामुत्तमाम् । तामरसागाराम् । कमलालयाम्॰। लक्ष्मीम् आर प्राप्तवती । वद्दते(निजदे)स हि प्रपन्नेभ्यः आत्मानन्ददातीति, आत्मदा बलदा इति श्रुतेः । परजिति रावणादिशत्रुजेतरि रामे सुगराजभा(सुगा)सुगमा राजभा[स]राज[illegible]र्यस्यास्सा तथोक्ता । राज्येन हि राजतेजः सुगमं भवति । श्रीः राज[illegible] सुप(सम्प)त् । आस बभूव ।

प्रातिलोम्यपाठस्तु—

भाजरागसुमेरा श्रीसत्याजिरपदेऽजनि ।
गौरभानघमा क्षामरागा सारमताग्र्यसा ॥

भा । अजरागसुमेरा । श्रीसत्याजिरपदे । अजनि । गौरभा । अनघमा । क्षामरागा । सा । अरमत । अग्र्यसा । अजरागः । अजराणां निर्जराणाम् [आ]अत(ग): पारिजातः तस्य सुमानि पुष्पाणि इरा स्थानं यस्यास्सा अजरागसुमेरा पारिजातकुसुमनिष्ठा भा दीप्तिः । श्रीसत्याजिरपदे । श्रीसत्यायाः सत्यभामायाः अजिरपदे अङ्कणस्थाने । अजनि अजायत । पारिजातकुसुमदीप्तिरत्यद्भुता सत्यभामाङ्कणे प्रससारेति कथनेन तदङ्कणे पारिजातः श्रीकृष्णेन स्थापित इति व्यज्यते । तेन सा सत्यभामा । गौरभा । पूर्वापेक्षयाप्यधिकतटिद्गौरकान्तिः । अनघमा निर्दोषसम्परा(त्का ।) क्षामः क्षीणः रागः मात्सर्यं यस्यास्सा क्षामरागा । पारिजातानयनेन नरा(नार)ददत्तत्वात् कुसुमग्राहिण्यां[क]रुक्मिण्यां तद्दातरि कृष्णे च प्ररूढमात्सर्यमुज्झितवतीति भावः । रागोऽनुरागो मात्सर्ये (इ)ति रत्नमाला । अग्र्यसा अग्र्यं श्रेष्ठं सं ज्ञानं यस्यास्सा अग्र्यसा सन्त्वित्य(मिति)स्यन्दनपथे ज्ञाने ध्याने निवारण इति । तत्रैव समीचीनविवेकवती च सती अरमत कृष्णे(न)साकं क्रीडति स्म ॥

श्रीमद्राघवयद्वीर्ययोत्तुंस(यादवीयचरितोत्तंसां)कला(शालिनां)
श्रेयोहेतुमचीकरत् कृतिमिमां श्रीशो मया दुष्कराम् ।
तस्मादस्त्र(त्र) पवित्रमाधवकथास्वादोन्मिषत्कौतुकाः
सन्तस्साधु विद(त)न्वतां गुणविदः श्लाघाममोघादराः ॥

Colophon:

राघवयादवीयं समाप्ता(प्तम्) ॥

No. 11893. यादवराघवीयम्, सव्याख्यानम्.

YĀDAVARĀGHAVĪYAM WITH COMMENTARY.

Pages, 54. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 11891.

Same work as that described under R. No. 135 of the Triennial Catalogue, Vol. I, Part I, but the following stanzas are added in the beginning and in the end respectively.

Beginning:

प्रणम्य रत्ननिलयं दुग्ध[illegible]धिसुतापतिम् ।
चित्रं प्रबन्धं लिखितुं [illegible]सः प्रचक्रमे ॥

End:

यः पूतनामारणलब्धवर्णः काकोदरो येन विनीतदर्पः ।
यशोदयालङ्कृतकीर्तिरव्यान्नाथो रघूणामथवा यदूनाम् ॥

No. **11894.** यादवराघवीयम्, सव्याख्यानम्.
YĀDAVARĀGHAVĪYAM WITH COMMENTARY.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 36. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, recent.

Contains 48 stanzas only.

Same work as the above.

No. **11895.** राक्षसकाव्यम्—सव्याख्यानम्.
RĀKṢASAKĀVYAM WITH A COMMENTARY.

Pages, 20. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 1277.

Complete.

Same work as the one described on page 1493 of the India office Library Catalogue. A pedantic idyl attributed to Kālidāsa.

Beginning:

कश्चिद्वनं बहुवनं विचरन्वयस्स्थो वश्यां वनात्मवदनां वनितां वनार्द्राम् ।
तर्वर्यरिप्रदमुदीक्ष्य समुच्छ्रितं खे ना गामिमां मदकलः सकलां बभाषे ॥

कश्चिदिति । कश्चित् अनिर्दिष्टनामा ना पुरुषः वनितां प्रति इमां प्रत्यक्षां सकलां समस्तां गां वाचं बभाषे अब्रवीदित्यर्थः । किं कुर्वन् । वनं काननं विचरन् भ्रमन् । किम्भूतं वनम् । बहुवनम्—बहूनि उदकानि यत्र तद्बहुवनमित्यर्थः । किम्भूतः । वयस्स्थः—वयांसि तिष्ठतीति वयस्स्थो युवेत्यर्थः । पुनः किंविधः । मदकलः हर्षविभ्रमयुक्तः । किं कृत्वा । तरवो वृक्षास्तेषामरिस्तर्वरिरग्निः, तर्वरेररिः उदकम्, तत्प्रददातीति स मेघः, तम्, उदीक्ष्य दृष्ट्वा । किंविधं मेघम् । खे आकाशे समुच्छ्रितं समुत्पन्नम् । किंविशिष्टाम् । वश्यामधीनाम् । पुनः किंविधाम् । वनार्द्रा(त्म)वदनाम्—वनं पानीयम्, तदात्मा यस्यासौ वनात्मा चन्द्रः; क्षीरोदमथनोत्पत्तेः । तेन तुल्यं वदनं यस्याः सा ताम् । "वने सलिलकानने" (इ)त्यमरः । पुनः किंविधाम् । वनार्द्राम्—वनेन पानीयेन आर्द्रामार्द्रीकृताम् ॥

पश्याब्जदृग्गिरितटेषु कुमातृसाह्वान् [illegible]शराजरिपुशत्रुसमावृतान् ।
वैश्वानरारिजरिपुघ्नशराभिभूतैर्दकछो[illegible]भिरुपासितपुष्पशोभान् ॥

End :

एतावदुत्तमवचः सुमनाः सदुक्त्वा रन्त्वा दिनं सह तया प्रियया ह्यदीनः ।
युक्तं चतुर्भिरनडुद्भिरदीनवद्भिरारुह्य यानमथ सम्प्रययौ स्वगेहम् ॥

एतावदिति । अथेत्यनन्तरं । स पुमान् स्वं गेहं प्रययौ । किं कृत्वा । यानमारुह्य । किम्भूतं यानम् । चतुर्भिरनडुद्भिर्युक्तम् । किम्भूतैरदीनवद्भिः । पुनः किं कृत्वा । एतावदुत्तमवचः उक्त्वा । तया प्रियया सह दिनं रन्त्वा क्रीडयित्वा । किंविधः । सुमनाः सुष्ठु मनः यस्य सः । पुनः किंविधः । अदीनः ; सुन्दर इत्यर्थः ॥

Colophon :

इति श्रीकालिदासविरचितराक्षसकाव्यं सव्याख्यानं सम्पूर्णम् ॥

No. 11896. रामकृष्णविलोमकाव्यम्.
RĀMAKṚṢṆAVILŌMAKĀVYAM.

Pages, 4. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 1728.

Complete.

A short poem consisting of 38 stanzas the first half of each of which is read in the reverse order in the next half, the former narrating the story of Rāma and the latter the story of Kṛṣṇa : by Sūryakavi who is called Daivajñapaṇḍita. He is stated to be the son of Jñānādhirāja.

Beginning :

तं भूसुतामुक्तिमुदारहासं वन्दे यतो भव्यभवं दयाश्रीः ।
श्रीयादवं भव्यभतोयदेवं संहारदामुक्तिमुतासुभूतम् ॥
चिरं विरश्चिर्न चिरं विरश्चिस्साकारता सत्यसतारका सा ।
साकारता सत्यसतारका सा चिरं विरश्चिर्न चिरं विरश्चिः ॥
तामसीत्यसति सत्यसीमता मा ययाक्षमसमक्षयायमा ।
मा ययाक्षमसमक्षयायमा तामसीत्यसति सत्यसीमता ॥

End :

लङ्कारङ्कागाराध्यासं याने मेया काराव्यासे ।
सेव्या राका यामे नेया सन्ध्यारागाकारं कालम् ॥
गोदावरी ब्रह्मगिरेः सकाशात् सम्प्रापिता प्रागुदधिं प्रयत्नात् ।
येनर्षिणा सोऽपि पुनः प्रतीपमानेतुमाद्रि प्रभवेत्किमेताम् ॥
एवं विलोमाक्षरकाव्यकर्तु(ः)भूयस्स(यांस)मायासमवेक्ष्य तज्ज्ञाः ।
ज्ञा(जा)नन्त्विमां चि[illegible]वित्वसीमां दैवज्ञसूर्याभिधसम्प्रदिष्टाम् ॥

Colophon :

इति श्रीदैवज्ञपण्डितसूर्यकविविरचितं विलोमाक्षररामकृष्णकाव्यं समाप्तम् ॥

No. 11897. रामकृष्णविलोमकाव्यम्.
RĀMAKṚṢṆAVILŌMAKĀVYAM.

Substance, palm-leaf. Size, 11⅛ × 1¼ inches. Pages, 3. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 3*a*. The other works herein are Vyākaraṇakrōḍa 1*a*, Uṇādipāṭha 2*a*.

Same work as the above.

Complete.

No. 11898. रामकृष्णविलोमकाव्यव्याख्या.
RĀMAKṚṢṆAVILŌMAKĀVYAVYĀKHYĀ.

Pages, 44. Lines, 8 on a page.

Begins on fol. 17*a* of the MS. described under No. 1277, wherein this work has been mentioned as Rāmakṛṣṇābhyudaya in the list of other works given therein.

Complete.

This is a commentary on the work described under the last number, by the same author as that of the text.

In the last stanza given in the extract it is stated that the poem was written in Kali 4870.

Beginning :

श्रीमन्मङ्गलमूर्तिमार्तिशमनं नत्वा विदित्वा ततः
शब्दब्रह्ममनोरमं यु(सु)गण(कज्ञानाधिराजात्मजः) ।
(यद्ग्रन्थाध्यय)नैर्विधेयानिवहोऽप्याचार्यचर्यामगात्
सोऽयं सूर्यकविर्विलोमरचनाकाव्यं करोम्यद्भुतम् ॥
(छन्दःपूरणमुत्क्रमक्रमवि)धौ साकाङ्क्षता तत्पदे-
ष्वारम्भाच्चरितक्रमोऽप्युपचयोऽप्येतत्य(त्र)यं दुर्गमम् ।
एवं सत्य(पि मन्मतिः कियदपि प्रागल्भ्यमालम्ब)ते
तत्सर्वं गुणिनः क्षमातुयदहो(मध्वमथवा)यूयं श्रमज्ञाः स्वयम् ॥
कदाचिदपि सन्तरे(त्कृतिपरो नरो नीरार्घं)
(कथञ्चिदपि धावति प्र)क(व)रघार(म)धामाध्वनि ।
कृतेप्य(ऽप्य)तिविशारदा[ः] [illegible]शारदानुग्रहं
विलोमकविताकृतौ सुकवि[illegible]रा भवेत् ॥

(भागीरथी रामकथातिरम्या)
कालिन्दिका) कृष्णकथा मनोज्ञा ।
सरस्वती सूर्यकवेः स्मृतिर्या (तृतीया)
स्नातुं प्रयागभ्रमतः(गेऽत्र मतिः)कवीनाम् ॥
समाक्षराद्विविषमा (क्षरार्धा) (द्वेधा भवेद्य)त्तकावित्वसीमा ।
समानभिन्नार्थतया द्विधाद्या भिन्नाक्षरार्था च भवेद्द्वितीया ॥

अथ कवित्वपरिभाषा पिङ्गलादौ कथिता ।

(अध्याहारो यत्तदोर्वा क्रियायाः)
प्रागा(पादा)द्यन्तोना(न्ते वा)विसर्गो विसर्गः ।
कुत्राप्यूहा लक्षणा व्यञ्जना वा
विद्यादेतां चित्रकाव्यानुपूर्वीम् ॥
नैकाक्षरा(णि छन्दोक्तिर्नाप्रसिद्धाभिधानकम्) ।
(नैव व्या)करणालापतन्द्राक्षेपो (णाक्लिष्टं द्राक्षापाकोऽ)त्र केवलम् ॥

अथ प्रायो ययोः कथाप्रसङ्ग[प्र]स्तावे(वेप्र)देवतात्वेन प्रणमति—

तं भूसुतामुक्तिमुदार(हासं) (. .) संहारदामुक्तिमुतासुभूतम् ॥

तं भूसुतामुक्तिं वन्दे । भूसुतायाः मुक्तिर्यस्मात्स तथा रावणरक्षितायाः सीताया मुक्तिर्मोक्ष(णं यस्मात्तं राघवं वन्दे नमस्करो)मीत्यर्थः । किम्भूतम् उदारहासम् । उदारो गम्भीरो हासो यस्यासौ । उद्वेगनिमित्तेषु सर्वानर्थेषु ।

अथ कृष्णपक्षे—

End :

अथ रावणे न(स)परिवार(रे) हते सति लङ्का हतप्रभाभूदिति विद्युन्मालयाह । याने रामागमने । सा लङ्का । रङ्कागाराध्यासं यथा भवति तथा मेयाभूत् । लङ्का नगरी । रङ्कस्यागारं तस्याध्यासो भ्रमः । तेन मातुं योग्याभूत् । इयं लङ्का कस्यचिद्रङ्कस्य अगारभ्रमेण जा(ज्ञा)ताभूदित्यर्थः । कस्मिन्सति काराभ्यासे सति । कारा बन्दीगेहमस्य अभ्यासे अविस्ता(रे) सति काराविस्तारं निर्भिद्य बन्दीभूतेषु देवेषु निर्मोचितेषु सत्सु इत्यर्थः ॥

कृष्णपक्षे—

सेव्या राका यामे नेया सन्ध्यारागाकारं कालम् ॥

पूर्वं [सादिया] सैरन्ध्रया सार्धं कृष्णस्य गार्हस्थ्यमभूदित्युक्तम् । तत्र दृष्टान्तमाह—सेव्या सेवितुं योग्यात्[illegible]या सैरन्ध्री कालं मेघश्यामं कृष्णं नेया

प्राप्तुं योग्याभूत्। यथा यामे संयोगावसरे। तथा राका पूर्णचन्द्रतिथिः। सन्ध्यारागाकारं यथा प्राप्य शोभते तद्वदित्यर्थः ॥

Colophon :

एवं विलोमाक्षरकाव्यकृत्ये भूयांसमायासमवेक्ष्य सन्तः।
जानन्त्विमां चित्रकवित्वसीमां दैवज्ञसूर्याभिधसम्प्रविष्टाम् ॥
गोदावरी ब्रह्मगिरेः सकाशात्सम्प्रापिता प्रागुदधिं प्रयत्नात्।
ए(ये)नर्षिसा(णा सो)पि पुनः प्रतीपमानेतुमर्द्धिं प्रव(भवे)त्किमेताम् ॥
वरर्तुवसुवेदाब्दैस्त्यक्ते कलियुगे मया।
लिखितं रामकृष्णाभ्यां चिह्नितं काव्यमुत्तमम् ॥

No. **11899.** वृषभनाथचरितम्.

VṚṢABHANĀTHACARITAM.

Pages, 20. Lines, 8 in a page.

Begins on fol. 2*a* of the MS. described under No. 11864.

Wants the beginning and end. Fragmentary and disordered.

A poem describing the story of the Jaina saint **Vṛṣabhanātha, the** first of the 24 Tīrthaṅkaras : by Sakalakīrti.

Beginning :

वाचः प्रामाण्यमापन्नाः सत्यसीमावलम्बिनः।
धर्मोपदेशदातारो महाप्राज्ञा महाधियः ॥
कवित्वादिगुणोपेतास्तथ्यकीर्तिविराजिताः।
मुमुक्षवो जगन्मान्या महातपस ऊर्जिताः ॥
निर्मदाः करुणाक्रान्ताः सन्मार्गोद्योतनोत्सुकाः।
निरा(री)हाः सूरयः पुंसामकारणसुबन्धवः ॥
इत्याद्यन्यगुणग्रामाः निष्प्रमादाः शुभाशयाः।
ग्रन्थादिरचने शक्ता विश्वकार्यविधौ क्षमाः ॥

* * *

अयोध्यानगरे राजा जयवर्मास्य वल्लभा।
सुप्रभामू (त्त) योः सूनुरजितं जयसंज्ञकम् ॥
भुक्त्वा तत्र महत्सौख्यं जिनपूजापुरस्सरम्।
प्रणतेन्द्रो दिवश्च्युत्वा मुक्तिगामिगुणार्णवः ॥
जयवर्मविरक्त्या स्वराज्यं [illegible]जितं जये।
गत्वाभिनन्दनस्यार्ते(न्ते)मुने[illegible] संयमम् ॥

End:

असमगुणनिधानान्सर्वमोक्षाध्वहेतून्
त्रिभुवनहितकर्तु(तॄन्)ल्लोकनाथैः प्रवन्द्यात्(न्) ।
रहितनिखिलदोषान् धर्मचक्राधिपांश्च
सततमसमभक्त्या सद्गुरून् पञ्च नौमि ॥

Colophon:

इति भट्टारकश्रीसकलकीर्तिविरचिते श्रीवृषभनाथचरित्रे श्रीवज्रजङ्घो-त्पत्तिश्रीमतीवज्रदन्तोद्भवान्तवर्णनो नाम तृतीयः सर्गः ॥

जिनेन्द्रान् जितकर्मार्तीन् सिद्धलोकाग्रवासिनः ।
गुणाकरांस्त्रिधा साधून् वन्दे तद्भूतयेऽखिलान् ॥
अथान्यच्छृणु पुत्रि त्वं साभिज्ञानं ब्रवे तव ।
युगन्धरजिनेन्द्रस्य यच्चरित्रं सुपावनम् ॥

* * * *

अमृताश्रवणध्या(ना)दायातौ धर्मवृद्धये ।
नृपतिस्तं विदित्वाशु सम्मतं निकटं ययौ ॥
दत्वा तावपि रा .

No. 11900. शुकसन्देशः, सव्याख्यः.

SUKASANDĒŚAḤ WITH COMMENTARY.

Substance, paper. Size, 11 × 8¾ inches. Pages, 259. Lines, 18 on a page. Ҫharacter, Dēvanāgarī. Condition, good. Appearance, new. Complete in 12 Prakaraṇas.

A poem in two parts in which a lover is described as having sent a parrot as a messenger to his beloved. By Lakṣmīdāsa. The commentary is called Vilāsinī and was written by King Mānavēda, probably a prince of Calicut.

Beginning:

कलायकुसुमच्छविस्फुरदुदारपीताम्बरं
परं पशुपसुन्दरीकुचपटीरपङ्काङ्कितम् ।
धनञ्जयरथालयं लसदभीशुहस्तं भजे
मनोहरमुदारधीहृदयगोचरं तन्महः ॥
इन्दिरानयनानन्दमिन्दीवरदलद्युतिम् ।
वन्दारुजनमन्दारं व[illegible]णमहर्निशम् ॥

* * * *

श्रृङ्गारशर्कराक्षोदसङ्गतिर्मधुराकृतिः ।
जयति प्रथितं काव्यं शुकसन्देशसंज्ञितम् ॥

तस्यातिमोहनगभीरतरार्थजात-
सम्पूरितोदरसमुद्रसहोदरस्य ।
व्याख्याविधानसकलोद्धरणप्रवीणं
श्रीमानवेदनृपतिर्विवृतिं तनोति ॥

लक्ष्मीदासकवीश्वरेण भणितः सन्देशकाव्याचलः
गूढार्थोच्छ्रयदुर्गमा(मो)ऽद्य धिषणाशक्त्या मयारुह्यते ।
श्रान्तश्चेत्पतितोऽन्तरा गुरुकृपायष्टिं गरिष्ठां तदा
विष्टभ्याधिककृच्छ्रतः स्थविरवद्गन्तास्मि चाधित्यकाम् ॥

लक्ष्मीदासकवेरुदारवचसः सन्देशकाव्याङ्गजो
बह्वर्थश्रुतवृत्तिमण्डनगुणश्रीमानवेदार्णवात् ।
जातामद्य विलासिनीं सहृदयां गृह्णन् बुधेभ्योऽधिकं
दत्वार्थान् दृढरक्षितान् जनयतादानन्दमस्यां सदा ॥

अथ कविकुलचूडामणिर्लक्ष्मीदासः शुकसन्देशाख्यं काव्यं चिकीर्षुः "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुख" मिति शास्त्रप्रामाण्यमनुसरन् आशीराद्यन्यतमैर्भवितव्यमित्यतो वस्तुनिर्देशकथां तावत्प्रस्तौति—

मू—लक्ष्म्या रङ्गे शरदि शशिनः सौधश्रृङ्गे कयोश्चित्
प्रेम्णा यूनो सह विहरतोः पेशलाभिः कलाभिः ।
व्यारान्वे(से)धः क नु हतविधेर्दूरनीतः स तस्याः
श्रान्तः स्वप्ने शुकमिति गिरा श्राव्यया सन्दिदेश ॥ इति ॥

शरदि शरत्काले शशिनश्चन्द्रस्य लक्ष्म्याः शोभायाः ; 'शोभार्थेऽपि प्रयुज्यन्ते लक्ष्मीश्रीकान्तिविभ्रमाः', इति हलायुधः । रङ्गे नटनस्थले ; रङ्गं स्यान्नटनस्थलमिति शब्दरत्नाकरे ।

* * * *

आयात्यस्तं वि(र)हिषु निजं तापमासज्य माना-
वूढोल्लासं प्रविश गुणकामूहशाली विशालाम् ।
अग्राम्यालङ्करणहसितालापलीलाविशेषै-
र्मानोद्रेकं मनसि गुणितं कुर्वतीमङ्गयोनेः ॥

* * * *

गुणकां गुणकाख्यां पुरीम्. ऊढोल्लासं प्राप्तविलासम् उढः प्राप्तः उल्लासो हर्षो वा यथा भवति तथा। प्रविश प्राप्नुहि। अनेन पक्षिणी केवलं त इत्यत्रोक्तं शुकस्य नवतिनाडिकागन्तव्यत्वमपि प्रतिपादितप्रायम्॥

Colophon :

इति श्रीमानवेदभूपविरचितायां शुकसन्देशव्याख्यायां विलासिनीसमाख्यायां . . . . . नाम तृतीयं प्रकरणम्। समाप्ता च पूर्वसन्देशव्याख्या॥

End :

मूले मूले मुकुलितधृतिर्मूर्छनामभ्युपैति
मध्येकालं फडिति फल(य)त्येष वामं हि दैवम्।
कल्लोलिन्यः कलुषकलुषं कुर्वते मानसं मे
प्राणात्प्राणेश्वरि न विरहे न ह्यहं धारयामि॥

ही चित्रं मे हिमलवभृतो मारुताः वेदयन्ति इत्यादिभिः स्वतस्सिद्धेऽपि कामे अत्यन्तसक्तश्चेदयमिव विश्लेषदुःखाभि . . . . मूदित्यस्य च व्यञ्जनाव्यापारेण प्रतिपादनात् सफलोऽयं कवेर्महान् लोकानुग्रहपरिक्लेशः काव्यस्योपादेयता चेति सर्वमवदातमिति सुधीभिर्विभावनीयम्॥

Colophon :

इति श्रीमानवेदभूपविरचितायां शुकसन्देशव्याख्यायां विलासिनीसमाख्यायां प्रमेयपरिनिष्ठापनं नाम द्वादशं प्रकरणम्॥

सम्पूर्णश्चोत्तरसन्देशः॥

लक्ष्मीदासकवेरुदारवचसः सन्देशकाव्याब्जजो
बह्वर्थश्रुतवृत्तिमण्डनगुणश्रीमानवेदान्नृपात्।
जातामद्य विलासिनीं सहृदयां गृह्णन् बुधेभ्योऽधिकं
दत्वार्थान् दृढरक्षितान् जनयतादानन्दमस्यां सदा॥

* * * *

श्रीरङ्गनाथकरुणामसृणावलोकलीलासमुल्लसदुरुश्रुतकाव्यसारः।
व्याख्यामिमां रचितवान् स तु मानवेदः किं दुष्करं गुरुकृपावरदैवतानाम्॥

क्ष्माभृत्पाथोधिनाथान्वयमहितकुलप्राप्तमव्याजचन्द्रः
सातीर्थ्यं यस्य लेभे श्रुतसरणिविदां शेखरः शेखरश्च।
सोऽयं सन्देशसिन्धुं कथमपि सरसं साधु निर्मथ्य ताभ्यामर्थास्वार्द्र(दं)चिरेणाप्यलभत विबुधाग्रेसरो मानवेदः॥

शुकसन्देशः समाप्तः॥

No. 11901. सङ्ग्रहरामायणम्.

SAṄGRAHARĀMĀYAṆAM.

Substance, palm-leaf. Size, 15¾ × 1⅝ inches. Pages, 316. Lines, 6 on a page. Character, Nandināgarī. Condition, Fair. Appearance, old.

Complete in eight Sargas.

Same work as that described under R. No. 448 of the Triennial Catalogue of MSS., Vol. I, wherein see for the beginning.

By Nārāyaṇapaṇḍita, son of Trivikramapaṇḍita.

The copying of this MS. is said to have been completed on Tuesday, the 4th day of the dark fortnight in the month of Māgha in the year Vyaya.

End:

ताम्राणि शुभ्राणि च पिङ्गलानि श्यामानि नीलानि चतुर्भुजानि ।
व्यक्तप्रवेष्टानि च ते वपूंषि महान्ति चाणूनि विचिन्तयामः ॥
न जातु जातानि न नश्वराणि न जातदुःखानि न दोषवन्ति ।
अनन्तसौख्यानि यदात्मकानि वीक्षेत वै तानि वपूंषि नाथ ॥

* * * *

इत्थं स गायन् बहुकोटिसङ्ख्यं रामायणं भारतपञ्चरात्रे ।
सब्रह्मसूत्रानपि सर्ववेदान् व्याख्याश्च(य)सङ्ख्यो रमतेऽधुनापि ॥
श्रेष्ठा[का]त्मकात् श्रेष्ठश्रुतीर्निशम्य रुद्रादिदेवा मुनिपुङ्गवाश्च ।
तत्त्वे विशेषान् विविधान् वदन्तः स्तुवन्ति नारायणशिष्यमेवम् ॥

* * * *

इति पवनसुताय प्रेष्ठभक्ताय रामो हसितसितगुबन्धून् प्रेमपीयूषसिन्धून् ।
भुवनभवनरक्षामङ्गलीलाप्रसङ्गान् वितरति कमलायै दत्तशेषानपाङ्गान् ॥

Colophon:

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुतश्रीमन्नारायणपण्डिताचार्यविरचिते श्रीमत्सङ्ग्रहरामायणे उत्तरकाण्डे अष्टमस्सर्गः ॥

उत्तरकाण्डः समाप्तः ॥

सङ्ग्रहरामायणं समाप्तम् ॥

No. 11902. सङ्ग्रहरामायणव्याख्या—भावरत्नप्रदीपः.

SAṄGRAHARĀMĀYAṆAVYĀKHYĀ : BHĀVARATNAPRADĪPAḤ.

Substance, palm-leaf. Size, 15 × 1½ inches. Pages, 181. Lines, 7 on a page. Character, Nandināgarī. Condition, good. Appearance, new.

Complete.

A commentary on the work described under the last number. The name of the commentator is not given.

Beginning:

(सा)धिष्ठानन्तविद्युद्वलयनवघनच्छायमच्छामितोद्य-
द्विद्योतच्चिन्मयूखप्रसरदमृतसन्दर्भधारासहस्रम् ।
विद्येशं श्रीशमीशं नलिनस(म)दृशं सुप्रसन्नाननाब्जं
व्यासं विज्ञानमूर्तिं सकलगुणनिधिं देवदेवं नमामि ॥

अथ श्रीनारायणभट्टारकाः विघ्नविघातादिसाधनतयाविगीतशिष्टाचार-परम्पराद्यवगतं श्रीमन्नारायणस्तवनवन्दनरूपं मङ्गलं निर्विघ्नेन ग्रन्थसमाप्त्यादिस्वाभिमतसिद्धये कृत्वा सन्निहितशिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति वन्द इत्यादिना । अहं ब्रह्म वन्द इत्यन्वयः । वि(व)दि अभिवादनस्तुत्योरिति धातोः स्तौमीत्यर्थोऽपि ग्राह्यः । ब्रह्मणि जीवाः सर्वेऽपीत्यादिश्रुतेः ब्रह्म शब्दस्य जीवेऽपि प्रसिद्धेस्तद्वारयितुमाह—नारायणाख्यमिति तद्विशेषणमाह—वन्द्यमिति । वन्दितुं योग्यमित्यर्थः । ब्रह्मादिवन्द्यत्वोक्ताविष्टत्वोपपादनम् । व्यक्तमिति व्यापना।क्रियाविशेषणम्.

* * * *

जगदभिरामं जगन्मनोहरम् । दधानः । स्मरन्नित्यर्थः । सर्गान्ते सर्वत्र रामनामाङ्कितपद्यकरणात् कविरात्मनो रामचरणप्र(व)णतां प्रकटयति ॥

Colophon:

इति भावरत्नप्रदीपे बालकाण्डे प्रथमः सर्गः ॥

End:

हसितं मन्दहास एव सितगुश्चन्द्रः बन्धुर्येषां ते तथा तान् । प्रेमपीयूषसिन्धून् प्रेमाख्यामृतसमुद्रान् भुवनजननरक्षाभङ्गविषयकलीलायाः प्रकृष्टसम्बन्धो येषां ते तथा तान् । अपाङ्गमात्रेण सृष्ट्यादिकरणादिति भावः । कमलायै दत्तशेषान् अपाङ्गान् अपाङ्गनिरीक्षणानि च वितरति कुरुत इत्यन्वयः ॥

Colophon:

इति सङ्ग्रहरामायणभावदीपिकायामुत्तरकाण्डे अष्टमः सर्गः ॥

प्रश्नमौकपुरस्वप्रघुट्टाज्वलहनुमन्ताचार्यस्य शिष्यशेषमाधवेन कलियुगे ४९६९ रुधिरोद्गारिनामके उत्तरायणे शिशिरर्तौ माघशुद्धैकादश्यां गुरुवासरे वृषभलग्ने सम्पूर्णम् ॥

No. 11903. हंसदूतः.
HAMSADŪTAḤ.

Pages, 32. Lines, 21 on a page.

Begins on fol. 110*a* of the MS. described under No. 11829.

Complete.

This is a short poem composed in imitation of Kālidāsa's Mēghasandēśa, by Rūpagōsvāmin. Unlike other Sandēśa works, this work is written in the Śikhariṇī metre. The work describes the love-message sent by Kṛṣṇa to Rādhā.

Complete.

Beginning:

दुकूलं बिभ्राणो दलितहरितालद्युतिहरं
जपापुष्पश्रेणीरुचिरुचिरपादाम्बुजतलः ।
तमालश्यामाङ्गो दरहसितलीलाञ्चितमुखः
परानन्दाभोगः स्फुरतु हृदि मे कोऽपि पुरुषः ॥
यदा यातो गोपीहृदयमदनो नन्दसदना-
न्मुकुन्दो गान्धि(न्दि)न्यास्तनयमनुविन्दन्मधुपुरीम् ।
तदामाङ्क्षीच्चिन्तासरिति घनघूर्णापरिचयै-
रगाधायां बाधामयपयसि राधा विरहिणी ॥
कदाचित्खेदाग्निं विघटयितुमन्तर्गतमसौ
सहालीभिर्लेभे तरलितमना यामुनतटीम् ।
चिरादस्याश्चित्तं परिचितकुटीरावकलना-
दवस्थां तस्तार स्फुटमथ सुषुप्तेः प्रियसखीम् ॥

End:

प्रपन्नः प्रेमाणं भगवति सदा भागवतभाक्
पराचीनो जन्मावधि भवरसाद्भक्तिमधुरः ।
चिरं कोऽपि श्रीमान् जयति विदितः साकरतया
धुरीणो धीराणामधिधरणि वैयासकिरिव ॥
रसानामास्थानैरपरिचितदोषः सहृदयै-
र्मुरारातिक्रीडानिबिडघटनारूपसहितः ।
प्रबन्धोऽयं बन्धोरखिलजगतां तस्य सरसां
प्रमोरन्तः सान्द्रां प्रमदलहरीं पल्लवयतु ॥

Colophon:

इति श्रीरूपगोस्वामिविरचितं हंस[illegible]ताख्यकाव्यं समाप्तम् ॥

No. 11904. हंससन्देशः.
HAMSASANDĒŚAḤ.

Substance, paper. Size, 11⅝ × 7½ inches. Pages, 21. Lines, 21 on a page. Character, Telugu. Condition, pretty good. Appearance, new.

Begins on fol. 168*a*. The other works herein are Kuvalayānanda with commentary 1*a*, Kāvyādarśa 132*a*, Haṁsasandēśavyākhyā 180*a*, Rasagaṅgādhara 216*a*, Sāhityaratnākaravyākhyā 233*a*, Gītagōvinda with commentary 257*a*, Bhartṛhari-Subhāṣita 342*b*.

This is a short poem written in imitation of Kālidāsa's Mēghasandēśa. By Vēṅkaṭanātha, also known as Vēdāntadēśika. Herein Rāma after hearing of the whereabouts of Sītā from Hanūmat, sends his message through a Haṁsa (swan) to Sītā.

Beginning:

वंशे जातः सवितुरनघे मानयन् मानुषत्वं
देवः श्रीमान् जनकतनयान्वेषणे जागरूकः ।
प्रत्यायाते पवनतनये निश्चितार्थः स कामी
कल्पाकारां कथमपि निशामाविभातं विषेहे ॥
काल्ये सेनां कपिकुलपतेस्तूर्णमुद्योजयिष्यन्
दूरीभावाज्जनकदुहितुर्दूयमानान्तरात्मा ।
क्रीडारवेलं कमलसरसि क्वापि कालोपयातं
राकाचन्द्रद्युतिसहचरं राजहंसं ददर्श ॥

End:

सन्दिश्यैवं सह कपिकुलैः सेतुना लङ्घिताब्धिः
पङ्क्तिग्रीवे युधि विनिहते प्राप्य सीतां प्रतीतः ।
राज्यं भूयः स्वयमनुभवन्रक्षितं पादुकाभ्यां
रामः श्रीमानतनुत निजां राजधानीं सनाथाम् ॥

Colophon:

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्र(स्वतन्त्र)स्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु हंससन्देशे महाकाव्ये द्वितीयाश्वासः ॥

No. 11905. हंससन्देशः.
HAMSASANDĒŚAḤ.

Substance, palm-leaf. Size, 16⅝ × 1⅝ inches. Pages, 18. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work is Haṁsasandēśavyākhyā 10*a*. Complete.

Same work as the above.

No. 11906. हंससन्देशः.
HAṀSASANDĒŚAḤ.

Pages, 12. Lines, 6 on a page.

Begins on fol. 33a of the MS. described under No. 921 of the Descriptive Catalogue of Tamil MSS.

Contains the second Āśvāsa only.

Same work as the above.

No. 11907. हंससन्देशः.
HAṀSASANDĒŚAḤ.

Pages, 12. Lines, 8 on a page.

Begins on fol. 14*a* of the MS. described under No. 2575.

The fourth leaf is lost and hence the stanzas 48 to the end of the first Āśvāsa are wanting. The second Āśvāsa is complete.

Same work as the above.

No. 11908. हंससन्देशः.
HAṀSASANDĒŚAḤ.

Substance, palm-leaf. Size, 17¼ × 1¼ inches. Pages, 22. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 34*a*. The other work herein is Haṁsasandēśavyākhyā 1*a*.

Complete.

Same work as the above, and the additional stanzas found herein at the end are given below :—

विद्याशिल्पप्रगुणमनसा वेङ्कटेशेन क्लृप्तं
चिन्ताशाणोल्लिखितमसकृच्छ्रेयसां प्राप्तिहेतुम् ।
सीताहंसव्यतिकरसखं रामसन्देशरत्नं
पश्यन्त्वन्तःश्रवणमनघं चक्षुरुज्जीव्य सन्तः ॥
कवितार्किकसिंहाय(. .)वेदान्तगुरवे नमः ॥

No. 11909. हंससन्देशः, सव्याख्यः.
HAṀSASANDĒŚAḤ WITH COMMENTARY.

Pages, 17. Lines, 6 on a page.

Begins on fol. 24*a* of the MS. described under No. 921 of the Descriptive Catalogue of Tamil MSS.

Contains from the 29th stanza to the end in the first Āśvāsa.

Same work as the above, but with the commentary described under No. 11914.

No. 11910. हंससन्देशः, सव्याख्यः.

HAMSASANDEŚAH WITH COMMENTARY.

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 92. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

Same work as the above.

No. 11911. हंससन्देशः, सव्याख्यः.

HAMSASANDEŚAH WITH COMMENTARY.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 56. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Vyākaraṇaviṣaya 29*a*, Yatirājasaptati 33*a*.

In the beginning ten leaves are lost. So the fragment begins in the course of the 15th stanza and breaks off in the 55th stanza of the first Āśvāsa.

Same work as the above.

No. 11912. हंससन्देशः.

HAMSASANDEŚAH.

Pages, 40. Lines, 16 on a page.

Begins on fol. 27*a* of the MS. described under No. 11861.

Complete. Restored from the MS. described under the next number.

A work similar in form and subject-matter to the above. By Bhaṭṭavāmana. Herein a banished Yakṣa sends his love-message to his beloved, through a Haṁsa or swan.

Beginning :

सोऽहं यक्षो नियतवसतिः सौम्य कैलासशैले
नाम्ना दक्षो नलिननयना सा च कन्दर्पलेखा ।
आज्ञाभङ्गात्कुपितमनसा दत्तशापोऽस्मि राज्ञा
कामी वर्षं कमपि वनिताविप्रयुक्तो वसेति ॥
कालेन स्यान्नियतमियता सा पुनः कातराक्षी
म्लानच्छाया वनगजकरोपद्रुता वल्लरीव ।
प्रत्याश्वस्तां विरचय सखे तां वचोभिर्मदीयैः
धारै(रा)सारैरिव जलधरश्चातकीं तप्यमानाम् ॥

* * *

आकैलासादविदितचरान् स्वैरमुल्लङ्घ्य देशान्
बन्धुप्रीत्या तव जिगमिषोरीदृशीं दूरयात्राम् ।
वक्ष्ये मार्गं वनगिरिपुरीवाहिनीभिर्विभक्तं
श्रोता हि त्वं तदनु सुदृशः सौम्य सन्देशवार्ताम् ॥
पूर्वं वाचा कलमधुरया शश्वदामन्त्र्य बन्धून्
पाथेयं च प्रकृतिमृदुलं कल्पयित्वा मृणालीम् ।
ध्यात्वा हंसं तव कुलगुरुं (तं) विरिञ्चौपवाह्यं
शैलादस्माद्गगनपदवीमुच्चकैरुज्जिहीथाः ॥

* * * *

Colophon:

इति श्रीभट्टवामनस्य कृतिः पूर्वो हंससन्देशः समाप्तः ॥

End:

सेयं दीर्घा विरहरजनी हन्त किंचिद्विभाता
शापस्यान्तः सपदि भविता वासरैः कैश्चिदेव ।
मासावेतौ (गमय) तदनु प्राप्य भोक्ष्यावहे तान्
भोगानिष्टान् रजनिषु परं प्रौढचन्द्रातपासु ॥
कृत्वा कार्यं मम पुनरिदं कीर्तिमेनां च लब्ध्वा
प्रत्यावृत्तः पुनरपि (सखे का)न्तया सङ्गतः सन् ।
चेतोरम्ये विहर सलिले स्वेच्छया निम्नगाना-
मव्यापन्ना विहग युवयोरस्तु. संयोगलक्ष्मीः ॥

Colophon:

इति भट्टवामनस्य कृतिः हंससन्देशः समाप्तः ॥

मैत्रीं येन मनोभवो विरचयन् विश्वं जयत्यञ्जसा
येनोद्दीपनकारिणा विजयते शृङ्गारनामा रसः ।
र . . . . णाश्चकोरपरिषत्सौहित्यनाडिन्धमः
सोऽयं वः सुखमातनोतु जगतामानन्दनश्चन्द्रमाः ॥

No. 11913. हंससन्देशः.

HAṀSASANDEŚAḤ.

Substance, palm-leaf. Size, 16¼ × 1½ inches. Pages, 21. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old. Complete.

Same work as the above.

This is the original of the MS. described under the previous No.

No. 11914. हंससन्देशव्याख्या.
HAMSASANDĒŚAVYĀKHYĀ.

Pages, 68. Lines, 20 on a page.

Begins on fol. 180*a* of the MS. described under No. 11904.

Complete.

A commentary on the Haṁsasandēśa of Vēdāntadēśika, described under No. 11904. It was composed apparently by a disciple of Śrīnivāsaguru of Kauśikagōtra who was himself the disciple of Lakṣmaṇārya and of Śrīnivāsārya of Vādhūlagōtra. The latter is said to have been a disciple of Mahācārya and son of Dēvarājaguru.

Beginning:

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥
महादेशिकसम्प्राप्तवेदान्तद्वयमाश्रये ।
वाधूलश्रीनिवासार्यं देवराजगुरोः सुतम् ॥
वाधूलश्रीनिवासार्यात्प्राप्तवेदान्तसम्पदम् ।
लक्ष्मणार्यदयापात्रं श्रीनिवासगुरुं भजे ॥
वेदान्ताचार्यमहं विविधासङ्ख्येयगुणगणैर्जुष्टम् ।
वन्दे तत्कृतहंससन्देशश्लोकविवरणं कुर्वन् ॥
वाधूलश्रीनिवासार्यं कुशिकान्वयजं गुरुम् ।
उभौ नत्वा प्रवक्ष्यामि हंससन्देशटिप्पणीम् ॥
महाचार्यपदद्वन्द्वकृपामालम्ब्य भक्तितः ।
विवृणोमि यथाप्रज्ञं हंससन्देशमुत्तमम् ॥

श्रीमान् वेङ्कटनाथार्यः स्वशिष्यानुजिघृक्षया पुरातनकाव्यसन्देशादीनां वक्तृविषयवैलक्षण्याभावाद्विषयादिवैलक्षण्यविशिष्टं हंससन्देशमकरोत् । अस्मिन् सन्देशे रामो माल्यवत्पर्वते स्थितः सन् मारुतिना सीतादर्शनानन्तरं सीताश्वासनार्थं तत्र सरसि स्थितं हंसं दृष्ट्वा प्रेषयति । तत्र प्रथमश्लोके स्वयमपि श्रिया नित्यसंश्लेषयुक्तोऽपि मनुष्यभावमभिनयन् कामुकभावमन्वभूदित्याह—वंश इति । आदौ मगणप्रयोगात् तस्य पृथिवीदैवत्यत्वाद्ग्रन्थस्य तदध्येतॄणां च स्थैर्यं सिध्यति । वकारस्यामृतबीजस्यादौ प्रयोगात् प्रबन्धे मङ्गलत्वसिद्धिः । रघुनाथविषयत्वादर्थतोऽपि मङ्गलत्वम् ।

सवितुरनघे वंशे जातः । सवितुर्वंशस्यानघत्वं रामावतारात् । जात इत्यनेन जननस्य मिथ्यात्वराहित्यं व्यनक्ति । सवितुरित्यनेन जगत्प्रकाशवंश इति द्योत्यते । मानुषत्वं मानयन् बहुमन्यमानः । अनेन "आत्मानं मानुषं मन्ये" इति वचनं स्मार्यते । देवः श्रीमानिति पदद्वयेन परत्वं लक्ष्मीविशिष्टत्वं(च) सूचयति । एभिः पदैरवतारसत्यत्वमित्याद्यर्थोऽनुसंहितः ।

End:

युधि युद्धे । पङ्क्तिग्रीवे दशमुखे । विनिहते विनष्टे सति । सीतां प्राप्य जनकतनयामवाप्य । पादुकाभ्यां रक्षितं पालितम् । राज्यं देशम् । भूयः पुनरपि । स्वयमनुभवन् स्वयमेवानुपालयन् । श्रीमानिति प्रयोगे महत्त्वम् । सीताविरहरहितः । निजां स्वकीयाम् । राजधानीं पट्टणम् । सनाथामतनुत नाथसहितां कृतवान् । तनु विस्तारे । लङ् ॥

Colophon:

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु हंससन्देशे द्वितीयसन्देशव्याख्या समाप्ता ॥

No. 11915. हंससन्देशव्याख्या.
HAṀSASANDĒŚAVYĀKHYĀ.

Pages, 6&. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 11908.

Complete.

Same commentary as the above, but with slight difference here and there.

Beginning:

वेदान्ताचार्यमहं विविधासङ्ख्येयगुणगणाम्बुनिधिम् ।
वन्दे तत्कृतहंससन्देशश्लोकविवरणं कुर्वन् ॥

महाचार्यपदद्वन्द्वकृपामालम्ब्य भक्तितः ।
विवृणोमि यथाप्रज्ञं हंससन्देशमुत्तमम् ॥

श्रीमान् वेङ्कटनाथार्यः शिष्यानुजिघृक्षया इतरकाव्यसन्देशादीनां वक्तृविषयवैलक्षण्याभावात् विषयवैलक्षण्यविशिष्टं हंससन्देशमकरोत् । तत्र सन्देशे रामः माल्यवत्पर्वते स्थितः सन् मारुतिना सीतादर्शनानन्तरं सीताश्वासनार्थं तत्र सरसि स्थितं हंसं दृष्ट्वा प्रेरयति । तत्र प्रथमश्लोके स्वयं

परवासुदेवोऽपि श्रियः नित्यसंश्लेषयुक्तोऽपि मनुष्यभावमभिनयन् कामुकभावमनसो(न्व)भूदित्याह—वंश इति ।

End:

विद्येति । सन्तः सत्पुरुषाः । विद्याशिल्पप्रगुणमनसा विद्यारूपशिल्पं तेन प्रकृष्टचित्तेन वेङ्कटेशेन वेदान्ताचार्येण कृतं विरचितम्

* * * *

अन्तःश्रवणं पश्यन्तु अन्तःश्रवणेनावलोकयन्तु दृशिर्प्रेक्षण इति धातोर्लोट् ॥

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्रङ्गराजदत्तश्रुत्यन्ताचार्यकस्य यतिवरसिद्धान्तिनामनन्यजीवस्य श्रीमद्वेङ्कटनाथस्य कृतिषु वक्तृवलक्षण्यविषयवैलक्षण्याविशिष्टस्य महतां महनीयस्य बालव्युत्पत्तिसाधनस्य हंससन्देशस्य व्याख्यायां द्वितीयाश्वासः ॥

No. 11916. हंससन्देशव्याख्या.

HAMSASANDEŚAVYĀKHYĀ.

Pages, 50. Lines, 7 on a page.

Begins on fol. 10*a* of the MS. described under No. 11905.

Complete.

Same work as the above.

---

3. ŚṚṄGĀRAKĀVYA.

No. 11917. अमरुशतकम्.

AMARUŚATAKAM.

Pages, 21. Lines, 20 on a page.

Begins on fol. 523*a* of the MS. described under No. 1860.

Complete.

A centum of stanzas illustrating the sentiment of love in its various aspects. This work is, according to a popular tradition, attributed to King Amaru. Vide M. Seshagiri Sastri's Report, No. 2, page 47.

Beginning:

ज्याकृष्टिबद्धख(क)टकामुखपाणिपृष्ठप्रेङ्खन्नखांशुचयसंवलितोऽम्बिकायाः ।
त्वां पातु मञ्जरितपल्लवकर्णपूरलोभभ्रमद्भ्रमरविभ्रमभृत् कटाक्षः ॥
क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोऽंशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण ।

आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामी वार्द्रापराधः स दहतु दुरितं शाम्भवो व शराग्निः ॥
आलोलामलकावलीं विलुलितां बिभ्रच्चलत्कुण्डलं
किञ्चिन्मृष्टविशेषकं तनुतरैः स्वेदाम्भसः शीकरैः ।
तस्या यत्सुरतान्ततान्तनयनं वक्त्रं रतिव्यत्यये
तत्त्वां पातु चिराय किं हरिहरब्रह्मादिभिर्दैवतैः ॥

End:

तन्वी शरत्त्रिपथगा पुलिने कपोलौ लोले दृशौ रुचिरचञ्चलखञ्जरीटौ ।
तद्बन्धनाय सुचिरार्पितसुभ्रुचापचाण्डालपाशयुगलाविव शून्यकर्णौ ॥
हारोऽयं हरिणाक्षीणां लुठति स्तनमण्डले ।
मुक्तानामप्यवस्थेयं के वयं स्मरकिंकराः ॥

Colophon:

इत्यमरुशतकं परिपूर्णम् ॥

No. **11918.** अमरुशतकम्.

AMARUŚATAKAM.

Pages, 10. Lines, 7 on a page.

Begins on fol. 66*a* of the MS. described under No. 9358.

Contains the first 58 stanzas only.

Same work as the above.

No. **11919.** अमरुशतकम्.

AMARUŚATAKAM.

Substance, paper. Size, 8½ × 7 inches. Pages, 5. Lines, 25 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 24*a*. The other work herein is Amaruśataka with commentary 1*a*.

Contains from the 60th stanza to the 100th stanza.

Same work as the above.

No. **11920.** अमरुशतकम्, आन्ध्रटीकासहितम्.

AMARUŚATAKAM WITH TELUGU COMMENTARY.

Substance, palm-leaf. Size, 13¼ × 1¼ inches. Pages, 44. Lines, 7 on a page. Character, Kanarese. Condition, good. Appearance, new.

Contains the first 91 stanzas only.

Same work as the above, but with Telugu commentary.

No. 11921. अमरुशतकम्, सव्याख्यानम्.
AMARUŚATAKAM WITH COMMENTARY.

Substance, paper. Size, $9\frac{1}{8} \times 7\frac{3}{8}$ inches. Pages, 119. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 80*b*. The other works herein are Viśvaguṇādarśa 1*a*, Prahasana 145*a*, Mukundānandabhāṇa 177*a*.

The text is the same as the above; the commentary called Śṛṅgāradīpikā is by Pedda Kōmaṭi Vēmabhūpāla also known as Vīranārāyaṇa. The plan of the commentary is given in three stanzas in the introduction.

Beginning:

वन्दे वैकुण्ठसेनान्यं देवं सूत्रवतीसखम् ।
यद्वेत्राशिखरस्पन्दे विश्वमेतद्व्यवस्थितम् ॥
आसीच्चतुर्थान्वयचक्रवर्ती वेमक्षितीशो जगदेकवीरः ।
एकादशेति प्रतिभाति शङ्का येनावतारः परमस्य पुंसः ॥
अमरुककविना रचितां शृङ्गाररसात्मिकां शतश्लोकीम् ।
श्रुत्वा विकसितचेतास्तदभिप्रायं प्रकाशनं नेतुम् ॥
मूलश्लोकान् समाहृत्य प्रक्षिप्तान् परिहृत्य च ।
विधत्ते विदुषामिष्टां टीकां श्रृङ्गारदीपिकाम् ॥
अवतारोऽथ सम्बन्धोऽभिप्रायो भावलक्षणम् ।
नायिका तदवस्थाश्च नायकश्च ततो रसः ॥
अङ्गानि कैशिकीवृत्तेरलङ्कारस्ततः क्रमात् ।
इत्येतानि प्रवक्ष्यन्ते यथासम्भवमञ्जसा ॥

अत्र कविस्तावदविघ्नेन ग्रन्थपरिसमाप्त्यर्थमिष्टदेवतास्मरणद्वारेणाशिषं प्रयुङ्क्ते—

ज्याकृष्टिबद्धकटकामुखपाणिपृष्ठप्रेङ्खन्नखांशुचयसंवलितो मृडान्याः।
त्वां पातु मञ्जरितपल्लवकर्णपूरलोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः ॥

मृडान्याः दुर्गायाः कटाक्षः आपाङ्गदर्शनं त्वां पात्विति सम्बन्धः । कीदृशः कटाक्षः । ज्याकृष्टिबद्धकटकामुखपाणिपृष्ठप्रेङ्खन्नखांशुचयसंवलितः ज्याकृष्टये बद्धकटकामुखपाणिः कटकामुखो नाम धनुराकर्षणहस्तविशेषः । तदुक्तम् ।

तर्जनीमध्यमामध्ये पुङ्खोऽङ्गुष्ठेन पीड्यते ।
यस्मिन्ननामिकायोगात्स हस्तः कटकामुखः ॥

तस्य पृष्ठे पश्चाद्भागे प्रेङ्खन्तश्चलन्तः नखानामंशवः तेषां चयः समूहस्तेन संवलितो मिश्रितः। पुनः कीदृशः मञ्जरितपल्लवकर्णपूरलोभभ्रमद्भ्रमरविभ्रमभृत् मञ्जरितः संजातमञ्जरीकृतः; तदस्य संजातं तारकादिभ्य इतजिति इतच्प्रत्ययः। मञ्जरितश्चासौ पल्लवश्च स एव कर्णपूरः कर्णावतंसः तत्र लोभेन स्पृहया भ्रमन् (यः) भ्रमरः तस्य विभ्रमलीलां बिभर्तीति विभ्रमभृत्; अत्र उपमालंकारः—नखांशुचयमञ्जर्योः पाणिपल्लवयोः कटाक्षभ्रमरयोश्च सादृश्यप्रतीतेर्विद्यमानत्वात्। 'यथा कथं चित् सादृश्यं यत्रोद्भूतं प्रतीयते। उपमा नाम सेत्युक्ता' इत्युक्तत्वात्। अत्र कविः शृङ्गाररसात्मकं काव्यं प्रारभमाणः आदौ वीररसाभिव्यञ्जिकां देव्या धनुराकर्षणक्रियां किमर्थमुक्तवानिति नाशङ्कनीयम्, यतः शृङ्गाररसात्मिकाया एव वश्यमुखीसंज्ञायाः देव्याः ध्यानं विवक्षितवान्। उक्तं च त्रिपुरासारासिन्धौ—

सन्धाय सुमनोबाणं कर्षन्तीमैक्षवं धनुः।
जगज्जैत्रीं जपारक्तां देवीं वश्यमुखीं भजे॥

End:

सालक्तकेन नवपल्लवकोमलेन पादेन नूपुरवता मदलालसेन।
यस्ताड्यते दयितया प्रणयापराधात् सोऽङ्गीकृतो भगवता मकरध्वजेन॥

स्पष्टोऽर्थः। अत्र दयितापादेन ताडितोऽपि भगवता मकरध्वजेनाङ्गीकृत इत्यनेनान(या)उपलालिताः किमुतेत्ययमर्थः सूचितः। एतावता कामपुरुषार्थस्योपादेयत्वमु(क्तम्)॥

Colophon:

इति श्रीवीरनारायणसकलविद्याविशारदपेदकोमटिवेमभूपालविरचिता शृङ्गारदीपिका समाप्ति(:)त्ता।

No. 11922. अमरुशतकम्, सव्याख्यानम्.

AMARUŚATAKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 18⅞ × 1½ inches. Pages, 96. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 18*a*. The other work herein is Kavirākṣasīya with commentary 1*a*.

Almost complete.

Same work as the above.

Copying was finished on Sunday, the 5th day of Māgha Śuddha of Durmukhi, by Dharmayya for Charla Nārāyaṇa.

No. 11923. अमरुशतकम्, सव्याख्यानम्.
AMARUŚATAKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 15¾ × 1⅝ inches. Pages, 117. Lines, 9 on a page. Character, Grantha. Condition, fair. Appearance, old.

Complete.

Same work as the above.

No. 11924. अमरुशतकम्, सव्याख्यानम्.
AMARUŚATAKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 17 × 1⅝ inches. Pages, 40. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains from the 26th stanza to the 84th stanza.

Same work as the above.

No. 11925. अमरुशतकम्, सव्याख्यानम्.
AMARUŚATAKAM WITH COMMENTARY.

Substance, palm-leaf. Size. 17 × 1⅝ inches. Pages, 20. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the first 24 stanzas only.

Same work as the above.

No. 11926. अमरुशतकम्, सव्याख्यानम्.
AMARUŚATKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 15¾ × 1¼ inches. Pages, 71. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, new.

Complete.

Same work as the above.

No. 11927. अमरुशतकम्, सव्याख्यानम्.
AMARUŚATAKAM WITH COMMENTARY.

Substance, (Śrītāla). Size, 9 × 1¾ inches. Pages, 40. Lines, 10 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Gītagōvindavyākhyā: Śāradīpikā: 21*a*.

Contains the first 28 stanzas only.

Same work as the above, but with certain additional stanzas which are given below. The genealogy of Vēmabhūpāla is herein given thus:

Mācabhūpa, elder brother of Vēmabhūpāla

- Reḍḍipōta
- Kōmaṭīndra
  - Vēmabhūpa
  - Mācabhūpa.
- Nāgabhūpa

Beginning :

अन्योन्यमेलनवशात् प्रथमं प्रवृद्धं
मध्ये मनाग्व्यवहितं च कुतोऽपि हेतोः ।
प्राप्तं दशामथ मनोरथमावयोग्यां
पायाच्चिरं रतिमनोभवयोः सुखं वः ॥
आसीच्चतुर्थान्वयचक्रवर्ती वेमक्षितीशो जगरक्षपाल(देकवीर): ।
एकादशेति प्रथयन्ति शङ्कां येनावताराः प्रथमस्य पुंसः ॥
राज्यं वेमः सुचिरमकरोत्प्राज्यहेमाद्रिदानो
भूमीदेवैर्भुवमुरुभुजो भुक्तशेषामभुङ्क्त ।
श्रीशैलाग्रात् प्रभवति पथि प्राप्तपाता . . .
सोपानानि प(प्र)थमपदवीमारुरुक्षुश्चकार ॥
माचक्षोणिपतिर्महेन्द्रमहिमा वेमक्षितीशाग्रजः
हेमाद्रेः सदृशो बभूव सुगुणैस्तस्य त्रयो नन्दनाः ।
कीर्त्या जाग्रति रेड्डिपोतनृपतिः श्रीकोमटीन्द्रस्ततो
नागक्ष्मापतिरित्युपात्तवपुषो धर्मार्थकामा इव ॥
वेमाधिपो माचविभुश्च नन्दनौ श्रीकोमटीन्द्रस्य गुणैकसंश्रयौ ।
भूलोकमेकोदरजन्मवाञ्छया भूयोऽवतीर्णाविव रामलक्ष्मणौ ॥
स वेमभूपः सकलासु विद्यास्वतिप्रगल्भो जगमोब्बगण्डः ।
कदाचिदास्थानगतः कवीनां काव्यामृतास्वादपरः प्रसक्तान् ॥
अमरुककविना रचितां (. .) प्रकाशतां नेतुम् ॥

No. 11928. अमरुशतकम् , सव्याख्यानम्.

AMARUŚATAKAM WITH COMMENTARY.

Substance, palm-leaf (Śrītāla). Size, 13⅝ × 1¾ inches. Pages, 30. Lines, 7 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Contains the first 84 stanzas only.

Same work as the above.

This codex is very fragmentary as it is composed of stray leaves.

No. 11929. अमरुशतकम् , सव्याख्यानम्.

AMARUŚATAKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 13¼ × 1¼ inches. Pages, 90. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the first 65 stanzas.

Same work as the above.

No. 11930. अमरुशतकम्, सव्याख्यानम्.

AMARUŚATAKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 17⅞ × 1¼ inches. Pages, 156. Lines, 7 on a page. Character, Grantha. Condition, fair Appearance, old.

Breaks off in the 99th stanza.

Same work as the above.

Part of the 35th folio and the whole of the 36th folio are left blank.

The manuscript is said to have belonged to one Dēśikadāsa.

No. 11931. अमरुशतकम् , सव्याख्यानम्.

AMARUŚATAKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 15½ × 1½ inches. Pages, 92. Lines, 9 on a page. Character, Grantha. Condition, fair. Appearance, old.

Complete.

Same work as the above.

No. 11932. अमरुशतकम् , सव्याख्यानम्.

AMARUŚATAKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 16⅝ × 1½ inches. Pages, 118. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Mālavikāgnimitra-vyākhyā 60*a*.

Complete.

Same work as the above.

No. 11933. अमरुशतकम् , सव्याख्यानम्.

AMARUŚATAKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 15⅝ × 1¼ inches. Pages, 119. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Begins on fol. 1*a* The other work herein is Bhartṛharisubhāṣitam 61*a*.

Contains 84 stanzas only.

Same work as the above.

No. 11934. अमरुशतकम् , सव्याख्यानम्.

AMARUŚATAKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 17⅝ × 1⅝ inches. Pages, 106. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 153*a*. The other works herein are Vāsavadattā 1*a*, Narakāsuravijayavyāyōga 46*a*, Pratāparudrīya 64*a*, Bhartṛharisubhāṣitavyākhyā 120*a*, Nighaṇṭuviśēṣa 206*a*.

Contains from the third stanza to the end of the work.

Same work as the above.

No. 11935. अमरुशतकम् , सव्याख्यानम्.

AMARUŚATAKAM WITH COMMENTARY.

Pages, 47. Lines, 25 on a page.

Begins on fol. 1*a* of the MS. described under No. 11919.

Contains the first 59 stanzas.

Same work as the above.

No. 11936. कुचशतकम्.

KUCAŚATAKAM.

Pages, 15. Lines, 18 on a page.

Begins on fol. 41*a* of the MS. described under No. 4470.

A centum of stanzas describing the physical charms of a woman.

Beginning:

जननि जलधिकन्ये जायतां श्रेयसे मे जलरुहमयमालाजातसौहार्दबन्धा ।
सकलकुशलसूतिः संसृतिक्लेशहन्त्री समनुगतकृपा ते सादरालोकधारा ॥
विविधविधि[वि]पाकयोगात्सति सद्यस्तनमहीभृदवपाते ।
तस्मै करं दिशेत्कः तत्र पुरा सुखकरप्रसारोऽपि ॥
यो हि पतितापचरितं दूरीकुरुते सुवृत्त एव कुचः ।
मुक्तोपमस्य धन्या लोकाः क्षम(क्षाम्य)न्ति नरकरहितस्य ॥

End:

नीरन्ध्रभवनिशीथे यः श्रीकान्तं पयोधराभिख्यम् ।
वस्तु किमपि स्वपुण्यैः पश्येत्तस्योदियात्किमहरंशिः ॥

Colophon:

इति कुचशतकम् ॥

The scribe adds—

इत्यस्तोकाध्वरिकाविविद्वन्मणिकाश्चिघठाम्बु - अल्लुण्डु - अरशाणिपाला - आत्रेयश्रीनिवासाचार्येण लिखितं कुचशतकम् ॥

No 11937. गीतगोविन्दम्.
GĪTAGŌVINDAM.

Pages, 49. Lines, 20 on a page.

Begins on fol. 463(*a*) of the MS. described under No. 1800.

By Jayadēva. Same work as that described under No. 22 of M. Seshagiri Sastri's Report on a Search for Sanskrit and Tamil MSS., No. 2.

The title headings of the 12 Sargas into which the work is divided are given in the MS.

Beginning:

गीतगोविन्दे सामोददामोदरः ॥

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमैः
नक्तं भीरुरयं त्वमेव तमिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ॥
वाग्देवताचरितचित्रितचित्तसद्मा पद्मावतीचरणचारणचक्रवर्ती ।
श्रीवासुदेवरतिकेलिकथासमेतमेतं करोति जयदेवकविः प्रबन्धम् ॥

इति श्रीगीतगोविन्दे सामोददामोदरो नाम प्रथमः सर्गः ॥

* * * *

इति श्री . . . . अक्लेशकेशवो नाम द्वितीयः सर्गः ॥

* * * *

इति श्री . . . . मुग्धमाधवो नाम तृतीयः सर्गः ॥

* * * *

इति श्री . . . . स्निग्धमधुसूदनो नाम चतुर्थः सर्गः ॥

* * * *

इति श्री . . . . अभिसारिकावर्णने साकाङ्क्षपुण्डरीकाक्षो नाम पञ्चमः सर्गः ॥

* * * *

इति श्री . . . . वासकसज्जिकावर्णने धृष्टवैकुण्ठो नाम षष्ठः सर्गः ॥

* * * *

इति श्री . . . . विप्रलब्धावर्णने नागरनारायणो नाम सप्तमः सर्गः ॥

* * * *

इति श्री . . . . खण्डितावर्णने विलक्षलक्ष्मीपतिर्नामाष्टमः सर्गः ॥

* * * *

इति श्री . . . . कलहान्तरितावर्णने मुग्धमुकुन्दो नाम नवमः सर्गः ॥

* * * *

इति श्री . . . . मानिनीवर्णने चतुरचतुर्भुजो नाम दशमः सर्गः ॥

* * * *

इति श्री . . . . राधिकामिलने सानन्ददामोदरो नामैकादशः सर्गः ॥

End:

यद्गन्धर्वकलासु कौशलमनुध्यानं च यद्वैष्णवं
यच्छृङ्गारविवेकतत्त्वमपि यत्काव्येषु लीलायितम् ।
तत्सर्वं जयदेवपण्डितकवेः कृष्णैकतानात्मनः
सानन्दाः परिशोधयन्तु सुधियः श्रीगीतगोविन्दतः ॥
श्रीभोजदेवप्रभवस्य रामादेवीसुतश्रीजयदेवकस्य ।
पराशरादिप्रियवर्गकण्ठे श्रीगीतगोविन्दकवित्वमस्तु ॥

Colophon:

इति श्रीगीतगोविन्दे स्वाधीनभर्तृकावर्णने सुप्रीतपीताम्बरो नाम द्वादशः सर्गः ॥

No. 11938. गीतगोविन्दम्.
GĪTAGŌVINDAM.

Substance, palm-leaf. Size, 18 × 1¼ inches. Pages, 55. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Same work as the above.

No. 11939. गीतगोविन्दम्.
GĪTAGŌVINDAM.

Substance, palm-leaf. Size, 15¾ × 1⅝ inches. Pages, 15. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 52*a*. The other works herein are Anyāpadēśa 1 and 39*a*, Vairāgyaśataka 20*a*, Sabhārañjana 26*a*, Nītiśataka 33*a*, Cāṭuślōka 59*b*.

Incomplete.

Same work as the above.

No. 11940. गीतगोविन्दम्.
GĪTAGŌVINDAM.

Substance, palm-leaf. Size, 7⅞ × 1 inches. Pages, 134. Lines, 4 on a page. Character, Kanarese. Condition, much injured. Appearance, new.

Contains the Sargas one to ten complete and again the seventh Sarga.

Same work as the above.

No. 11941. गीतगोविन्दम्.
GĪTAGŌVINDAM.

Pages, 10. Lines, 11 on a page.

Begins on fol. 10*a* of the MS. described under No. 4756.

Contains the Sargas two to ten, but wants five stanzas in the beginning of the second Sarga and the end in the tenth Sarga.

Same work as the above.

No. 11942. गीतगोविन्दम्.
GĪTAGŌVINDAM.

Substance, palm-leaf. Size, 15¾ × ¾ inches. Pages, 58. Lines, 4 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above.

Copying was finished on Wednesday, the 9th day of Kṛttikāśuddha in the year Nala. It was copied by Subbarāyuḍu of Śrīvilliputtūr for Kuṭṭiyya.

No. 11943. गीतगोविन्दम्.
GĪTAGŌVINDAM.

Substance, palm-leaf. Size, 10½ × 1¼ inches. Pages, 32. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the Sargas one to four complete, and the fifth incomplete.

Same work as the above.

No. 11944. गीतगोविन्दम्, महाराष्ट्रभाषाटीकासहितम्.
GĪTAGŌVINDAM WITH MARATHI COMMENTARY.

Substance, paper. Size, 9⅝ × 4¾ inches. Pages, 173. Lines, 9 on a page. Character, Dēvanāgarī. Condition, slightly injured. Appearance, new.

Complete.

Same work as the above, but with Marathi commentary.

Copying completed on the full-moon day of the Kārttika month in Samvat 1801.

No. 11945. गीतगोविन्दम्, आन्ध्रटीकासहितम्.
GĪTAGŌVINDAM WITH TELUGU COMMENTARY.

Pages, 135. Lines, 24 on a page.

Begins on fol. 59*a* of the MS. described under No. 11319

Complete.

The text with a commentary in Telugu called Bālikābōdhikā.

No. 11946. गीतगोविन्दम, आन्ध्रटीकासहितम्.
GĪTAGŌVINDAM WITH TELUGU COMMENTARY.

Substance, palm-leaf. Size, 13 × 1¾ inches. Pages, 82. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Contains the first Sarga incomplete.

The same text as the above, but with a different Telugu commentary.

No. 11947. गीतगोविन्दम्, श्रुतिरञ्जनीव्याख्यासहितम्.
GĪTAGŌVINDAM WITH THE COMMENTRAY
ŚRUTIRAÑJANĪ.

Substance, palm-leaf. Size, 16 × 1⅜ inches. Pages, 116. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

The text is the same as the above and the commentary is by Lakṣmaṇasūri which commentary is described under No. 22 of M. Seshagiri Sastri's Report, No. 2

Contains the Sargas one to six complete.

Copying was finished by Avasarāla Veṅkaṭarāyan on Tuesday (?) (Jayavāra), the seventh of Mākha Bahula of Pārthiva year.

No. 11948. गीतगोविन्दम्, श्रुतिरञ्जनीव्याख्यासहितम्.
GĪTAGŌVINDAM WITH THE COMMENTARY
ŚRUTIRAÑJANĪ.

Substance, palm-leaf. Size, 16½ × 1⅛ inches. Pages, 128. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the Sargas 7 to 12.

Same work as the above.

No. 11949. गीतगोविन्दम्, श्रुतिरञ्जनीव्याख्यासहितम्.
GĪTAGŌVINDAM WITH THE COMMENTARY
ŚRUTIRAÑJANĪ.

Substance, paper. Size, 12⅝ × 8½ inches. Pages, 244. Lines, 23 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Same work as the above.

Copying was made by Ceṭṭa Rāmācārlu and Vāraṇāsi Rāmasvāmi, the copying having been completed on the 22nd May 1832.

No. 11950. गीतगोविन्दम्, श्रुतिरञ्जनीव्याख्यासहितम्.
GĪTAGŌVINDAM WITH THE COMMENTARY
ŚRUTIRAÑJANĪ.

Substance, paper. Size, 9½ × 7½ inches. Pages, 77. Lines, 25 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Contains the Sargas eight to ten, the tenth being incomplete and one to three thereafter, the beginning being wanting in the first Sarga.

Same work as the above.

No. 11951. गीतगोविन्दम्, श्रुतिरञ्जनीव्याख्यासहितम्.
GĪTAGŌVINDAM WITH THE COMMENTARY ŚRUTIRAÑJANĪ.

Substance, palm-leaf. Size, 15⅝ × 1¼ inches. Pages, 195. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Caṭuślōka 99*a*.

Complete.

Same work as the above, but with a different colophon which attributes the authorship of the commentary to Tirumalarāya, son of Śri-Raṅgarāja of Ātrēyagōtra.

Colophon:

इति श्रीमदखिलदेवतासार्वभौमश्रीरघुनाथपादुकाप्रसादलब्धसकलसाम्राज्यसोमान्वयाभरणधरणीधरात्रेयगोत्रपवित्रश्रीरङ्गराजसत्पुत्रतिरुमलराजविरचितायां गीतगोविन्दव्याख्यायां श्रुतिरञ्जनीसमाख्यायां स्वाधीनभर्तृकावर्णने पीताम्बरो नाम द्वादशः सर्गः ॥

दुर्मत्यब्दे चैत्रकृष्णदशमीबुधवासरे ।
व्यालिखत् . . . . . संमोदात् श्रुतिरञ्जनी(म्) ॥

No. 11952. गीतगोविन्दम्, श्रुतिरञ्जनीव्याख्यासहितम्.
GĪTAGŌVINDAM WITH THE COMMENTARY ŚRUTIRAÑJANĪ.

Substance, palm-leaf. Size, 15½ × 1⅜ inches. Pages, 32. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains the Sargas 11 without the beginning and 12 without the end.

Same work as the above.

No. 11953. गीतगोविन्दम्, श्रुतिरञ्जनीव्याख्यासहितम्.
GĪTAGŌVINDAM WITH THE COMMENTARY RUTIRAÑJANĪ.

Substance, palm-leaf. Size, 15⅝ × 1¼ inches. Pages, 184. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains the Sargas one to nine complete and the tenth incomplete. In the first Sarga 21 leaves are lost.

Same work as the above.

No. 11954. गीतगोविन्दम्, श्रुतिरञ्जनीव्याख्यासहितम्.
GĪTAGŌVINDAM WITH THE COMMENTARY ŚRUTIRAÑJANĪ.

Substance, palm-leaf. Size, 15½ × 1⅝ inches. Pages, 80. Lines, 9 on a page. Character, Telugu. Condition, fair. Appearance, old.

Contains the Sargas one to five complete and one leaf in the sixth Sarga.

Same work as the above.

No. 11955. गीतगोविन्दम्, श्रुतिरञ्जनीव्याख्यासहितम्.
GĪTAGŌVINDAM WITH THE COMMENTARY ŚRUTIRAÑJANĪ.

Substance, palm-leaf. Size, 16⅞ × 1½ inches. Pages, 44. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 104*a*. The other work herein is Vaidyaviṣaya with Kanarese commentary 1*a*.

Contains the first Sarga incomplete

Same work as the above.

No. 11956. गीतगोविन्दम्, श्रुतिरञ्जनीव्याख्यासहितम्.
GĪTAGŌVINDAM WITH THE COMMENTARY ŚRUTIRAÑJANĪ.

Pages, 44. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 2155

Breaks off in the second Sarga.

Same work as the above.

Seven folios from the 25th deal with Svaras.

No. 11957. गीतगोविन्दम्, श्रुतिरञ्जनीव्याख्यासहितम्
GĪTAGŌVINDAM WITH THE COMMENTARY ŚRUTIRAÑJANĪ

Substance, palm-leaf. Size, 16¾ × 1⅝ inches. Pages, 263. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the Sargas 1 to 10 complete and the 11th incomplete.

Same work as the above.

No. 11958. गीतगोविन्दम्, श्रुतिरञ्जनीव्याख्यासहितम्.
GĪTAGŌVINDAM WITH THE COMMENTARY ŚRUTIRAÑJANĪ.

Substance, palm-leaf. Size, 17¾ × 1⅝ inches. Pages, 196. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Complete.

Same work as the above.
Copied by Īyuṇṇi Śrīnivāsācārya.

No. 11959. गीतगोविन्दम्, श्रुतिरञ्जनीव्याख्यासहितम्.
GĪTAGŌVINDAM WITH THE COMMENTARY
ŚRUTIRAÑJANĪ.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 88. Lines, 8 on a page. Character, Grantha. Condition, fair. Appearance, old.
Contains the Sargas 1 to 10 complete, and the 11th incomplete.
Same work as the above.

No. 11960. गीतगोविन्दम्, श्रुतिरञ्जनीव्याख्यासहितम्.
GĪTAGŌVINDAM WITH THE COMMENTARY
ŚRUTIRAÑJANĪ.

Substance, paper. Size, 12 × 8 inches. Pages, 230. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, new.

Written on one side of paper. On the other side corrections and different readings are noted.
Complete.
Same work as the above.
This copy is said to have been made from a MS. got from Bandar by Dēvarakoṇḍa Vīrēśvarasudhī, under the orders of Charles Phillip Brown. The fly-leaf contains the following note in Sanskrit :—

सव्याख्यं गीतगोविन्दं निर्दोषयितुमिच्छताम् ।
श्रीमतां चार्लसफलीपब्रौन् प्रभुमरुत्वताम् ॥
आज्ञया देवकोण्डान्ववायवीरेश्वरः सुधीः ।
कोशानां पञ्चकं दृष्ट्वा विशेषान् परिगृह्य च ॥
दोषानपि परित्यज्य निर्दोषं कृतवान् स्वयम् ।
खरमार्गे सिते पक्षे पञ्चम्यां स्थिरवासरे ॥
गच्छत्सु शाकवत्सेषु वह्निबाणमुनीन्दुषु ।
हूणमानेन गच्छत्सु नेत्रवह्निगजेन्दुषु ॥

The MS. is dated 1832 A.D.

No. 11961. गीतगोविन्दम्, श्रुतिरञ्जनीव्याख्यासहितम्.
GĪTAGŌVINDAM WITH THE COMMENTARY
ŚRUTIRAÑJANĪ.

Pages, 148. Lines, 16 on a page.
Begins on fol. 257 of the MS. described under No. 11904.

Breaks off in the fifth Sarga.

Same work as the above.

This copy, it is said in the fly-leaf, was made from a very old copy of the work got from Trichinopoly. According to the colophon, the commentary is attributed to Tirumalarāja, son of Śrī-Raṅgarāja of Ātrēyagōtra. The colophon runs as follows :—

इति श्रीमदखिलदेवतासार्वभौमरघुरामप्रसादलब्धसकलसाम्राज्यसोमान्वयाभरणधरणीवराहात्रेयगोत्रपवित्रश्रीरङ्गराजपुत्रतिरुमलराजविरचितायां गीतगोविन्दव्याख्यायां श्रुतिरञ्जनीसमाख्यायां मुग्धमधुसूदनो नाम प्रथमः सर्गः ॥

A note in the margin says that the name of the commentator given in the colophon is wrong and that it was composed by Lakṣmaṇasūri.

No. 11962. गीतगोविन्दम्, श्रुतिरञ्जनीव्याख्यासहितम्.

GĪTAGŌVINDAM WITH THE COMMENTARY ŚRUTIRAÑJANĪ.

Substance, palm-leaf. Size, 16⅜ × ⅞ inches. Pages, 428. Lines, 4 on a page. Character, Telugu. Condition, injured. Appearance, old

Complete.

The text is the same as the above and the commentary, though identical with that of Lakṣmaṇasūri, is attributed to Tirumalarāya, son of Timmāmbā and Śri-Raṅgarāja of Ātrēyagōtra. It is known that Tirumala was the younger brother of Aliya Rāma Rāya, the son-in-law of Kṛṣṇadēva Rāya of Vijayanagar, and that after the death of Rāma in the battle of Talikōṭa in 1565 A.D. Tirumala changed the capital to Penukonda and ruled for 15 years. He is the patron of Vasucarita in Telugu. His another brother is called Vēṅkaṭādri.

The introductory verses describe the author's family and greatness.

Beginning :

उपदिशति काव्यजातं स्वमे मह्यं पितेव पुत्राय ।
यद्धाम नीरदाभं सेवे तद्भूमिपुत्रिकाहृद्यम् ॥
अस्ति सोमान्ववायेन्दु . . . .

* * * *

(रा)मराजस्ततो जज्ञे दानक्षात्रजनुर्गृहम् ।
गृहीतान्येकदा येन दश दुर्गाणि विद्विषाम् ॥

श्रीरङ्गराजक्षितिपालमौलिः तस्यात्मजः सर्वगुणाभिरामः ।
यद्वर्तनं भाविमहीपतीनामाचारशिक्षागुरुकल्पमासीत् ॥
रामोर्वीशास्तिरुमलनृपो वेङ्कटाद्रिक्षितीशः
तिम्माम्बायां जगति जनिता विश्रुतास्तेन पुत्राः ।
ये साधर्म्यं दधति धरणीपालिनामग्रगण्या
वाणीप्राणेश्वरगिरिसुताभर्तृलक्ष्मीपतीनाम् ॥
जयति तिरुमलेन्द्रस्तेषु विख्यातकीर्तिः
नमदरिनृपमौलिस्तोमनीराजिताङ्घ्रिः ।
सुगुणसुतचतुष्कन्यस्तराज्यातिभारः
कृतबुधवरविद्यागोष्ठिरत्यूर्जितश्रीः ॥
लोकालवालसौशील्यबीजादानाम्बुवर्धिता ।
सुगुणप्रसवा यस्य दिक्षु भाति यशोलता ॥
यद्बाहुना समुत्क्षिप्ता खड्गवल्लीमतल्लिका ।
शत्रुराजप्रतापाग्नेर्मणिर्भवति बन्धकः ॥
सोऽयं तिरुमलक्षोणीपतिर्गूढार्थसङ्ग्रहः(म्) ।
शृण्वन् मृदुपदं गीतगोविन्दं गान(गोचरम्) ॥
तस्यार्थदीपिकां टीकां करोति श्रुतिरञ्जनीम् ।
लोकोपकारद्वारा श्रीरामस्य प्रीतये प्रभोः ॥
न बुध्यते बुधैर्गीतगोविन्दस्यार्थगौरवम् ।
व्याख्यानशतकेनापि विहाय श्रुतिरञ्जनीम् ॥
रागद्वेषविहीनैरतिसरलैः परगुणस्तवने ।
विद्वत्कविभी रसिकैः स्तोतव्या कृतिरिह(यं) विमला ॥
रत्यलङ्कारसंगीतशब्दशास्त्रविचक्षणैः ।
विवेकपरगीर्ग्या(विलोकनीया)विद्वद्भिः व्याख्या सा श्रुतिरञ्जनी ॥

अथ खलु तत्रभवान् जयदेवनामा महाकविः सङ्गीतसाहित्यसारस्यपारदृश्वा गीतप्रबन्धनिर्माणोपदेशेन सकलपुरुषार्थसम्पादनमन्दरायमाणां गोपिकामनोहरवर्णनां मनसि निधाय चिकीर्षितस्य श्रीगीतगोविन्दाख्यस्य प्रबन्धस्य प्रचयमाशासानः

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥

इत्यालङ्कारिकवचनप्रामाण्यात्काव्यस्यानेकश्रेयस्साधनतां काव्यालापांश्च वर्जयेदित्यस्यासत्काव्यविषयतां (च) पश्यन् आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्यार्यपरिवादनमनुसरन् कात्यायनीसमाराधनाय कालिन्दीतटं प्रतिगतस्य नन्दगोपस्योक्तिव्याजेन प्राप्तं राधामाधवयोर्विहाररूपं वस्तु काव्यबीजत्वेन निर्दिशति—मेघैरिति।

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-
र्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः॥

अत्र मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्त इति न्यायेन काव्यादिपद्यादौ माङ्गलिके शब्दे प्रयोक्तव्ये सति श्रीप्रद्गुरुत्रयात्मकभूमिदेवताको मगण आदौ प्रायोजि। उक्तश्च मगणस्य श्रीप्रदत्वम्—भूमिर्मस्त्रिगुरुः श्रियं वितनुते न स्वस्त्रिलो जीविताामिति। यद्यप्यादौ मगणः स्यात्तथाप्यादौ मवर्णप्रयोगदोषोऽस्ति। तदुक्तम्—मयसुखमरणक्लेशदाहान् कुरुते क्रमादिह पवर्ग इति। शुभवर्णप्रयोगनियमोऽपि कविकण्ठपाशे कथितः—

वर्णं गणं च काव्यस्य मुखे कुर्यात्सुशोभनम्।
कर्तृनायकयोस्तेन कल्याणमुपजायते॥
अन्यथानिष्टसम्पत्तिरनयोरेव संभवेत्। इति।

समाधानन्तु जयदेवकवेर्महानुभावत्वाददोषः॥ तदुक्तं कविकण्ठपाश एव—

जगदुदयस्थितिविलयमहिताः खलु लोकविख्याताः।
शापानुग्रहकुशला देवा ऋषयो नरा ये वै॥
तेषामीश्वरसदृशां काव्यग्रथनेन लक्षणं यस्मात्।
न प्रत्यवायदोषस्तेषां तेजोविशेषेण॥

इत्यलं दोषगुणगवेषणयेत्यलम्। प्रकृतमनुसरामः—हे राधे यस्मात्कारणात् अम्बरमाकाशं मेघैर्वारिवाहैः 'अभ्रं मेघो वारि वाहः' इत्यमरः। मेदुरं निबिडं व्याप्तमिति यावत्। वर्तत इति शेषः। अत्र यत्तदोर्नित्यसंबन्धादिति

न्यायन तदिदमित्यत्र तच्छब्दस्य प्रकान्ताद्यर्थत्वाभावेन यच्छब्दसापेक्षत्वात्तत्सामर्थ्यादागतस्य यस्मादित्यस्य साधारणत्वेनागतस्य वर्तेत इत्यस्य च यथार्ह वनभुव इत्यादावन्वयोऽवगन्तव्यः । यस्मात्तमालद्रुमैः तापिञ्छतरुभिः वनभुवः मार्गस्थलविपिनभूमयश्च श्यामाः नीलवर्णा अविस्पष्टमार्गा इति यावत् । वर्तन्त इति शेषः । अत्र तमालद्रुमैरितिपदं तन्त्रेणोपात्तं द्रष्टव्यं । सकृदुच्चरितमनेकोपकारकं तन्त्रमिति तन्त्रविदः कथयन्ति । तेनायमर्थः सम्पन्नः—तमालद्रुमाः तापिञ्छतरवः, पलाशी द्रुद्रुमागमा इत्यमरः ।

End:

अधुना तु परमपुरुषार्थसाधनभूतमतीतसकलमधुरपदार्थकं सकलजनहृदयानन्दकरं जयदेववागमृतमाकलय्य न कोऽपि कटाक्षेणापि त्वां वीक्षन्त इति वापि जन्म मुधैवेति भावः । तथा च मधुरप्रियैः साच्विकैश्चैहिकामुष्मिकसुखार्थिभिः जयदेवसरस्वत्येवास्वादनीया न वस्त्वन्तरमिति भावः । यावत्तावच्छृङ्गारेति क्वचित्पाठस्तदा सुगमः ॥

Colophon:

इति श्रीमदखिलदेवतासार्वभौमरघुनाथप्रसादलब्धसकलसाम्राज्यसोमान्वयाभरणधरणीवराहात्रेयगोत्रपवित्रश्रीरङ्गराजपुत्रतिरुमलराजविरचितायां गीतगोविन्दव्याख्यायां श्रुतिरञ्जनीसमाख्यायां द्वादशः सर्गः ॥

कृत्वावतारकृत्यं पुष्पकमारुह्य सीतया साकम् ।
प्राप्यायोध्यां राज्यं चकार रामः स नः पायात् ॥
एतत्प्रबन्धनिर्मित्या या परोपकृतिस्तया ।
माल्यवत्पर्वतावासः प्रीयतां रघुनायकः ॥

No. 11963. गीतगोविन्दम् , श्रुतिरञ्जनीव्याख्यासहितम्.
GĪTAGŌVINDAM WITH THE COMMENTARY ŚRUTIRAÑJANĪ.

Substance, palm-leaf. Size, 18½ × 1½ inches. Pages, 174. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above.

The copying was finished on Wednesday, the 14th day of Puṣya Śuddha in the year Parābhava.

No. 11964. गीतगोविन्दम् , श्रुतिरञ्जनीव्याख्यासहितम्.
GĪTAGŌVINDAM WITH THE COMMENTARY
ŚRUTIRAÑJANĪ.

Substance, palm-leaf. Size, $16\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 268. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, old.

Contains the Sargas one to nine complete, and the tenth incomplete

Same work as the above.

No. 11965. गीतगोविन्दम् , संग्रहदीपिकाव्यख्यासहितम्.
GĪTAGŌVINDAM WITH THE COMMENTARY
SAṄGRAHADĪPIKĀ.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 135. Lines, 7 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Complete.

The text with the commentary entitled Saṅgrahadīpikā. The name of the commentator is not known.

Beginning:

नन्दहस्तमवलम्ब्य पाणिना मन्दमन्दमरविन्दलोचनः ।
सञ्चरन् कनककिङ्किणीरवः सन्ततं मम तनोतु मङ्गलम् ॥

श्रीमान् जयदेवकविः गीतगोविन्दाख्यं प्रबन्धमारभमाणः तत्प्रतिपाद्य वस्तु निर्दिशति— मेघैरिति ।

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-
र्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ॥

हे राधे यस्मादम्बरमाकाशं मेघैर्मेदुरं व्याप्तमिति यावत् । वर्तत इति शेषः । यस्मात्तमालद्रुमैः तापिञ्छतरुभिः वनभुवः मार्गस्थलीवनभूमयश्च श्यामाः . . . . . मार्ग इति यावत् । वर्तत इति शेषः । नक्तं रात्रिश्चायं कृष्णो भीरुर्भयशीलश्च एका एकाकी स गृहं प्रति गन्तुमशक्त इत्यर्थः ॥

End:

हे कृष्ण कुचयोः पत्रं मकरिकापत्रं र . . . . . . कपोलयोः चित्रं कस्तूरिकया लेख्यकर्म कुरुष्व जघने नितम्बे काञ्चीं रशनां घटय देहि कबरीभारे कचभारे स्रजं पुष्पमालिकाम्.. पूजय; स्रजा कबरीभारमल.

कुर्वित्यर्थः । पाणौ पाण्योः वलयश्रेणीं रत्नकङ्कणजालं कलय मुञ्च; आरोपयेति यावत् । पदे चरणयुगले नूपुरौ कुरु निक्षिप । इत्युक्तप्रकारेण निगदितः उक्तः अत एव प्रीतः अनुरूपकार्ये नियुक्तवतीति सन्तुष्टचित्तः पीताम्बरस्तथाकरोत् । कुचादिषु पत्ररचनादिष्टः श्रीकृष्णोऽपीत्यपिशब्दार्थः ॥

Colophon :

इति श्रीजयदेवगीतगोविन्दसङ्ग्रहदीपिका समाप्ता ॥

No. **11966.** गीतगोविन्दव्याख्या—सारदीपिका.

GĪTAGŌVINDAVYĀKHYĀ : SĀRADĪPIKĀ.

Substance, palm-leaf (Śrītāla). Size, 9 × 1⅜ inches. Pages, 188. Lines, 9 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Begins on fol. 21*a*. The folios are numbered continuously from 81 to 174.

Complete.

This commentary on the Gītagōvinda called Sāradīpikā is by Jagaddhara.

The manuscript is said to have been copied by Vēṅkaṭēśa Ayyan, son of Mukāmi Śiṅgaraṅga Ayyaṅgār of Śrīraṅgapaṭṇam, the copying having been completed on Wednesday, the 10th day of the dark fortnight of the Kārtikai month in the year Pramāti.

Beginning :

करकलितभुजङ्गो मस्तके न्यस्तगङ्गो
विहितनटनभङ्गो दत्तदैतेयभङ्गः ।
चिरविगलदनङ्गस्त्यक्तसङ्गोऽङ्गनाङ्गो
भवतु मम विभूत्यै शम्भुरुन्मत्तगङ्गः ॥ १ ॥
नानाटीकाः समालोक्य विचिन्त्य सुचिरं हृदा ।
गीतगोविन्दटीकेयं क्रियते श्रीजगद्धरैः ॥ २ ॥

इह कविर्निर्विघ्नं प्रारिप्सितसमाप्तिमुद्दिश्य स्वेष्टदेवताभिकीर्तनरूपं मङ्गलं विधित्सुः महाकाव्यलक्षणीभूतं वस्तुनिर्देशमपि कटाक्षयति—मेघैरित्यादि । राधामाधवयोः रहःकेलयो जयन्ति गोपीविशेषकृष्णयोरेकान्तक्रीडितानि उत्कर्षेण वर्धन्तामित्यर्थः । राधा च माधवश्च राधामाधवौ; चार्थे द्वन्द्वः । राधा काचिद्गोपी; "राधो वैशाखमासे स्याद्राधा गोप्यां च विद्युति" रि(इ)ति विश्वः । मा लक्ष्मीः; तस्या धवः स्वामी माधवः । यद्वा

मधोरपत्यं माधवः । तस्यापत्यमित्यण् । वृद्धिः । "ओर्गुणः" इति गुणः । अवादेशः । जयन्त्वि(न्ती)त्याशंसायां लोट् । उत्वाभावश्चानभिधानादेव । की . . . . . . ह । कुत्र यमुनाकूले कालिन्दीतट इत्यर्थः । कीदृशयोः, इत्थमनेन प्रकारेण नन्दनिदेशतः नन्दाज्ञावशाच्चलितयोः गच्छतोः । कमभिमुखीकृत्य । प्रत्यध्वकुञ्जद्रुमम् । अध्वनि मार्गे कुञ्जद्रुमः अध्वकुञ्जद्रुमः । तं प्रति लक्षणेत्थम्भूताख्यानेति कर्मप्रवचनीयसंज्ञा । लक्षणेनाभिप्रती आभिमुख्ये इति समासः । कर्मप्रवचनीययुक्ते द्वितीया । अथवा वीप्सायामव्ययीभावः ।

End :

एतेन कविना निजमातापितृप्रतिपादनेन मङ्गलमाचरति(रि)तं निजग्रन्थे । [आसीरपिद्त्तेति] प्रीतः प्रमोदवान् पीताम्बरः कृष्णो यत्र स तथा ॥

कतीह काव्यवारिधौ वसन्ति नो जलारसाः ।
मदीयबुद्धिरल्पिका न वेदितं विशेषतः ॥

रे रे न जातु कुटिलाश्च जनाः परेषु दोषैस्तदुच्चवचसः पशवो भवन्तः ।
तस्मान्मदीयविपुलं परिशुद्धरत्नकाचश्रमं श्रमदृशे नियतं तनुध्वम् ॥
हे सज्जनाः परगुणेषु भवन्त एव सन्तोषवन्त इति सर्वजनप्रतीतः ।
तन्मे परिश्रममशेषममुं विलोक्य टीकामिमां सुकृतिनो भृशमादयध्वम् ॥

Colophon :

इति श्रीजगद्धरविरचितायां गीतगोविन्दटीकायां सारदीपिकायां द्वादशः सर्गः ॥

No. 11967. गीतगोविन्दव्याख्या—सारदीपिका.
GĪTAGŌVINDAVYĀKHYĀ : SĀRADĪPIKĀ.

Substance, palm-leaf. Size, 15⅜ × 1⅛ inches. Pages, 74. Lines, 6 on a page. Character, Telugu. Condition, very much injured. Appearance, old.

Contains the Sargas 7 to 12 in imperfect and disordered condition, many leaves being also wanting.

Same work as the above.

No. 11968. गोवर्धनार्यासप्तशती.
GŌVARDHANĀRYĀSAPTAŚATĪ.

Substance, paper. Size, 10¼ × 4 inches. Pages, 31. Lines, 9 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Vikramasēnacaritra 17*a*.

Contains 204 stanzas.

A poem in 700 stanzas dealing with various subjects, mostly erotic in character. The work is generally known as Āryāsaptaśatī. It is published in the Kāvyamālā. The author is Gōvardhanācārya.

Beginning :

पाणिग्रहे पुलकितं वपुरैशं भूतिभूषितं जयति ।
अङ्कुरित इव मनोभूः यस्मिन् भस्मावशेषोऽपि ॥
मा वम संवृणु विषमिदमिति सातङ्कं पितामहेनोक्तः ।
प्रातर्जयति सलज्जः कज्जलमलिनाधरः शम्भुः ॥
जयति प्रियापदान्ते गरलग्रैवेयकः स्मराराति: ।
विषमविशिखे विशन्निव शरणं गलबन्धकस्तालुः ॥

See under the next number for the end.

No. 11969. गोवर्धनार्यासप्तशती.
GŌVARDHANĀRYĀSAPTAŚATĪ.

Substance, paper. Size, 10¾ × 4⅜ inches. Pages, 100. Lines, 6 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, new.
Begins on fol. 6*a*. The other work herein is Viśvēśvarāryāśataka 1*a*.
Wants 109 stanzas in the beginning.

Same work as the above. It is stated that the author had a disciple named Udayana and a brother named Balabhadra. Guṇāḍhya, Bhavabhūti and Raghukāra are also referred to.

See under the previous number for the beginning.

End :

पूर्वैर्विभिन्नवृत्तां गुणाढ्यभवभूतिरघुकारैः ।
वाग्देवीं भजतो मम सन्तः पश्यन्तु को दोषः ॥
सत्पात्रोपनयोचितसप्र(त्प्र)तिबिम्बाभिनवस्त(व)स्तु ।
कस्य न जनयति हर्षं सत्काव्यं मधुरवचनं च ॥
कविसमरसिंहनादः (स्वरानुवादः) सुधैकसंवादः ।
विद्वद्विनोदकन्दः सन्दर्भोऽयं मया सृष्टः ॥
सत्सूत्रसंविधानं सदलङ्कारं सुवृत्तमच्छिद्रम् ।
को(नु) रचयति न कण्ठे सत्काव्यं मधुरवचनं च ॥

उदयनबलभद्राभ्यां सप्तशती शिष्यसोदराभ्यां मे
द्यौरिव रविचन्द्राभ्यां प्रकाशिता निर्मलीकृत्य ॥
हरिचरणवामलीलां वामन इव कविपदं लिप्सुः ।
अकृतार्यासप्तशतीमेतां गोवर्धनाचार्यः ॥

Colophon:

इति श्रीगोवर्धनाचार्यविरचिता सप्तशती सम्पूर्णा ॥

No. 11970. जडवृत्तम्.
JAḌAVṚTTAM.

Substance, paper. Size, $11\frac{1}{8} \times 8\frac{3}{4}$ inches. Pages, 38. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol 6*a*. The other work herein is Viṭavṛtta 1*a*.

Contains the Paricchēdas one to four complete, and the fifth incomplete.

A work describing the characteristics and the sentiments of stupid people especially their mad and vulgar love: by Mādhava.

The author divides such people into four classes, viz., Prakṛtijaḍa, Prabhujaḍa, Gaṁbhīrajaḍa and Prakīrṇajaḍa. The work is written in imitation of Bhartṛhari's Viṭavṛtta which work is said to have been commented upon by this author.

Beginning:

जयति जडस्य नताङ्ग्या नाभेरूकारसूचितविरागम् ।
असकृद्दूरनिरस्तः पुनरपि नाभ्युन्मुखो हस्तः ॥
जडविटदुर्भगसुभगव्याधितनीरोगवृद्धयुवसु समाम् ।
प्रणमत किसलयमृदुलां बहिरन्तरगो(रयोम)यीं गणिकाम् ॥
सालङ्कारां सरसां प्रौढामिव योषितं करोतु कविः ।
अनलङ्कृतिमरसामिव चेटीं कृतिमेष करवाणि ॥
विटवृत्तव्याख्यात्रा विपरीततयोक्तमेव जडवृत्तम् ।
इदमीदृशमिति तस्य व्यक्तीकरणे प्रयासो नः ॥
यदि गुणकणिकाभूषितमेतद्दोषायुतेन सहितमपि ।
आस्वादयन्ति रसिका जडवृत्तं सास्थिचूतमिव ॥
उपकृतये विटवृत्तं पटुमतिरकरोज्जनस्य भर्तृहरिः ।
जडमतिना जडवृत्तं माधवनाम्ना मया तु रचितमिदम् ॥

उचितानुचिताज्ञत्वं जडतेति विनिश्चयो विदग्धानाम् ।
देशदशाकालवशात् सानुस्यूता चतुर्वर्गे ॥
व्याक्रियते जडवृत्तं कामुकहितकाम्यया समासेन ।
अनुगमनादन्यत्र प्राचुर्यादत्र कामगतम् ॥
प्रकृतिप्रभुगम्भीरप्रकीर्णपूर्वा जडाश्चतुर्भेदाः ।
गणनातीतमवान्तरमन्तरमेषां विशेषाणाम् ॥
पीडाकरमितरेषामबुद्धिपूर्वप्रवृत्तिपर्यन्तम् ।
अज्ञत्वमिङ्गितानां जडजनसाधारणो धर्मः ॥

End:

विक्रीतावनिलब्धहेम वितरन् मन्त्रौषधिव्यापृतः
वेश्यावर्जनहेतवे कृशतनुः दुश्चिन्तयाऽयं जडः ।
दूरीभूतसमा(दा)गमो बत तया शेषं नयत्यायुषः
सर्वं दुष्कृतकर्मणः ह(फ)लमिह प्रायेण पण्यस्त्रियः ॥

Colophon:

इति जडवृत्ते गम्भीरजडपरिच्छेदश्चतुर्थः ॥

साकल्येन जडानां वक्ष्यति शरदां शतेन को वृत्तम् ।
अथ दर्शितदिङ्मात्रं सङ्कीर्णजनस्य कथयामि ॥

* * * *

सरभसतादि(भि)राच(ति)रितवचसस्तस्यामुना समित्रस्य ।
भवति विरोधस्सहसा संभ्रान्तः स्त्रीकृताक्रन्दः ॥

No. 11971. पुष्पबाणविलासः, सव्याख्यः.

PUṢPABĀṆAVILĀSAḤ WITH COMMENTARY.

Pages, 108. Lines, 16 on a page.

Begins on fol. 1*b* of the MS. described under No. 1782. Written on one side of paper.

Complete in 26 stanzas.

A number of erotic stanzas attributed to Kālidāsa. According to a Madras Telugu edition of the work and of the commentary, the latter was written by Vēṅkaṭapaṇḍitarāya, a collegue of Bhāskarabhaṭṭācārya and Raghunāthamiśra. The commentary is called Śṛṅgāracandrikā.

Beginning:

श्रीमद्गोपवधूस्वयंग्रहपरिष्वङ्गेषु तुङ्गस्तन-
व्यामर्दाङ्कितेऽपि चन्दनरजस्यङ्गे वहन् सौरभम् ।

कश्चिज्जागरजातरागनयनद्वन्द्वः प्रभातश्रियं
बिभ्रत्कामपि वेणुनादरसिको जाराग्रणीः पातु वः ॥
अङ्गप्रभाभिराभीरस्त्रीणां मुदमुदश्चयन् ।
श्रेयसे भूयसे भूयात् कोऽपि गोपालबालकः ॥
पुष्पबाणविलासाख्यकाव्यस्य रसशालिनः ।
शृङ्गारचन्द्रिकाभिख्यां व्याख्यां विरचयाम्यहम् ॥

अथ कविः गोपिकावल्लभचरित्रप्रतिपादनपवित्रितं पुष्पबाणविलासाख्यं शृङ्गारकाव्यं चिकीर्षुरादौ मङ्गलत्वादाशिषं प्रयुङ्क्ते—श्रीमदिति । अत्र प्रथमं भूदेवताकस्य प्रयोगात् कर्तुरध्येतॄणां च शुभं भवति । तदुक्तम्—मो भूमिस्त्रिगुरुः श्रियं वितनुते नस्स्वस्त्रिलो जीवितं यो वार्यादिलघुः धृतिं च पवनो देशभ्रमं सोऽन्त्यगुः । रोऽग्निर्मध्यलघुः मृतिं दिनमणिर्मध्ये गुरुर्जो रुजं तो द्यौरन्त्यलघुः क्षयं मुखगुरुः भस्तारकेशो यशः ॥ इति ।

* * * *

अथ श्लोकार्थः—

श्रीः शोभा "श्रीर्वेषरशनाशोभासम्पत्सरलशालिषु । वाणीलक्ष्मीलवङ्गेषु" इति नानार्थरत्नमालायाम् । श्रीमत्यः शोभावत्यः या गोपवध्वः तासां ये स्वयङ्ग्रहपरिष्वङ्गाः आलिङ्गनानि । मध्यमपदलोपी समासः । स्वयङ्ग्रहेण परिष्वङ्ग इति तृतीयासमासो वा । तेषु ।

* * * *

भुवनविदितमासीत्सच्चरित्रं विचित्रं सह युवतिसहस्रैः क्रीडतो नन्दसूनोः ।
तदखिलमवलम्ब्य स्वादु शृङ्गारकाव्यं रचयतु मनसो मे शारदास्तु प्रसन्ना ॥

सम्प्रति कविः स्वचिकीर्षितं प्रतिजानन् तन्निर्वाहाय सरस्वतीप्रसादमाशास्ते—भुवनेति ।

* * * *

कान्ते दृष्टिपथं गते नयनयोरासीद्विकासो महान्
प्राप्ते निर्जनमालयं पुलकिता जाता तनुः सुभ्रुवः ।
वक्षोजग्रहणोत्सुके समभवत्सर्वाङ्गकम्पोदयः
कण्ठालिङ्गनतत्परे विगलिता नीवी दृढापि स्वयम् ॥

End:

कर्णारुन्तुदमेव कोकिलरुतं तस्याः श्रुते भाषिते
चन्द्रे(न्द्रा)लोकरुचिस्तदाननरुचेः प्रागेव सन्दर्शनात् ।

चक्षुर्मीलनमेव तन्नयनयोरग्रे मृगीणां वरं
हैमी वल्ल्यपि तावदेव ललिता यावन्न सा लक्ष्यते ॥

निस्तुलविभ्रमादिरूपशालिनीं काञ्चित्तरुणीं विलोक्य तरलचित्ततां प्राप्तः कामी नर्मसचिवस्याग्रे तां मनस्तारस्यकारिणीं वर्णयति . . . . अयोगविप्रलम्भशृङ्गारः नायिका परकीया ॥

No. 11972. पुष्पबाणविलासः, सव्याख्यः.

PUṢPABĀṆAVILĀSAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 63. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Same work as the above.

No. 11973. पुष्पबाणविलासः, सव्याख्यः.

PUṢPABĀṆAVILĀSAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 8⅝ × 6¾ inches. Pages, 172. Lines, 14 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as the above, but with colophon as given below :—

Colophon :

इति श्रीगणेशजीविता . . तासमासादितविभवेन श्रीभास्करभट्टाचार्यश्रीरघुनाथमिश्रसहाध्यायिना श्रीवेङ्कटपण्डितरायसार्वभौमेन विरचिता शृङ्गारचन्द्रिकाभिख्या पुष्पबाणविलासाख्यव्याख्या समाप्ता ॥

No. 11974. पुष्पबाणविलासः, सव्याख्यः.

PUṢPABĀṆAVILĀSAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 14½ × 1¼ inches. Pages, 87. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1a. The other work herein is Taptamudrāṅkanavaidikatvavicāra 1a.

Complete.

Same work as the above.

No. 11975. बिल्हणचरित्रम्.

BILHAṆACARITRAM.

Pages, 33. Lines, 18 on a page.

Begins on fol. 172b of the MS. described under No. 11608.

This poem describes the love between a princess named Yāminī-pūrṇatilakā and her tutor Bilhaṇa. By Cōrakavi.

Contains two Sargas of 104 and 50 stanzas respectively and the concluding stanzas in addition

Beginning :

पृथ्वीमण्डलनाभिभूतकनकाद्रेरुत्तरस्यान्दिशि
प्रायस्सज्जनसङ्कराजितमहापाञ्चालदेशोऽभवत् ।
लक्ष्मीमन्दिरनाम पट्टणमभून्नानासुखैकास्पदं
तत्रासीन्मदनाभिरामनृपतिर्भूपालचूडामणिः ॥
मन्दारमाला तस्यासीन्महिषी सुगुणा तयोः ।
यामिनीपूर्णतिलका तनया विनयोज्ज्वला ॥
आसीद्यौवनशालिनी मधुरवाक् सौभाग्यभाग्योदया
कर्णान्तायतलोचनातिचतुरा प्रागल्भ्यगर्वान्विता ।
रम्या बालमरालमन्थरगतिर्मत्तेभकुम्भस्तनी
बिम्बोष्ठी परिपूर्णचन्द्रवदना भृङ्गालिनीलालका ॥

* * * *

रसालङ्कारनिपुणः सर्वकाव्यविचक्षणः ।
छन्दोनाटकतत्त्वज्ञः को वा कविरुदीर्यताम् ॥
मल्हणो बिल्हणश्चेति विद्येते सत्कवीश्वरौ ।
तत्रापि बिल्हणो नाम कविराट् कथ्यते बुधैः ॥

* * * *

आगत्य सद्बिल्हणनामधेयः कविः सुधर्माख्यसभान्तराले ।
ददौ सुरेशाय गुरुर्यदाशिषं जगौ तदाशीर्वचनं महीपतेः ॥
विद्वन् राजशिखामणे सुखमहो सौख्यं प्रसादात्तव
प्रीत्या ख्यातिरमीभिरेव कथिता नास्माभिरालोकिता ।
यूयं चेति निरूपिते नृपतिना तत्कालमस्मिन् पुरे
सद्विद्याव्य(भ्य)सनेन कालमनयं त्वामद्य संदृष्टवान् ॥

* * * *

तत्रागत्य नराधिपः शुभदिने मन्त्रीन् कवीन् सद्बुधा-
नध्यक्षान् स्वसुतां च बिल्हणकविं शीघ्रं समानीय ताम् ।
वाग्देवीपरिपूजनं प्रथमतः कृत्वा तु रामायण-
प्रारम्भं कृतवान् स बिल्हणकविः स्वीकृतानुग्रहः ॥

* * * *

तत्रादरान्नरपतिर्वरभोजनं च ताम्बूलवस्त्रशयनासनसंहतीश्च ।
कृत्वामितं प्रतिदिनं कुरुतात्र शास्त्राभ्यासं निकेतनमगादिति सञ्जगाद ॥

तदा च बिल्हणकविः सर्वशास्त्राणि सर्वदा ।
निरूपयत्यग्रहीत्सा तप्तलोहमिवोदकम् ॥

नानालङ्कारभेदे नवरससुरभे (भगे) भानुसंभक्तयुक्ते
काव्ये नानार्थशास्त्रे सुजनजनमते नाटकैकप्रशस्ते ।
स्वच्छच्छन्दोऽब्धिपारे बहुसुखविषये कामदे कामशास्त्रे
प्रौढासीत् बिल्हणादप्यधिकमतियुता राजपुत्री पवित्रा ॥

अथैकदा कामसहायभूते वसन्तमासे वरपूर्णिमायाम् ।
प्रकाशितानेकदिगन्तरालश्चन्द्रोदयोऽभूत् किरणैः स्वकीयैः ॥

मारनाराचनिर्माणशाणचक्रमिवोदितम् ।
यामिनीकामिनीकर्णकुण्डलं चन्द्रमण्डलम् ॥

* * * *

शय्यागेहे शयनतलतो बिल्हणाख्यः कवीन्द्र-
श्चन्द्रं दृष्ट्वा नयनसुभगं जालमार्गप्रविष्टम् ।
पृथ्वीभागे विरहिविततौ कामसन्तानबीजं
चित्तोद्भूतप्रबलतरमुदा वर्णयामास पूर्णम् ॥

End:

चरणनवसरोजे चञ्चरीकः प्रियायाः जघनपुलिनदेशे जायते राजहंसः ।
स्तनशिखरिणि केकी वक्त्रचन्द्रे चकोरः चिकुरभरपयोधौ चातको मानसं मे ॥
नारायणं त्रिनयनं नलिनासनं च नाथं यथेष्टमभिगच्छतु जीवलोकः ।
गात्रं जगत्रितयमोहनमङ्गनायाः कूलङ्कषस्तनभरं कुलदैवतं नः ॥

Colophon:

इति ललिचोरपञ्चाशति युवतीमोहनभोजराजसंवादे शृङ्गारकाव्यं समाप्तम् ॥

अथ चोरकवेर्विपद्यहो न मिहति व्यथते सुताम् ।
हृदयं मनुसेदतासुतामिवराजेति जनैर्निवेदितः (?) ॥

तवाङ्गिजा तद्विरहाग्निमक्षमा विसोढुमाराज(ज्व)लदग्निमण्डले ।
प्रवेष्टुमास्ते सह तेन सङ्गतिः ममास्तु भूमौ दिवि वेति निश्चितः ॥

इति निशम्य च भूपतिरेतयोः हृदयमीक्ष्य परस्परसङ्गतम् ।
शमितकोपमतिः कविशेखरं पुनरपि स्वयमानयदालयम् ॥

ततस्तस्मै राज्ञो महितमुरजो(जातो)रुशुभगां
विभज्य प्रोत्तुङ्गद्विप(ङ्गेभ)रथहयसंकीर्णविभवाम् ।
महीं च प्रायच्छत्समु(च्छ्रु)दवहद्मेयप्रतिनिधि
स चैनां कन्दर्पोऽपर इव(सु)लावण्यसुभगः ॥
राजमौलिमणिना बलिना सा कीर्तिमण्डलपयोनिधिना च ।
दत्तया वसुधया सुतया च श्रीपतिः सुखमवाप कवीन्द्रः ॥
इतीव सम्भावनताद्रिमौलिकियद्भूतमकरन्दबाष्पैः ? ।
धरित्रि पुष्पाञ्जलिरेष तुभ्यं सुता मदीया तव पालनीया ॥
भट्टिर्नष्टो भारविर्योऽपि नष्टो भिक्षुर्नष्टो भीमसेनोऽपि नष्टः ।
मुकुण्डोऽहं भूपतिस्त्वं हि राजन् भभापङ्क्तावन्तकः सन्निविष्टः ॥
इत्युत्तरपश्चाशत्समाप्ता ॥

No. **11976.** बिल्हणचरितम्.

BILHAṆACARITAM.

Substance, palm-leaf. Size, $20\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 8. Lines, 8 on a page. Character, Telugu. Condition, fair. Appearance, old. Complete.

Same work as the above, but without the concluding stanzas.

No. **11977.** बिल्हणचरितम्.

BILHAṆACARITAM.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 18. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 89*a*. The other works herein are Kuvalayānanda-vyākhyā (Candrikā) 1*a*, Candrālōka 27*a*, Kuvalayānanda 32*a*.

Contains 1 to 40 stanzas in the second Pañcāśat.

Same work as the above.

No. **11978.** बिल्हणचरितम्.

BILHAṆACARITAM.

Substance, palm-leaf. Size, $12\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 16. Lines, 7 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Contains the first Pañcāśat complete.

Same work as the above.

No. 11979. बिल्हणचरितम्.
BILHAṆACARITAM.

Pages, 19. Lines, 8 on a page.

Begins on fol. 50*a* of the MS. described under No. 10940.

Complete.

Same work as the above, but with different concluding stanzas.

No. 11980. बिल्हणचरितम्.
BILHAṆACARITAM.

Pages, 14. Lines, 9 on a page.

Begins on fol. 13*a* of the MS. described under No. 1791.

Complete.

The former owner of the MS. is said to be one Nīlakaṇṭha.

Same work as the above, but with diffierent additional stanzas in the end, which are given below.

End:

यामिनीपूर्णतिलकावचः श्रुत्वा नरेश्वरः ।
तां विसृज्य समाहूय बिल्हणं प्रत्यभाषत ॥
पापात्मनाद्य भवता विहितोऽपराधः तत्सर्वमद्य परिहृत्य विनोदयामि ।
त्वं मत्सुतां परिणयस्व सुखात् कवीश प्रोक्तो भविष्यति सदा सुखदो विवाहः ॥

* * * *

प्राज्यं राज्यं रथाश्वप्रकर(सु)मिलितं भूषणं सौधगेहं
प्रादादप्रार्थ(र्थ्य)सिद्धिर्भवतु विपुलताशाति(सीत्त)योश्चित्रमेतत् ॥

No. 11981. मृगाङ्कशतकम्.
MṚGĀṄKAŚATAKAM.

Substance, paper. Size, 7⅜ × 5 inches. **Pages, 6. Lines, 30 on a page.**

Character, Dēvanāgarī. Condition, injured. **Appearance, old.**

Complete.

A short poem in 100 stanzas in praise of the moon who is considered to inspire sentiments of love into the hearts of people: by Kavikaṅkaṇa.

Beginning:

जेतुं त्रिभुवनमखिलं स्फटिकगणेशं तुषारकराबिम्बम् ।
बिल्वदलैरार्चितवांस्तादिह कलङ्कं विशङ्कन्ते ॥ १ ॥
शशिनि सुधामयसिन्धौ स्वपिति हरिः किल कलङ्ककपटेन ।
अविरतमेव यदेतत्तनयो मदनः पुरः स्फुरति ॥ २ ॥

रजनीशरजतभाजनमरकतमृत्युञ्जयात् कलङ्कमिषात् ।
नभसि नवाम्भसि निहितः किमु जीवयितुं पतिं रत्याः ॥ ॥ ३ ॥
हरदग्ध एव मदनः सपदि निमग्नः सुधाकरे सरसि ।
मलिना तदङ्गदीधितिरुदयति कपटात्कलङ्कस्य ॥ ४ ॥
अङ्के कलङ्कदम्भाग(द्र)रुडमणिं वहति चन्द्रमाः कमपि ।
हरदृष्टिविषविषण्णं जीवयितुं कुसुमधन्वानम् ॥ ५ ॥
शशिसम्पुटे कलङ्के सिद्धं शृङ्गारकज्जलं रजनी ।
दृशि विनिवेश्य जनानां मदनाद्वैतं प्रसाधयति ॥ ६ ॥
ओषधिपतिरङ्कमिषात् कलयति शृङ्गारमञ्जरीबीजम् ।
दृशि विशदेव यदेतन्मनसि क्षेत्रेऽङ्कुरं वहति ॥ ७ ॥

End:

विधुदधितण्डुलपिण्डं लाञ्छनबदरीतुलां विधिर्वहति ।
अहह चिरादिह मूते कमपि कुमारं स्मरं रजनी ॥ १०० ॥
इति कविकङ्कणभणितं शतकं तनुतां मृगाङ्कस्य ।
विदुषो रुचिमचिरादिव ककुभामुदयो मृगाङ्कस्य ॥ १ ॥

Colophon:

इति श्रीकविकङ्कणभणितं मृगाङ्कशतकं समाप्तम् ॥

No. **11982.** रसिकजनरञ्जनम्.

RASIKAJANARAÑJANAM.

Substance, palm-leaf. Size, 9½ × 3¼ inches. Pages, 48. Lines, 7 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old. Complete in three Śatakas.

This is a short poem by Vrajarāja, son of Kāmarājadīkṣita, describing the attractions and charms of women.

Beginning:

स्वर्गेऽत्रिबिन्दुराजेरुत्कृष्टो भवति यस्य सेवनया ।
मूढाऽपि तन्निजान्तर्भजेऽहमरुणारुणां(णं)तेजः ॥
अज्ञानगाढतिमिरं दूरीकर्तुं स्वभक्तानाम् ।
दक्षमति मामपायात् पायादरुणारुणं तेजः ॥
चरणानतयच्छीर्षच्युताहिभयकैतवात् भीत्या ।
आलिङ्गितो गिरिजया पुलकितकायश्शिवो जयति ॥

निजफाललोचनानलभस्मीकृतसर्वविग्रहस्यापि ।
अर्धाङ्गीकृतदारः शरैः स्मरस्यातिपीडितः शम्भुः ॥
विन्दुनुतब्रह्मादिकदेवास्यश्रीमहिमकरणम् ।
दैत्येन्द्रसार्थदलनं भजामि किश्चिन्महः कृष्णम् ॥
इह लोकसारमधुना नन्दमहोल्लासभाजनं चित्रम् ।
जडतान्धकारहरणं ममास्तु शरणं महः कृष्णम् ॥
संसारसागरतरिं त्रिपुरारिप्रमुखवदानवारिनतम् ।
दैत्ये . . . . ।
. . . . . . त चक्षुषां स्मरो जयति ॥
कर्णावतंसवारिजसंस्थितचलचश्चरीकालिः ।
जयति तवायतनयने शृङ्गारकटाक्षराजिरिव ॥

पवर्गरहितः ।

एतत्स्मरति मनो म(म) कलिन्दतनयातटार्धपातिन्याः ।
कुञ्जान्तरितस्य सखे मरणे नरकान्तकस्य चरितस्य ॥
ईषत्कृतोर्ध्वनयनः सतताधरमधुरपीयुषम् ।
पिबति सममेव पथिकः पयः प्रपापालिकानयनम् ॥
ललितनकारान्दोलितसीमन्तकचाभिलुलितस्य ।
स्मरति मनस्तन्वङ्ग्या आमृष्टविशेषकस्य वदनस्य ॥

End :

मेघायते कचाली वदनं चन्द्रायते च हारालिः ।
तारायते च यस्याः कृष्णाकाशेन्दिरावतां नः सा ॥
विधिना किमर्थमधिकं बाणद्वितयं मदीयमारचितम् । इति ॥
परिशीलयन्मनोभूर्निजत्रिबाणीजिताखिलो जयति ॥

Colophon :

श्रीकामराजदीक्षितपुत्रव्रजराजनिर्मिते काव्ये ।
रसिक(जन)रञ्जनाख्ये तृतीयशतकं परिसमाप्तम् ॥
इति श्रीमद्दीक्षितव्रजराजकृतं मुक्तकं समाप्तम् ॥
दर्शितकुचभुजमूला मिषतस्सूचीविकर्षणस्य तन्वङ्गी ।
चित्रं सीव्यति युगपद्युवजननेत्राणि नेत्राणि ॥
गर्जति गर्जत्युच्चैर्भजति भजत्येव दुर्दिनत्वमलम् ।
मुञ्चति मुञ्चति जीवनमम्बुदनिवहे वियोगिजनः ॥

No. 11983. विटवृत्तम्.
VIṬAVṚTTAM.

Pages, 10. Lines, 18 on a page.
Begins on fol. 1a of the MS. described under No. 11970.
Complete.
On the conduct and characteristics of persons addicted to sensual pleasures : by Bhartṛhari.

Beginning :

नितम्बालसगामिन्यः पीनोन्नतपयोधराः ।
मन्मथाय नमस्तस्मै यस्यायतनमङ्गनाः ॥
मुदितमनोभवहासो रमणोरसि मुष्टिघातजो जयति ।
श्रुतिसुखमणितविमिश्रो वलयावलिकलकलो विलासिन्याः ॥
यासामार्जनशीलत्वान्न द्वेष्योऽस्ति न च प्रियः ।
न कृतं न च सद्भावो वञ्चनाबद्धचेतसाम् ॥
आकारवेषसौभाग्यैः कन्दर्पप्रतिमोऽपि सन् ।
यासां सङ्गममासाद्य प्राप्तः को वा न वञ्चनाम् ॥

End :

हितमिममुपदेशं कुर्वता लोकदृष्टि मितमपरिमितार्थं यन्मयोपात्तमत्र ।
जनितयुवतिरागाः सन्तु पुण्येन तेन प्रतिहतरातिविघ्नाः प्राणिनः सौख्यभाजः ॥
जानकीवदनोल्लासहेतुं सेतुं बबन्ध यः ।
तत्पादसेविनाऽलेखि विटवृत्तं द्विजन्मनाम् ॥

Colophon :-

इति विटवृत्तम् ॥

No. 11984. विश्वेश्वरार्याशतकम्.
VIŚVĒŚVARĀRYĀŚATAKAM.

Pages, 10. Lines, 11 on a page.
Begins on fol. 1a of the MS. described under No. 11969.
Complete.
A centum of stanzas in the Āryā metre describing the beauties and other attractive qualities of women : by Viśvēśvara, son of Lakṣmīdhara.

Beginning :

हैमवतीपदयावकराञ्जितमलिकं हरस्य तज्जयति ।
लीना ह्रियेव यस्मिन्ननलशिखाप्रातिफुल्लच्छलतः ॥

केलिवनकुञ्जवेशिनि राधाया मुञ्जकेशिनि विदूरात् ।
सहभावदेशिनीभिर्जयति प्र(ति)वेशनीभिरस्त्ररसः ॥
गुरुजनितमपि न तावत्पर्याप्तिं विबुधजविने वहति ।
कचवद्वचनं याचत्काविहृदयान्नैव निर्याति ॥

End :

स्वारस्येन प्रवणं प्रेयसि मानेन विमुखितं चेतः ।
प्रतिकूलपवननोदनपरिवृत्तपयस्तुलां वहति ॥
वचनमदूरश्रव्यं स्मितमधु(ध)रस्पन्दमात्रविश्रान्तम् ।
जयति प्रघाणमात्रप्रघुणिकं कुलनतभ्रुवां गमनम् ॥
पदवाक्यमानकोविदलक्ष्मीधरसूरिसंभवेनेदम् ।
विश्वेश्वरेण निर्मितमार्याशतकं विचार्यमार्याणाम् ॥

Colophon :

इति श्रीपण्डितविश्वेश्वरविरचितमार्याशतकं समाप्तिमगमत् ॥

No. 11985. विश्वेश्वरार्यासप्तशतीव्याख्या.

VIŚVĒŚVARĀRYĀSAPTAŚATĪVYĀKHYĀ.

Substance, paper. Size, $10\frac{3}{8} \times 5\frac{1}{4}$ inches. Pages, 41. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new. Incomplete.

A commentary on the Āryāsaptaśatī of Viśvēśvara : by himself.

Beginning :

शब्दार्थरूपकमशेषमिमं प्रपञ्चं यस्यावदन् श्रुतिशिरोविबुधा विवर्तम् ।
तत्किञ्चिदक्षरमनन्यपरप्रकाशसंवित्प्रमोदम(य)माकलयामहेऽन्तः ॥
अज्ञानगाढतिमिरक्षतिभास्करेषु विद्यावलीवितरणत्रिदशद्रुमेषु ।
लक्ष्मीच(ध)रस्य विदुषश्चरणारविन्दादुत्तास्थिवत्सु नतयो रजसां कणेषु ॥
विद्वज्जनविनोदाय बालधीवृद्धिसिद्धये ।
व्याख्यात्यार्यासप्तशतीं सम्यग्विश्वेश्वरो निजाम् ॥

तत्र "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सम्यक् परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥" इत्यालङ्कारिकवचनादनेकविधस्वपरनिष्ठफलजनकतया आर्यासप्तशतीमारिप्सुः प्रारिप्सितप्रतिबन्धकदुरितवितानोपशमसमर्थतया सर्वसिद्धानुभावस्य भगवतो हेरम्बस्यानुसन्धानरूपं मङ्गलं शिष्यशिक्षार्थमुपनिबध्नाति—

गौरीकुचानुबिम्बितमात्मीयाविषाणमुपवर्ण्य ।
कर्षन् बालमृणालभ्रान्त्या द्वैमातुरः पातु ॥

अत्र "कः खो गो घश्च लक्ष्मीं वितरति" इति भामहवचनादादौ गकारः शुभफलः । तगणस्य तूदासीनत्वेऽपि "देवतावाचकाः शब्दा ये च भद्रादिवाचकाः । ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ॥" इति वचनाद्गौरीपदस्यादौ प्रयोगान्न दोषः । प्रतिबिम्बितविषाणे मृणालभ्रान्त्यसत्त्वेऽपि तदनर्थिनस्तत्र प्रवृत्त्यनुत्पत्तेस्तदाकर्षणं गजमुखत्वेनोपपाद्यते । अत्र बाल्यावच्छिन्नस्य तस्य वर्णनीयतया भ्रान्तिकथनं नापकर्षमावहति । तत्स्वभा(व)वर्णनपर्यवसानात् । अत एव प्राचीना अवर्णयन्—

"दर्पाद्दन्तविदारितेश्वरगिरिप्रान्तावनीरन्ध्रतः
पत्युः कुण्डलिनां फणामणिमहस्तोमे समुत्तस्थुषि ।
रत्नस्तम्भ इति भ्रमेण करटं कण्डूयितुं वाञ्छतो
हेरम्बस्य जयन्ति कूणितदृशो मूर्ध्नो मुधाधूतयः ॥"

किं वानेन ? तस्य ब्रह्मरूपतया अविद्यासम्बन्धेन जगदाकारतया विवर्तोऽपि सूच्यते । "देवात्मशक्तिस्वगुणैर्निगूढाम्" इत्यादौ तस्या ब्रह्मसम्बन्धश्रवणात् । प्रतिबिम्बोत्पत्त्या स्तनयोर्निर्मलत्वसूचनम् । स्वमु(ख)स्थ एव दन्ते विशेषदर्शनसत्त्वेन मृणालभ्रमो न सम्भवतीत्यतो गौरीत्यादि । बालकतया तत्सान्निधानस्य सार्वदिकत्वात् । अनेन कुचयोः कमलमुकुलाकारत्वमप्याक्षिप्यते । तत्सन्निधिना विषाणे त[त्स]दृशमृणालभ्रमोपपत्तेः । अत्र देवताविषयकभावध्वनिः । तत्र भ्रान्तिमतोऽनुगुणत्वं जगन्मातृक्रोडक्रीडनादिना तदुत्कर्षाक्षेपात् । तत्स्वरूपं वास्मत्कृतालङ्कारकौस्तुभे यथा— "तदभाववति मतिस्तत्प्रकारिका भ्रान्तिमान् भवति ।" इदानीं "शब्दस्वरूपमखिलं धत्ते शर्वस्य वल्लभा । अर्थस्वरूपमखिलं धत्ते बालेन्दुशेखरः ॥" इति वायुपुराणात् "अर्थः शम्भुश्शिवा वाणी" इति लिङ्गपुराणाच्च शब्दार्थोभयरूपे काव्ये तदुभयोपपत्तये तमेवानुसन्दधाति—

लङ्कापतिभुजवल्लीवेष्टितमवलोक्य कैलासम् ।
स्मृतकालीबाहुलतावललि(यि)तनिजविग्रहः शिवो जयति ॥

* * * *

वृषकेतनस्य हृदये वरणस्र(ग्)न्[illegible]गति गिरिभुवा निहिता ।
कुण्डलनेवानङ्गप्रातिकूला[illegible]भवत्ती[illegible]म् ॥

* * * *

End:

नायिकान्तरगुणप्रवादमाकर्ण्य शङ्कमाना नायिकां सखी इदमाह—

अहमहमिकया दूगत् प्रसरन्तु समस्तसुमनसां गन्धाः ।
न तु मालतीपरिमलात् पुरतः केऽपि प्रयास्यन्ति ॥

"अहमहमिका तु सा स्यात् परस्परं यो भवत्यहङ्कारः" इत्यमरः । सुमनसां पुष्पाणां, रसवत्तया सहृदयानां वा रसिकालां(नां) च । समस्तपदं मालत्यतिरित्य(क्त)परम् । एतत्कक्षां केऽपि न धास्यन्तीति भावः । गन्धपदस्य साधारणार्थतया परिमलपदस्य च विशेषार्थतया बहुन्तरत्वं सूच्यते । पुरत इति शब्दोऽसाधुरिति यद्यपि बहवस्तथापि प्रामाणिकप्रयोगप्राचुर्यादखण्डनिपातान्तरमेवेत्यभिप्रायेण प्रयोगः ॥

अतिरमणीयायामपि नायिकायां कस्यचिदनुरागे हेतुमुत्प्रेक्षमाणं लोकमालोक्य कोऽप्याह—

अतिसौरभानुसारे भृङ्गस्य गवेषयन्ति ये वी . . . ।

No. 11986 शृङ्गारतिलकम्.

ŚṚṄGĀRATILAKAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 2b of the MS. described under No. 11840.

Complete in 23 stanzas.

This work contains stray erotic stanzas. Its authorship is attributed to Kālidāsa.

Beginning:

कुसुमिते सति कुन्दलताकुले वसति सोमकलाकुसुमायुधे ।
त्वयि न सा कथमद्य वधूकथा मदनजातमनोरथसप्तमी ॥
बाहू द्वौ च मृणालमास्यकमलं लावण्यलीलाजलं
श्रोणी तीर्थशिला च नेत्रशफरं धम्मिल्लशैवालकम् ।
कान्तायाः स्तनचक्रवाकयुगलं कन्दर्पबाणानलैः
दग्धानामवगाहनाय विधिना रम्यं सरो निर्मितम् ॥

End:

कोपस्त्वया यदि कृतो मयि पङ्कजाक्षि सोऽस्तु प्रियस्तव किमत्र विधेयमन्यत् ।
आश्लेषमर्पय मदर्पितपूर्वमुच्चै[illegible]समर्पय मदर्पितचुम्बनं च ॥

Colophon :

इति कालिदासविरचितं शृङ्गारतिलकं समाप्तम् ॥

No. 11987. शृङ्गारतिलकम्.

ŚṚṄGĀRATILAKAM.

Pages, 9. Lines, 20 on a page.

Begins on fol. 403*a* of the MS described under No. 1800.

Contains 20 stanzas.

Same work as the above.

No. 11988. शृङ्गारश्लोकसङ्ग्रहः.

ŚṚṄGĀRAŚLOKASAṄGRAHAḤ.

Substance, paper. Size, 7 × 4⅜ inches. Pages, 10. Lines, 17 on a page. Character, Telugu. Condition, good. Appearance, old.

A collection of stanzas of erotic nature gleaned from various sources.

Contains 41 stanzas.

Beginning :

श्रीमद्गोपवधूस्वयङ्ग्रहपरिष्वङ्गेषु तुङ्गस्तन-
व्यामर्दाद्गलितेऽपि चन्दनरजस्यङ्गे वहन् सौरभम् ।
कश्चिज्जागरजातरागनयनद्वन्द्वः प्रभाते श्रियं
बिभ्रत्कामपि वेणुनादरसिको जाराग्रणीः पातु वः ॥
कान्ते दृष्टिपथं गते नयनयोरासीद्विकासो महान्
प्राप्ते निर्जनमालयं पुलकिता जाता तनुः सुभ्रुवः ।
वक्षोजग्रहणोत्सुखे(के) समभवत्सर्वाङ्गकम्पोदयः
कण्ठालिङ्गनतत्परे विगलिता नीवी दृढापि स्वयम् ॥

End :

तन्वि तव स्तनयुगलं वेधा निर्माय कमलमुकुलाभ्याम् ।
विदधे विकासभीत्या खिन्न(किं नु) मुखं चन्द्रबिम्बेण(न) ॥
मधु तिष्ठति वाचि योषितां हृदि हालाहलमेव केवलम् ।
अत एव निपीयतेऽधरो हृदयं मुष्टिभिरेव ताड्यते ॥

No. 11989. शृङ्गारसप्तशती.
ŚṚṄGĀRASAPTAŚATĪ.

Substance, palm-leaf. Size, 15¾ × 1½ inches. Pages, 76. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains Śatakas three to seven ; wants four stanzas in the beginning of the third Śataka.

A work in 700 stanzas describing the erotic experiences of the lover and the beloved under various conditions. The colophons extracted below indicate the subjects dealt with in each of the five centums contained in the MS.

Beginning :

. . . . न चाक्षराणि ।
सा केवलं तरलपक्ष्मभिरक्षिपातैः कान्तं विलोकितवती जननिर्विशेषम् ॥
आयत्ता कलहं पुरेव कुरुते . . . . . .
. . . . . खण्ड्यमानमधरं धत्ते न केशग्रहे ।
अङ्गान्यर्पयति स्वयं भवति नो वामा हठालिङ्गने
तन्व्या शिक्षित एष संप्रति कुतः कोपप्रहारोऽपरः ॥
प्रथमचरिते बाला मन्यौ विकारमजानती
कितवचरितेनासज्याङ्गे विनम्रभुजैव सा ।
चुबुकमलिकं चोन्नम्योच्चैरकृत्रिमविभ्रमा
नयनसलिलस्यन्दिन्योष्ठे रुदत्यपि चुम्बिता ॥

* * * *

Colophon :

प्रणयापराधनिर्भरकोपोदयसान्त्ववादकोपशमैः ।
शृङ्गारसप्तशत्यां प्रथितं शतकं तृतीयमभूत् ॥

* * * *

Colophon :

. . ति विरहिणी या विरहिवचोदूतिकाप्रियागमनैः ।
शृङ्गारसप्तशत्यां शतकं क्रमशश्चतुर्थमाकलितम् ॥

* * * *

Colophon :

ऋतुवनसलिलक्रीडा . . . समयाभिसारिकाचरितैः ।
शृङ्गारसप्तशत्यां ऋतुरन्त(तु)रमकारि पञ्चमं शतकम् ॥

* * * *

Colophon:

चन्द्रोदयमदिरारससम्भोगतदन्तवासरारम्भैः ।
शृङ्गारसप्तशत्यां षष्ठं शतकं समग्राहि ॥

End:

अत्यन्तसौरभवतीष्वलकाटवीषु वक्षोजशैलशिखरेषु मनोहरेषु ।
आवर्तसन्ना(न्नतसुना)भिमहाह्रदेषु कामद्विपो विहरते कलभाषिणीनाम् ॥
तारुण्य . . . ताभिवृद्धं चन्द्रस्समुन्मिषतु सन्ततपूर्णबिम्बः ।
मासो मधुर्विहरतामनिशं वनेषु पुष्पायुधो विहरतां भुवनैकवीरः ॥
स्वदन्ते यस्य कोदण्डं सुवते . . . . ।
मञ्जु गायति मौर्वी च वीरो विजयतामयम् ॥

Colophon:

नानारसविध(विधरस)भावप्रकटितगमकैः प्रकीर्णकैः श्लोकैः ।
शृङ्गारसप्तशत्यां सम्य . . . . ॥

No. **11990.** शृङ्गारसारसारिणी.

ŚṚṄGĀRASĀRASĀRIṆĪ.

Substance, palm-leaf. Size, $15\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 20. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete in seven Paddhatis.

This is also a work on erotics in 111 stanzas; and the headings of the Paddhatis indicate the subjects dealt with therein:—

१. कामवैभववर्णनपद्धतिः.
२. कामिनीवैभववर्णनपद्धतिः.
३. अवयववर्णनपद्धतिः.
४. भूषावर्णनपद्धतिः.
५. प्रश्नोत्तरभेदवर्णनपद्धतिः.
६. भोगवैभववर्णनपद्धतिः.
७. वेश्यावर्णनपद्धतिः.

Beginning:

नमः कृष्णायास्मै स्वयमिह पुरा ह्यष्टगुणव-
त्सहस्रस्त्रीशोऽपि व्रजभुवि परस्त्रीश्च बहु यः ।
स्मरं चाङ्गीकुर्वन्नमितसुतपौत्रः प्रवि(ह)रन्
समस्तान्तर्यामी स्थिरमनुभवत्यद्य च सुखम् ॥
कामप्राभवकामिनीमहिमतत्कायाङ्ग्यताभूषण-
श्रीप्रश्नोत्तरभेदभोगगणिकानृत्यप्रभावा इह ।
तत्तत्पद्धतिभिर्देशोत्तरस्थलश्लोकैर्मुदे कामिनां
वर्ण्यन्ते क्रमशः प्रसक्तचतुरैणाङ्गोपरिविस्तारतः ॥

श्रीमान् कामोऽभिरामो जयति जनमनोरञ्जनः कञ्जदृग्भूः
सुभ्रूषूद्भूय भूयो भवनयनधुतोऽप्येधयत्येव चैनम् ।
युक्तं युक्तांश्च रक्तान् विविधविलसितैः किन्तु कैश्चिद्वियुक्तैः
क्रुद्धैस्तप्तैश्च शप्तोऽनिशमपि वनितौरस्यदुर्गान्तलीनः ॥

* * * *

Colophon:

इति शृङ्गारसारसारिण्यां कामवैभववर्णनपद्धतिः प्रथमा ॥

End:

प्रपश्यतोऽमितो बहून् प्रति द्विषट्त्रिसप्तकान्
विनिर्दिशन्त्यधोऽङ्गुलीभिरास्थिता मुहुर्मुहुः ।
ततोरुरत्र लीलया प्रतप्य तानहर्निशं
जगद्वशीकृतिक्षमेति वक्ष्यतीव नर्तकी ॥
मुग्धेऽन्त्यग्रहभार्ययोर्डमरुके वेगे मृगेऽपि क्रमात्
स्यादाद्याक्षरवाच्यमिष्टमिति किं त्वङ्गत्तरङ्गज्झणा ।
घाधक्टिद्दघणक्रुिणोणकिटतामित्याहितार्थो जहि
स्यामेवासि स चेत् मगारिसधपानीसामिहोक्तं कृथाः ॥
शृङ्गारसाररसपूरसुधारया ये सिञ्चन्ति कामशरतप्तहृदन्तरं ते ।
अन्तः प्ररूढनुतिहृष्टमनोजपुष्टतुष्टिप्रवाहमसकृद् दृशि सूचयन्ति ॥

Colophon:

समाप्ता शृङ्गारसारसारिणीनाम्नीयं कृतिरतिरतिरहस्यसाधनीभूतश्लोकशोभित-
कियोत्तमवाग्वृत्तिरत्युत्तमा ॥

No. 11991. स्तनपञ्चकम्.
STANAPAÑCAKAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 1*b* of the MS. described under No. 5048.
Five stanzas dealing with certain bodily charms of women.
Contains three stanzas only.

Beginning:

वराङ्गितनुभूषणं वरतनोर्नखैरङ्कितं
विनिर्जितघटद्वयं विजितवारिजातान्वयम् ।
विदर्शितमनोभवं [illegible]जितशम्भुचापोन्नतं
कु(च)द्वयमुपास्महे [illegible]कुमुद[illegible]वस्योदये ।

End :

उमापतिपदोज्ज्वलमुदितचन्द्रलेखाङ्कित-
मुदग्रकठिनास्पदमुपरिसत्रसंप्रोज्ज्वलम् ।
उदारकुतुकालयमुपरिसङ्गसंसूचकं
कुच(द्वयमुपास्महे कुमुदबान्धवस्योदये) ॥

4. ANTHOLOGY

No. 11992. अन्यापदेशः. ANYĀPADĒŚAḤ.

Pages, 26. **Lines,** 6 on a page.

Begins on fol. 39*a* of the MS. described under No. 11939.

Complete.

Same work as that described under R. No. 609(*b*) of the Triennial Catalogue, Vol I, Part I, C, wherein see for the beginning.

By Nīlakaṇṭhadīkṣita, son of Bhūmidēvi and Nārāyaṇadīkṣita and grandson of Āccāndīkṣita, brother of the well-known Appayadīkṣita.

End :

अध्वन्यान् कति रुन्धते कति दृढान् भिन्दन्ति तोयाकरान्
केदारान् कति मज्जयन्ति कति च व्यापादयन्ति द्रुमान् ।
वाहिन्यः क्षणलब्धवारिविभवा वन्या अवन्यामिमा
यस्सिन्धुः सकलाश्रयः स तु पुनः कुत्रेति न ज्ञायते ॥

* * * *

Colophon :

इति श्रीमद्भरद्वाजकुलजलनिधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्ध(निर्वाहकश्रीमन्महाव्रतयाजिश्रीमदप्पयदीक्षितसोदर्य)श्रीमदाच्चान्दीक्षितपौत्रेण श्रीनारायणदीक्षितात्मजेन श्रीभूमिदेवीगर्भसंभवेन श्रीनीलकण्ठदीक्षितेन (विरचितोऽन्यापदेशः समाप्तः ॥)

No. 11993. अन्यापदेशः. ANYĀPADĒŚAḤ.

Substance, palm-leaf. **Size,** 18⅝ × 1⅝ inches. **Pages,** 7. **Lines,** 9 on a page. **Character,** Grantha. **Condition,** good. **Appearance,** old.

Begins on fol. 1*a*. The other work herein is Sabhārañjanaśataka 4*a*.

Complete.

Same work as the above, but the stanzas herein are in a different order.

End:

स्निग्धश्यामलकोमलं दलमिति प्रच्छायशीतं तलं
भूपर्यन्तविलम्बिजम्भलफलस्थूलं च दृग्धं फलम् ।
संपश्यन् विजने वने व्यवसितस्तत्रैव वस्तुं सुखं
पान्थः पान्थमुखाद्विषद्रुममम् दूरादवेत्य द्रुतः ॥

Colophon:

अन्यापदेशं(शः) समाप्तम्(ः) ॥

No. **11994.** अन्यापदेशः.
ANYĀPADĒŚAḤ.

Pages, 37. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 11939.

Complete.

Similar to the above.

By Gīrvāṇēndradīkṣita, third son of Nīlakaṇṭhadīkṣita, the author of the work described under the last number. According to the colophon Nīlakaṇṭhadīkṣita was the author of the Nīlakaṇṭhavijaya, the Śivatattvarahasya and a commentary on the Kaiyaṭa.

Beginning:

लोकानन्दनिदानमम्बुजमयं द्वेष्टि स्वयं चन्द्रमाः
देवः किं मुरशासनः कलयते गर्भेन तत्तावता ।
द्वैराज्यं कविकुञ्जरैर्मृगदृशां वक्त्रैर्न किं नीयते
रूढायामवनीपतेः पुनरियं वस्तुष्वसारज्ञता ॥
यावद्वार्षिकदर्शशार्वरतमस्स्तोमाभिरामो महा-
नाचान्ताखिलदिक्तटो जलधरो वर्षाय संनह्यति ।
तावच्चण्डसमीरणस्तमचिरादाकृष्य यत्र क्वचित्
नीत्वादर्शनमेव यन्नयति तत्तस्यैव दुश्चेष्टितम् ॥

End:

आयुः प्रार्थयते मृकण्डुशिशवे यो दीर्घमायुर्ददौ
स्वल्पायाप्युपमन्यवे स्पृहयते दुग्धे स्म दुग्धोदधिम् ।
देवः सोऽयमगण्यपुण्यमहिमा कारुण्यवारांनिधिः
दद्यान्नः पुरशासनः सुचिरमप्यायुः श्रियं चोर्जिताम् ॥

Colophon :

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्धनिर्वाहकश्रीमन्महाव्रतयाजिश्रीमदप्पयदीक्षितसोदर्याच्चान्दीक्षितपौत्रस्य सर्वतन्त्रस्वतन्त्रस्य कैयटव्याख्यानशिवतत्त्वरहस्यनीलकण्ठविजयाद्यनेकप्रबन्धनिर्मातुः श्रीनीलकण्ठदीक्षितस्य तृतीयनन्दनेन श्रीगीर्वाणेन्द्रदीक्षितेन विरचितोऽन्यापदेशः समाप्तः ॥

No. **11995.** अन्योक्तिमाला.

ANYŌKTIMĀLĀ.

Substance, paper. Size, $8\frac{1}{4} \times 6\frac{5}{8}$ inches. Pages, 50. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 9*a*. The other works herein are Advaitarasamañjarī 1*a*, Narābharaṇa 35*a*.

Similar to the above.

By Āccāndīkṣita belonging to the family of Appayadīkṣita. The work is said to have been composed in a place called Gōpālasamudram which may be identified with the village of this name forming part of Mannargudi in the Tanjore district.

Complete.

Beginning :

अस्तु स्वस्ति सुधाकराय जगदानन्दैकजीवातवे
स्वालोकेन सुधामुचा कुवलये विस्तारयित्रे श्रियम् ।
दूरापास्तकलङ्कया स्वकलया सर्वज्ञचूडापद-
श्लाघावैभवभाजनाय सुमनस्त्राणैकतानात्मने ॥
पाथोधेः पितुरेव ते स परमो वेदानगृह्णात्पुमान्
चन्द्र त्वं च कलानिधिर्जगति ते सूनुर्बुधो विश्रुतः ।
त्रय्यात्मेति रवेः प्रशस्तिरुदभूत्त्रायस्त्वदासङ्गिनो
भूयस्त्वं समतीत्य वाङ्मनसयोः पन्थानमुद्द्योतसे ॥

End :

तत्तत्प्रौढकविप्रबन्धजलधिष्वामज्य वारान् बहू-
नन्विष्याधिगताः शु(सु)शब्दमणयो वर्णोत्तरा ये मया ।
तैर्ग्रैवेयकमाकल्प्य(लय्य)कथमप्यन्योक्तिनामोज्ज्वलं
तुभ्यं वाणि समर्पयामि कृपया कण्ठे तदङ्गीकुरु ॥

गोपालार्णवनाम्नि ग्रामे मृदुसूक्तिमल्लिकारामे ।
आकलितवसतिराचानकरोदन्योक्तिमालिकामेताम् ॥

Colophon:

इति अप्पयदीक्षितवंशजातेन आचानिति कविना प्रणीतोऽयमन्यापदेश-ग्रन्थः संपूर्णः ॥

अयं च ग्रन्थः उरुप्पट्टूर् चक्रवर्ति वेङ्कटवीरराघवाचार्यस्य तालपत्रात्मिकां समग्रां मातृकामालोक्य व्यलेखि ॥

अन्योक्तिमाला समाप्ता ॥

No. 11996. अन्योक्तिमाला.

ANYŌKTIMĀLĀ.

Pages, 22. Lines, 8 on a page.

Begins on fol. 75*a* of the MS. described under No. 9358.

Incomplete.

Similar to the above.

By Lakṣmīnṛsiṁha, son of Ahōbalasudhī. This is also called Kavikaumudī.

Contains the following Anyōktis:—

कोकिलान्योक्तिः.	रासभान्योक्तिः.
घूकान्योक्तिः.	मयूरान्योक्तिः.
गरुडान्योक्तिः.	कुरङ्गान्योक्तिः.
सिंहान्योक्तिः.	हंसान्योक्तिः.
सूर्यान्योक्तिः.	पर्वतान्योक्तिः.
चन्द्रान्योक्तिः.	सुवर्णान्योक्तिः.
वृक्षान्योक्तिः.	मत्स्यान्योक्तिः.
पुष्पान्योक्तिः.	पाञ्चालिकान्योक्तिः.
समुद्रान्योक्तिः.	वानरान्योक्तिः.
मेघान्योक्तिः.	शरभान्योक्तिः.
पवनान्योक्तिः.	रत्नान्योक्तिः.
भेकान्योक्तिः.	मल्लूकान्योक्तिः.
श्वान्योक्तिः.	भृङ्गान्योक्तिः.

महिषान्योक्तिः.
तटाकान्योक्तिः.
चकोरान्योक्तिः.
पिशाचान्योक्तिः.
शरदन्योक्तिः.
पिप्पलान्योक्तिः.

Beginning:

वस्तु तद्वस्तुतः सद्वज्जगदाभाति यत्सतः ।
निस्तुलस्वस्तिलाभाय हस्तिमस्तकमस्तु नः ॥
धन्वी धुन्वीत कोऽप्यंहः संहारे यस्य वैरिणाम् ।
चक्री बभूव चापोऽपि तद्गुणोऽपि शरोऽपि च ॥
भिन्ते यत्तनुकान्तिरन्तरुदितध्वान्तव्रजं योगिनां
यत्सेवा निगमागमाब्धितरणिः सा भारती मद्गिराम् ।
क्रव्यादक्रथनोत्कदिक्करिघटाकण्ठावलीचङ्क्रणत्-
घण्टाजालघणङ्घणारवजयोत्कण्ठामकुण्ठां क्रियात् ॥
आर्द्रागःकुपितां करोद्धतकशामासेदुषीमग्रतः
प्रेक्ष्य स्वां जननीं पिधाय नयने भीत्या कराभ्यां द्रुतम् ।
पश्यन्नङ्गुलिरन्ध्रतस्तव सुतो नात्रेति घुष्यन् भृशं
प्रातो मूर्ध्न्युपगूह्य गाढमनया कृष्णः स पुष्णातु नः ॥
अहोबलसुधीगर्भसुधाम्बुधिसुधाकरः ।
कविर्लक्ष्मीनृसिंहार्यः करोति कविकौमुदीम् ॥

अथ कोकिलान्योक्तयः—

कोऽयमकारणकरुणः कोकिल(खग)नायको मम श्रवसि ।
पञ्चमरुतगलदमृतैस्सिञ्चति कटुफेरवारवज्वलिते ॥
कल्याणं भवतेऽस्तु कोकिलकुलाकल्पाय येन श्रुति
क्रूरक्रोष्टुरुतार्दितं (कलरुतैः) विश्वं समाश्वासितम् ।
अत्यन्ताभ्यसनाभ्युदित्वरबृहन्नादावबोधोल्लस-
च्छब्दब्रह्मरसानुभूतिजनितानन्दौघनिष्यन्दिभिः ॥

End:

भिक्षां लिप्सुः प्रमादाच्छबरगृहमिदं हन्त यातोऽसि भिक्षो
साक्षान्मृत्युस्वरूपः प्रविकटवदनः श्वा पुरोऽभ्येति गर्जन् ।
भिक्षालक्षादतीवोत्तम इति शबरं प्रार्थय श्वोपरोधं
रक्षत्वाण्डकोशं यदि सदनमियाः पूर्वलाभस्तवैषः ॥

* * * *

केलीलोलमरालकं मधुरसास्वादोन्मदेन्दीवरं
स्वच्छस्वादुजलं विकासिकमलं संप्रीणनं प्राणिनाम् ।
कासारं बत कासरः परिपतन्नाकस्मिकं दुर्भग-
श्छिन्नाब्जं कलुषाम्बु वीतविहगं शून्यं चकार क्षणात् ॥

No. 11997. कलिविडम्बनम्.
KALIVIDAMBANAM.

Pages, 15. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 4584.

Complete.

Same work as that described under R. No. 1428(*a*) of the Triennial Catalogue, Vol. II, Part I-B. By Nīlakaṇṭhadīkṣita.

No. 11998. कलिविडम्बनम्.
KALIVIDAMBANAM.

Substance, paper. Size, $7\frac{1}{8} \times 4\frac{3}{4}$ inches. Pages, 7. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Svapnādhyāya 4*b*.

Complete.

Same work as the above.

No. 11999. कवितामृतकूपम्.
KAVITĀMṚTAKŪPAM.

Pages, 13. Lines, 20 on a page.

Begins on fol. 46*b* of the MS. described under No. 1493, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

This is a short poem containing stanzas of ethical import and sound advice to youngsters, and composed by Gauramōhana.

Beginning :

प्रत्यक्षं वा परोक्षं वा कस्य चिन्नाप्रियं वदेत् ।
शुद्ध(ष्क)वैरं विवादं च न कुर्यात्केन चित्सह ॥
न वाच्यं प्रणयेनापि वचनं परतापि यत् ।
अहिंसा सततं कार्या धार्या चेतस्यनित्यता ॥
अपमानं पुरस्कृत्य मानं कृत्वा च पृष्ठतः ।
स्वकार्यमुद्धरेत्प्राज्ञः क[illegible]ध्वंसे [illegible] मूर्खता ॥

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूत(ं) वदेद्वाणीं मनःपूतं समाचरेत् ॥

End :

दोषान्धकारव्यपसारणेन गुणाम्बुजोन्मीलननित्यदक्षाः ।
सन्तः प्रबन्धं मम शोधयन्तु लोकं मयूखा इव चण्डरश्मेः ॥

Colophon :

कवितामृतकूपं हि शिशूनां ज्ञानवृद्धये ।
सत्कवेः पद्यमाकृष्य तेने श्रीगौरमोहनः ॥
समाप्तोऽयं ग्रन्थः ॥

No. 12000. कविराक्षसीयम्.
KAVIRĀKṢASĪYAM.

Pages, 11. Lines, 20 on a page.

Begins on fol. 1*a* of the MS. described under No. 2699.

Complete in 100 stanzas of the Anuṣṭup metre.

Same work as that described under R. No. 384(*a*) of the Triennial Catalogue of MSS., Vol. I, Part I-B ; but the stanzas herein are written in a different order and also wants the benedictory stanza.

An apparently fanciful reason is given for the peculiar name of the author of this work in the last stanza quoted from the end.

Beginning :

गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेलाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥
शब्दशक्त्यैव कुर्वाणा सर्वदानवनिष्कृतिम् ।
काव्यविद्या श्रुतिगता स्यान्मृतस्यापि जीवनी ॥
कल्याणवर्णपदतां वाग्विद्युदिव बिभ्रती ।
अभ्रान्तेषु सदासारसङ्गिषु स्यात्स्फुरद्गुणा ॥
गूढभावास्पदत्वेन यदनादेयवद्भवेत् ।
सारस्वतामृतं सर्वे कवयस्तन्न जानते ॥

End :

स्यात्पुण्यजनदानेभ्यो यस्य सत्यानुरोधिता ।
आप्तभूपारिजातेन बाहुना रक्ष्यते जगत् ॥
साक्षरेषु भवतीह जगत्यां सर्व एव हृदि मत्सरयुक्तः ।
साक्षरं कविजनेषु तमेनं लोक एव कविराक्षसमाह ॥

Colophon:

इति कविराक्षसीयानुष्टुप्छतम् ॥
परीधावि सं मार्गशिर ब ४ गुरुवारम् ।

No. 12001. कविराक्षसीयम्.
KAVIRĀKṢASĪYAM.

Pages, 10. Lines, 7 on a page.

Begins on fol. 46*a* of the MS. described under No. 9358.

Complete.

Same work as the above, but with a different end.

End:

महता करपातेन सर्वं वसुमतां हरन् ।
संपूर्णोऽप्यश्नुते राजा कलया क्षयमन्वहम् ॥
यो हीन(न)स्य प्रभावेन राजा सन् परिभूयते ।
स(तु)नक्षत्रगोष्ठीषु तेजस्वीति प्रकीर्त्यते ॥
वशीकरोति पुरुषः समस्तानपि दानवान् ।
स्वमहिम्ना तथा हन्ति समस्तानपि दानवान् ॥

Colophon:

कविराक्षसीयं संपूर्णम् ॥

No. 12002. कविराक्षसीयम्.
KAVIRĀKṢASĪYAM.

Substance, palm-leaf. Size, 14⅝ × 1¼ inches. Pages, 13. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Subhāṣitanīvī Sa.

Complete.

Same work as the above, but with the usual benedictory stanza as given below:—

त्रयीयुवतिसीमन्तसीमासिन्दूरबन्धवः ।
संसाराब्धिं पिबेयुर्वः कंसारेः पादपांसवः ॥

Colophon:

इति कविराक्षसशतकं सम्पूर्णम् ॥

No. 12003. कविराक्षसीयम्, श्लिष्टार्थदीपिकाव्याख्यासहितम्.
KAVIRĀKṢASĪYAM WITH THE COMMENTARY, ŚLIṢṬĀRTHADĪPIKĀ.

Substance, palm-leaf. Size, 1[illegible] × 1 inches. Pages, 116. Lines, 5 on a page. Character, Kanarese. Condition, good. Appearance, old.

604-A

Begins on fol. 1*a*. The other work herein is Kaḻiṅganīti (Kanarese) 59*a*, Rājanīti (Kanarese) 63*a*.

Complete.

Same work as that described under R. No. 385 of the Triennial Catalogue of MSS., Vol. I, Part I-B. The commentary is by Nāgaṇārya, son of Dēvaṇārya of the Bhāradvājagōtra.

Beginning:

व्याख्यातुर्मङ्गलाचरणम्—

वन्दारुगीर्वाणकिरीटकोटिस्फुरत्प्रभापादपयोजयुग्मम् ।
वामार्धवामं भुजगेन्द्रभूषं तद्वस्तु वन्दे शशिखण्डचूडम् ॥
सरस्वतीभूरिविजृम्भणाय सरस्वतीं कां शरणं भजामः ।
यस्याः कटाक्षक्षणवीक्षणेन भवन्ति मूका अपि वावदूकाः ॥
वंशाद्भरद्वाजमुनेः प्रसूतः स देवणाराध्यमनीषिवर्गः ।
तस्माद्द्विजज्ञे जलधेरिवेन्दुर्विशुद्धधीर्नागणनामधेयः ॥
न विद्यते यद्गुणनाथ तस्य देवद्विजात्यर्थबहुव्ययेषु ।
प्रजास्ततः सार्थकनामधेयं तं नागणाख्यं सुधियो वदन्ति ॥
स(न)पूर्वमेतद्विदुषान(पि)केन व्याख्यायि काव्यं कविराक्षसीयम् ।
तस्माच्छिशूनां सुखबुद्धये तद्व्याकर्तुमाकाङ्क्षति संविविच्य ॥

इह खलु कविः काव्यादावालङ्कारिकोक्तेषु प्रबन्धमुखलक्षणेष्वाशीर्नमस्क्रियावस्तुनिर्देशेष्वन्यतमस्य विधेयता(तया) प्रारिप्सितग्रन्थाविघ्नपरिसमाप्त्यादिप्रयोजनाय च सकलदेवतात्मकं भगवन्तं श्रीकृष्णं कीर्तयन्नाशिषं प्रयुङ्क्ते—

त्रयीयुवतिसीमन्तसीमासिन्दूरबन्धवः ।
संसाराब्धि पिबेयुर्वः कंसारेः पादपांसवः ॥

* * * *

कविः स्वौद्धत्यं परिजिहीर्षुः प्राह—

गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेलाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥

बुध्यत इति बुधो विद्वान् . . . .

* * * *

अन्योऽप्यर्थः तस्य शक्त्या महिम्ना हेतुना सर्वेषां दानवानां रक्षसां निर्वृतिं पुनरुज्जीवनरूपं सुखं कुर्वाणा । काव्यस्य शुक्रस्य विद्या संजीवनीविद्येत्यर्थः ।

शुक्रो दैत्यगुरुः काव्य इत्यमरः । श्रुतिगता कर्णे उपदिष्टा सती मृतस्य मरणं प्राप्तस्यापि रक्षोबलस्येति शेषः । जीवनी जीवयित्री स्यात् । पुरा किल भगवानुशना मुनिः आदितेयानां युधि प्रमीतान् दानवानभिवीक्ष्य सञ्जीवनीविद्यया तानखिलानुज्जीवयामासेति पौराणिकी कथा श्रूयते ॥

End:

अत्र भगवतो वासुदेवस्य सङ्कीर्तनेन काव्यान्त्ये मङ्गलाचारः कृत इति अनुसन्धेयम् । मङ्गलाचारयुक्तानां विद्यत इति श्रुतः । अत्रादौ त्रयीयुवतीत्यादिना भगवत्सङ्कीर्तनरूपो मङ्गलाचारः कृतः, मध्ये तु स्वस्थानादवरोप्ये-[ती]त्यादिना, अन्तेत्वनेन(नेति)विवेकः ।

Colophon:

इति श्रीभगवन्महेश्वरस्य देवणाराध्यसूनुना नागणार्येण विरचिता कविराक्षसीयकाव्यस्य व्याख्या श्लिष्टार्थदीपिका समाप्ता ॥

साक्षरेषु भवतीह जगत्यां सर्व एव हृदि मत्सरयुक्तः ।
साक्षरं कविजनेषु यदेनं लोक एव कविराक्षसमाह ॥
अप्पाजयेन लिखितं प्रमादीचाब्दबाहुले ।
कविराक्षससत्काव्यं सव्याख्यानमिदं सता ॥

No. 12004. कविराक्षसीयम्, सव्याख्यानम्.
KAVIRĀKṢASĪYAM WITH COMMENTARY.

Pages, 34. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 11922.

Breaks off in the 68th verse.

Similar to the above. The text with a commentary. The author of the commentary is not known.

Beginning:

त्रयीयुवतिसीमन्तसीमासिन्दूरबन्धवः ।
संसाराब्धिं पिबेयुर्वः कंसारेः पादपांसवः ॥

गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेलाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥

अत्र कविः स्वौद्धत्यं जिहीर्षुराह । बुध्यत इति बुधः विद्वान् । गुणः श्लेषादिः । दोषोऽसाधुप्रयोगः । तावुभौ गृह्णन् जानन्नपि । पूर्वं शिरसा श्लाघते । शिरःकम्पपूर्वकं श्लाघत इत्य[illegible] । परं दोषम् । कण्ठे गले । नियच्छति स्थापयति; न वक्तीत्यर्थः । ई[illegible] इ[illegible]क्ष्वेलाविव । सोऽपि चन्द्रमसं

शिरसा धत्ते । विषं तु कण्ठे धृतवान् । तथा मत्काव्यस्थान् गुणान् गृह्णन्तु दोषान्न गृह्णन्त्विति कविर्विपश्चितः प्रार्थितवानित्यनुसन्धेयम् ॥

शब्दशक्त्यैव नि(कु)र्वाणा सर्वदानवनिर्वृतिम् ।
काव्यविद्या श्रुतिगता स्यान्मृतस्यापि जीवनी ॥

End :

अपथेनैव यो मोहादन्धः सारयते स्वयम् ।
नीचोपसर्पणवशात् स पतेद्वंशवानपि ॥ ६४ ॥

अपथेन अमार्गेण ; स्वनिषिद्धाचारेणेत्यर्थः । योऽन्धः ; लक्षणया अज्ञ इत्यर्थः । नीचानां निकृष्टानाम् ; दुराचाराणामिति यावत् ।

* * * *

पुरुषः वंशवानपि कुलीनोऽपि पतेत् ; नरक इति शेषः । कुलस्याकिंचित्करत्वादाचारस्य प्राशस्त्याच्चेति भावः । अन्योऽप्यर्थः—योऽन्धो लोचनहीनः पुरुषः । नीचोपसर्पणवशा.

No. 12005. कविराक्षसीयपदान्वयः.

KAVIRĀKṢASĪYAPADĀNVAYAḤ.

Pages, 11. Lines, 5 on a page.

Begins on fol. 20*a* of the MS. described under No. 11828.

Complete.

The stanzas contained in the text of the work described under the previous number is given in prose order herein.

Beginning :

त्रयीयुवतिसीमन्तसीमासिन्दूरबन्धवः, कंसारेः पादपांसवः, वः, संसाराब्धिं, पिबेयुः ॥

बुधः, गुणदोषौ, ईश्वरः, इन्दुक्ष्वेलाविव, गृह्णन् सन्, पूर्वं शिरसा श्लाघते, परं कण्ठे नियच्छति ॥

End :

बहुधा, महिमोल्बणः, राजा, सर्वाः, प्रजाः, अधः कुर्वन् सन्, कस्मिंश्चित्, अपर्वणि, अहिभयाकुलो भवेत् ॥

कोशादिभिः संपूर्णोऽपि, राजा, महात्मा, करपातेन, वसुमताम्, सर्वम्, हरन्, अन्वहम्, कलया, क्षयम्, [illegible]ते

No. 12006. कविसञ्जीवनी.

KAVISAÑJĪVANĪ.

Substance, palm-leaf. Size, 15¼ × 1⅝ inches. Pages, 60. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Grahaṇanirṇaya 31*a*. Breaks off in the second Stabaka.

Similar to the work described under R. No. 1158 of the Triennial Catalogue, Vol. II, Part I-A. By Śrīnivāsa.

Beginning:

(रमाक्ष)माकराम्भोजलाख्यं श्रुतिवतंसितम् ।
नमिकर्मीचरीकर्मि नारायणपदाम्बुजम् ॥
(माध्वीसहित)मृद्वीकामाधुरीसद्द्युध्वरी ।
सूक्तिश्रीः सुलभा यस्मात्तस्मै श्रीगुरवे नमः ॥
कविसञ्जीवनी नाम काव्यं चित्रात्मकं मया ।
क्रियते श्रीनिवासेन सतां पादोपजीविना ॥
प्राचीन(कविरा)जोक्तिसुधास्वादकृतां सताम् ।
उपदंशपदे भूयादुज्ज्वला भणितिर्मम ॥

अथादावुत्तरप्रश्नाख्यं चित्रम्—
प्रकृतप्रश्नस्योत्तर . . . .

* * * *

नयवत्यस्ति नृपे का प्रतिवाक् क्षुधित इति यस्य स इह स्यात् ॥ कोऽशिता ॥
(खिद्यति)कार्केऽस्तमिते प्रत्युक्तिर्यस्य दीन इति स इह ॥ कोऽकी ॥

End:

अलं ह्लादयितुं रात्रौ काकाश्चन्द्रस्य देहिनः ।
दातेत्यादि . भाः ।
विद्यावृत्तकुलादीनि दातुं काका अलं नृणाम् ॥
. . . . दि वराः ॥
कः के तनुभृतां दातुमलमत्याहितं सदा ॥
दातेत्यादि क्रव्यादः ॥

Colophon:

कविसञ्जीवनाख्येऽ[illegible]न् काव्ये स्तबकः आदिमः ।
. . . . [illegible] सारस[illegible] चर्करीतु सतां मुखे ॥

अथाक्षरच्युताख्यं चित्रम्—

यद्यच्युताक्षरेण स्यात्साधर्म्यं च्युताक्ष . . . ।

(क)तमक्षरच्युतकमित्यभिधानं शब्दचित्रज्ञैः ।'

* * * *

अजडस्सत्यभिषङ्गेष्व(ऽप्य)हह मदो दुर्दमो हि नरैः ॥ मदनश्च ॥

No. 12007. काव्यसङ्ग्रहः.
KĀVYASAṄGRAHAḤ.

Pages, 8. Lines, 14 on a page.

Begins on fol. 390*a* of the MS. described under No. 1800.

Written on one side of paper.

Complete.

An anthological collection of stanzas gathered from various sources enumerating groups of nine, eight, seven, six and five noted persons, things, or qualities possessing the same or similar characteristics.

Beginning :

नव रत्नानि—

धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः ।

ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य ॥

नवरत्नम्—

मित्रमर्थस्तथा नीतिर्धर्मकार्पण्यमूर्खकाः ।

स्त्रीणां विद्वान् तथोत्खातान्नवरत्नमिदं क्रमात् ॥

मित्रं स्वच्छतया रिपुं नयबलैर्लुब्धं धनैरीश्वरं

कार्येण द्विजमादरेण युवतिं प्रेम्णा समै(गुणै)र्बान्धवान् ।

अत्युग्रं स्तुतिभिर्गुरुं प्रणतिभिर्मूर्खं कथाभिर्बुधं

विद्याभी रसिकं रसेन सकलं शीलेन कुर्याद्वशम् ॥

अर्थो लाघवमुच्छ्रितो निपतनं कामातुरो लाञ्छनं

लुब्धोऽकीर्तिमसङ्गरः परिभवं दुष्टोऽन्यदोषे रतिम् ।

निस्स्वो वञ्चनमुन्मना विकलतां शोकाकुलः संशयं

दुर्योगप्रियतां दुरोदरवशः प्राप्नोति कष्टं मुहुः ॥

End :

शशी दिवसधूसरो गलितयौवना कामिनी

सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।

प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गणगतः खलो मनसि सप्त शैला(शल्या)नि मे ॥
निस्स्वो वष्टि शतं शती दशशतं लक्षं सहस्राधिपो
लक्षेशः क्षितिपालतां क्षितिपतिश्चक्रेशतां वाञ्छति ।
चक्रेशः पुनरिन्द्रतां सुरपतिर्ब्राह्मं पदं वाञ्छति
ब्रह्मा शैवपदं शिवो हरिपदं आ(ह्या)शावधिं को गतः ॥

Colophon:

इत्यष्टरत्नं समाप्तम् ॥

No. 12008. काव्यसङ्ग्रहः.
KĀVYASAṄGRAHAḤ.

Pages, 6. Lines, 8 on a page.

Begins on fol. 2*b* of the MS. described under No. 1728.

Date of the MS.—Saturday, the 1st day of the bright fortnight of the Kārttika month in the year Śukla.

Same work as the above.

The scribe adds—

वात्स्यश्रीनरसिंहार्यस्येदं तेनैव लिखितमिति पण्डितैर्ज्ञेयम् ।

No. 12009. कुरङ्गीपञ्चकम्.
KURAṄGĪPAÑCAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 5048.

Complete.

Five stanzas apparently addressed to a deer advising it to leave the forest beset with various evils. The advice is really intended for some person.

Beginning:

अथ कुरङ्गि तुरङ्गमविक्रमे त्यज वनं जवनं गमने कुरु ।
इह वसन्ति वनेचरनायकाः सुरभिलोहितरूषितसायकाः ॥
जालैर्दिशः प्रवितता सलिलं विषाढ्यं
खाता मही हुतभुजा ज्वलिता वनान्ताः ।
व्याधाः पदान्यनुसरन्ति गृहीतचापाः
कं देशमाश्रयति किं [illegible] रङ्गि ॥

End :

मध्ये ज्या त्रुटिता शरासनमहो भग्नं दवाग्नेरयं
दग्धं जालमकालमेघसलिलैः शान्तश्च दावानलः ।
श्वागच्छच्छशकाशयाशुगमना सूता मृगा गर्भिणी
तामापत्सरितं <u>ततार</u> <u>कृपया</u> <u>देवस्य</u> लक्ष्मीपतेः ॥

A number of works described below can be brought under the heading Anthology which consists of a collection of choice and pithy stanzas taken generally from different authors. These stanzas deal with a variety of subjects, such as morals, love, devotion, learning, etc. In some cases the stanzas are classified and arranged under suitable titles which will indicate the subject-matter of the stanzas. This is the systematic method of compilation. But it is not invariably the case. Stray stanzas dealing with different subjects are mixed up and are called Cāṭuślōkas. The stanzas generally indicate the meaning plainly while some are अन्यापदेश stanzas, i.e., those which suggest a meaning different from that which the expressions apparently yield.

No. 12010. चाटुधारा.
CĀṬUDHĀRĀ.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 190. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 4*a*, 95*a* and 105*a*. The other works herein are Bhartṛharisubhāṣita 1*a*, Rāmamaṅgalāśāsana 3*a*, Divyadēśamaṅgalāśāsanapañcaka 89*a*, Rāmayatsarikādi 102*a*.

Complete.

A work of the nature described above.

Beginning :

दरिद्रायैव दातव्यं न समृद्धाय कर्हिचित् ।
वर्षाणां हि तटाकेषु फलं नैव पयोधिषु ॥
चातकस्त्रिचतुरान् पयःकणान् याचते जलधरं पिपासया ।
सोऽपि पूरयति विश्वमम्भसा हन्त हन्त महतामुदारता ॥

End :

कलिन्दकन्यापुलिने कदाचिद् विरि[illegible]नीतानवलोक्य वत्सान् ।
य आत्मभावेन समस्तवत्सो[illegible]भूव[illegible]ः ब्रह्मनुतं तमीडे ॥

No. 12011. चाटुधारा.
CĀṬUDHĀRĀ.

Substance, paper. Size, 12 × 8 inches. Pages, 198. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 161*a*. The other works herein are Cāṭudhārā 1*b*, Cāṭudhārāvyākhyā 264*b*, Prasaṅgaratnāvalī 289*a*.

Complete.

This anthology dealing with different subjects consists of six Paddhatis, viz.:—

नानापद्धतिः	202 stanzas.	विद्वत्पद्धतिः	59 stanzas.
नीतिपद्धतिः	218 „	अन्यापदेशपद्धतिः	201 „
प्रभुपद्धतिः	79 „	शृङ्गारपद्धतिः	156 „
			915 „

Beginning:

नानापद्धतिः—

व्यसनिन इव विद्या क्षीयते पङ्कजश्रीः
गुणिन इव विदेशे दैन्यमायान्ति भृङ्गाः ।
कुनृपतिरिव लोकं पीडयत्यन्धकारो
धनमिव कृपणस्य व्यर्थतामेति चक्षुः ॥
कलमाः पाकविनम्रा मूलतलाघ्रातसुरभिकल्हाराः ।
पवनाकम्पितशिरसः प्रायः कुर्वन्ति परिमलश्लाघाम् ॥

End:

वायुश्चोरो भुवनविदितो यत्र यत्रापहर्ता
रम्यान्गन्धान्गगनचरतो यात्यदृष्टः कथञ्चित् ।
चोरस्थानं भवति यदतिश्रेष्ठभूतेषु स्पष्टं
नैतद्व्योमेत्युदितवचनां जारकः प्राहरत्ताम् ॥

No. 12012. चाटुधारा.
CĀṬUDHĀRĀ.

Pages, 159. Lines, 20 on a page.

Begins on fol. 1*b* of the MS. described under the previous number.

This is an incomplete copy and is written on one side of paper. There is a note by Mr. C. P. Brown explaining the significance of the letters marked in the margin against the stanzas in this MS.:

"The marks put in the margin point out the subject-matter of verses." Thus, those which are marked नी ॥ are नीति, शृ ॥ are शृङ्गार, अ ॥ are अलङ्कार (अन्यापदेश), प्र ॥ are प्रभु, ना ॥ are नाटक (नाना) and दे ॥ are देव."

This copy gives the stanzas contained in the work described under the last number, but they are mixed up and are not arranged in the order of the Paddhatis to which the stanzas belong. A letter marked in the margin against each of the stanzas (evidently by Mr. C. P. Brown) denotes the Paddhati to which it belongs. This MS. contains 1031 stanzas.

Beginning:

देव ॥ शिवमस्तु सर्वजगतः परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु शान्ति सर्वत्र जनः सुखी भवतु नित्यम् ॥

नी ॥ मान्धाता स महीपतिः कृतयुगालङ्कारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ।
अन्ये चापि युधिष्ठिरप्रभृतयो याता दिवं भूपते
नैकेनापि समं गता वसुमती नूनं त्वया यास्यति ॥

नी ॥ घटो जन्मस्थानं मृगपरिजनो भूर्जवसनो
वने वासः कन्दादिकमशनमेवंविधगुणः ।
अगस्त्यः पाथोधिं यदकृत कराम्भोजकुहरे
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥

End:

अ ॥ दिव्यं चूतरसं पीत्वा गर्वं नायाति कोकिलः ।
पीत्वा कर्दमपानीयं भेको बकबकायते ॥

नी ॥ गुणैरुत्तुङ्गतां याति न तु जातिस्वभावतः ।
प्रासादशिखरस्थोऽपि काकः किं गरुडायते ॥

ना ॥ आमरी चामरी भाषा क्वचिदस्ति वनान्तरे ।
इयं तु पामरी भाषा सूकरीव गृहे गृहे ॥

नी ॥ चण्डालः पक्षिणां काको मृगचण्डालरासभः ।
यतीनां कोऽपि चण्डालः सर्वचण्डालदूषकः ॥

No. 12013. चाटुधारा.
CĀṬUDHĀRĀ.

Pages, 20. Lines, 22 on a page.
Written on one side of paper.
Begins on fol. 360b of the MS. described under No. 11886.

Contains the stanzas beginning from 924 to the end of the work described under the last number.

Same work as the above.

No. 12014. चाटुधाराव्याख्या.
CĀṬUDHĀRĀVYĀKHYĀ.

Pages, 12. Lines, 30 on a page.

Written on one side of paper.

Begins on fol. 264*b* of the MS. described under No. 12011.

Contains the commentary on 44 stanzas in the Nīti-paddhati forming part of the work described under No. 12011.

Beginning :

मान्धातेति । कृतयुगस्य कृताख्यस्य कालविशेषस्य । अलङ्कारभूतो भूषणभूतः । मान्धाता मान्धातृनामा । सः प्रसिद्धः । महीपतिः राजा । गतः दिवं प्रति यातः ; मृत इत्यर्थः । येन श्रीरामेण । महांश्चासावुदधिश्च महोदधिर्महासमुद्रस्तस्मिन्सेतुरालिर्विरचितः कृतः । असौ दशास्यस्य रावणस्यान्तकः संहर्ता रामः । क कुत्र वर्तते ? न कुत्रापीत्यर्थः ; सोऽपि दिवं गत इति भावः । युधिष्ठिरप्रभृतयो धर्मराजादयः दिवं गताः याताः ।

* * * *

पुरा किल राज्यहेतोः स्वात्मानं जिघांसन्तं पितृव्यं मुञ्जं भोजः साक्षेपमनेन श्लोकेनोक्तवानिति कथयन्ति ।

End :

जल इति । जले सलिले तैलं तिलस्नेहः ; जलपतितस्य तैलस्य सर्वतो विसृमरत्वादिति भावः । खले दुर्जने । गोप्यं गोपनीयं च ; खलाय कथितं रहस्यं चेत्यर्थः । तस्यापि सर्वव्यापकत्वादिति भावः । पात्रे तपोविद्यादिसम्पन्ने दानं तस्य बहुफलप्रदायित्वादिति भावः । धीमत्सु बुद्धिमत्सु शिष्येषु विद्यादानं च । पात्रतः आधारमहिम्ना । मनागपि पूर्वोक्ततैलादिकं स्वल्पमपि । विस्तारं वैपुल्यम् । याति गच्छति ॥

No. 12015. चाटुरत्नाकरः.
CĀṬURATNĀKARAḤ.

Substance, palm-leaf. Size, 10¼ × 1¼ inches. Pages, 72. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other works herein are Bhāratasāvitrī 37*a*, Cāṭuślōkas 43*a*.

A collection of select an[illegible]ithy [illegible]anzas on morals, love, devotion, etc.

Beginning:

परिहासेऽप्यनौचित्यं स्वप्नेऽप्यन्यवधूकथाम् ।
शत्रावप्यगुणारोपं काकतीन्द्रो न मृष्यति ॥
विभूषणं किं कुचमण्डलानां कीदृश्युमा केन विभाति चन्द्रः ।
किमाह सीता दशकण्ठनीता हारामहादेवरतातमातः ॥
स्वोदरपूरणहेतोरस्मान् धन्येषु दर्शयन्त्येते ।
इति किल चिन्ताविवशाः पतन्ति दन्ता इवाशु मर्त्यानाम् ॥
आपदर्थे धनं रक्षेद्दारात्रक्षेद्धनैरपि ।
आत्मानं सर्वथा रक्षेद्दारैरपि धनैरपि ।

End:

प्रणिधानविशेषभावितात्मा करणग्रामनिरोधनिष्प्रकम्पः ।
निभृतश्वसनो निवृत्तधर्मा पुरुषस्त्यक्तपरिग्रहोऽयमास्ते ॥
मातर्मेदिनि ! तात मारुत ! सखे तेजः सुबन्धो जल
भ्रातर्व्योम ! निबद्ध एष भवतामद्य प्रणामाञ्जलिः ।
युष्मत्सङ्गवशोपजातसुकृतस्फारस्फुरन्निर्मल-
ज्ञानापास्तसमस्तमोहमहिमा लीये परं(रे) ब्रह्मणि ॥

No. 12016. चाटुश्लोकाः.
CĀṬUŚLŌKĀḤ.

Pages, 55. Lines, 22 on a page.

Begins on fol. 81*a* of the MS. described under No. 1493, wherein this work has been omitted to be mentioned in the list of other works given therein.

Contains 305 stanzas.

Similar to the above.

Beginning:

नीलं वपुर्वहतु चुम्बतु सत्फलानि
रम्येषु संचरतु चूतवनान्तरेषु ।
पुंस्कोकिलस्य चरितानि करोतु नाम
काकः कलध्व(नि)विधौ खलु काक एव ॥
धृतकल्याणपल्याणः सचामीकरचामरः ।
मुखलीनखलीनश्च रासभः किं हयो भवेत् ॥

End:

क्षीरेणात्मगतोदकाय हि पुरा दत्ता गुणास्तेऽखिलाः
क्षीरोत्तापमवेक्ष्य तेन सहसा ह्यात्मा कृशानौ हुतः ।
गन्तुं पावकमुन्मुखं तदभवद्दृष्ट्वा तु मित्रापदं
क्षी(नी)रेणैव ततो हि शाम्यति सतां मैत्रीगुणास्त्वादृशाः ॥
यामाराद्धुं न गणितमिदं जीवितं वा धनं वा
यस्याः प्रीतिर्मनसि कलिता जा(ज्या)यसी मोक्षतोऽपि ।
सैवेदानीं वयसि चलिते संप्रहाणे च वित्ते
तूलायापि त्रिपुरहर मा मन्यते नैव भार्या ॥

No. 12017. चाटुश्लोकाः.
CĀṬUŚLŌKĀḤ.

Substance, palm-leaf (Śrītāla). Size, 6½ × 1½ inches. Pages, 76. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Similar to the above.

Beginning:

अनभ्यासे विषं शास्त्रमजीर्णे भोजनं विषम् ।
दरिद्रस्य विषं गोष्ठी वृद्धस्य तरुणी विषम् ॥
कोकिलानां स्वरं रूपं नारीरूपं पतिव्रतम् ।
विद्या रूपं कुरूपस्य क्षमा रूपं तपस्विनः ॥
कुमित्रे नास्ति विश्वासः कुभार्यायां न वै सुखम् ।
कुदेशे नास्ति मर्यादा कुराज्ये नास्ति जीवनम् ॥

End:

अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दश तिन्त्रिणीकम् ।
कपित्थबिल्वामलकत्रयं च नवाम्रवापी नरकं न पश्यति ॥

No. 12018. चाटुश्लोकाः.
CĀṬUŚLŌKĀḤ.

Substance, palm-leaf. Size, 18 × 1⅝ inches. Pages, 8. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 18*a*. The other works herein are Mudrārākṣasa 1*a*, Bhāminīvilāsa 14*a*.

Contains 112 stanzas.
Similar to the above.

Beginning :

किं रम्यं वारि विद्वन्मुनिवनमटति व्योम्नि किं का ररक्ष
श्रीशः क द्वेष्टि सिंहः किमुपमितपदं किं हरेरायुधं वा ।
केऽवज्ञा मानिनां का वरतनुरमलं किं कमारोहतीन्द्रः
के पान्थाः काश्च हंसा विहृतवसतयः पद्मिनीवारिभङ्गाः ॥
किं तृष्णाकारि कीदृग्रथचरणमलं रौति कः काञ्चिकाश्वी
कोऽपसारी भुजङ्गे किमु कलहशमा वाक् च सम्बोधनं किम् ।
का सुन्दर्यामपीन्दुः कथमचर(वनि)भृतः कापि सम्बुद्धिरम्ने-
र्बीजं किं कावनि(नी)जापतिसुमतिहरा हेमसारङ्गलीला ॥

End :

स्वादन् न गच्छामि हसन् न भाषे
द्वयोस्तृतीयो न भाविराश्रुजन् (भवामि शृण्वन्) ।
कृतं (गतं) न शोचामि ग(कृ)तं स्मरामि
गुरुं न निन्दामि कुतोऽस्मि मूर्खः ॥
भवित्री रम्भोरु त्रिदशवदनग्लानिरधुना
स ते रामः स्थाता न युधि पुरतो लक्ष्मणसखः ।
इयं यास्यत्युच्चैर्विपदमधुना वानरचमू-
र्लघिष्ठेमं षष्ठाक्षरपद(र)विलोपं पठ पुनः ॥

No. **12019.** चाटुश्लोकाः.

CĀṬUŚLŌKĀḤ.

Substance, palm-leaf. Size, $14\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 18. Lines, 5 on a page. Character, Kanarese. Condition, injured. Appearance, new

Wants the beginning. Contains 106 stanzas.

Similar to the above.

Beginning :

महाप्रभञ्जनं प्राप्य स्वान्तेषु कलुषीकृताः ।
प्रतिकूलं विचेष्टन्ते नराः केऽपि जडाशयाः ॥
दत्त्वा वारि जनाय स्वं दिक्षु गर्जन्ति ये मुहुः ।
तानुल्लेकवतः प्राप्य नन्दन्ति न दीपकाः ॥

End:

शक्तः शब्द इवैकः स्यात्साधुश्रुतिपथे स्थितः ।
सदध्याहारपूर्णस्य स्वार्थस्य प्रतिपादने ॥
महान् स एव पुरुषो यस्य सत्यानुरोधिना ।
आक्षिप्तपारिजातेन बाहुना रक्ष्यते जगत् ॥

No. 12020. चाटुश्लोकाः.
CĀṬUŚLŌKĀḤ.

Substance, palm-leaf. Size, 8⅛ × 1 inches. Pages, 68. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Similar to the above.

Beginning:

जल्पनेन किमनल्पसुधोर्मीकल्पकल्पतरुपकफलादाम् ।
अन्यवन्यफलमण्डजमान्यं कन्यकामणि कदन्नमिदं नः ॥
पातिताः किमपि पा(वा)म(केक)रा मन्दमन्दमरविन्दमुखीभिः ।
पातयामि बलहन्तुरहन्तां प्रौढचाटुवचनानि नवोढाः ॥

End:

अस्त्यद्यापि चतुस्समुद्रपरिखापर्यन्तमुर्वीतलं
सन्त्यन्येऽपि समस्तवाक्यचतुराः केचित् कचिद्भूभृतः ।
एको यत्र निरादरो यदि भवेदन्यो भवेत्सादरः
वाग्देवी वदनाम्बुजे वसति चेत् को नाम दीनो जनः ॥

No. 12021. चाटुश्लोकाः.
CĀṬUŚLŌKĀḤ.

Substance, palm-leaf. Size, 14⅝ × 1¼ inches. Pages, 10. Lines, 9 on a page. Character, Grantha and Telugu. Condition, good. Appearance, new.

Begins on fol. 46a. The other works herein are Vidagdhamukhamaṇḍana 1a, Vidagdhamukhamaṇḍanadīpikā 18a, Nītidviṣaṣṭikā 29a, Subhāṣitasudhānandalaharī 3[illegible].

Similar to the above.

Beginning:

हारो भाति कुचद्वयं तव शिवे मध्यं वपुस्त्वद्वचः
केशा नासिकमौक्तिकं च वदनं रोमावली लोचने ।
गङ्गावद् गजकुम्भवद्गगनवद्गाङ्गेयवद्गेयवत्
जम्बूवज्जलबिन्दुवज्जलजवज्जम्बालवज्जालवत् ॥
क प्रस्थितासि करभोरु घने निशीथे
प्राणेश्वरो वसति यत्र मनःप्रियो मे ।
एकाकिनी वद कथं न बिभेषि बाले
नन्वस्ति पुङ्खितशरो मदनः सहायः ॥

End:

सर्वालङ्कारबर्हायितसुरपतिसद्व्योमयाने रथेऽस्मिन्
दुर्वारोदारगर्वातुलगतिविभवे श्रीमदर्वोपनद्धे ।
वर्वारापारसर्वानटनपदयुगस्फूर्जदम्भोदनादे
सर्वाभीष्टाय शर्वात्मज इह भवतात् सुस्थितोऽस्माकमाशु ।
तनोतु तरुणीचारुलोलनेत्रद्वयं सुखम् ।
कर्णावलम्बिनीलाम्बुरुहकान्तिविडम्बि वः ॥

No. 12022. चाटुश्लोकाः.
CĀṬUŚLOKĀḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 8*a* of the MS. described under No. 9372.
Similar to the above. This work is attributed to Kālidāsa.

Beginning:

चेटीभवन्निखिलभे(खा)टीकदम्बवनवाटीषु नाकिपटली-
कोटीरचारुतरकोटीमणीकिरणकोटीकरम्बितपदा ।
पाटीरगन्धिकुचशाटी कवित्वपरिपाटीमगाधिपसुता
घोटीखुरादधिकधाटीमुदारमुखवीटीरसेन तनुताम् ॥
[illegible]पायनप्रभृतिशापायुधत्रि[illegible]दिवसोप[illegible]धूलिचरणा
पापापहस्वमनुजापानुलीन[illegible]गता[illegible]नोदनिपुणा ।

नीपालया सुरभिभूपालका दुरितकूपादुदञ्चयतु मां
कूपाधिकाशिखरिभूपालवंशमणिदीपायिता भगवती ॥

End:

यालीभिरात्ततनुरालीसकृत्प्रियकपालीषु खेलति भया-
व्यालीनकुल्यसितचूलीभराभरणधूलीलसन्मणिगणा ।
नालीभृति श्रवसि तालीदलं वहसि यालीतिशोभितिलका
. . . . . कालीमनस्यपदनालीकसेवनविधौ ॥

No. 12023. चाटुश्लोकाः.

CĀṬUŚLŌKĀḤ.

Substance, palm-leaf. Size, 7 × 1¼ inches. Pages, 36. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Similar to the above.

Complete.

Beginning:

मातृवत् परदाराणि परद्रव्याणि लोष्टवत् ।
आत्मवत् सर्वभूतानि यः पश्यति स पश्यति ॥
निमन्त्रणोत्सवा विप्रा गावो नवतृणोत्सवाः ।
भर्तारस्यागता(भर्तृरत्युत्सवा)नारी अहं कृष्णरणोत्सवः ॥

End:

पुस्तकेषु च या विद्या परहस्तेषु यद्धनम् ।
अभ्रच्छाया तृणाद्वह्निः पराधीनं तु न सुखम् ॥
विद्वत्सङ्गे विवाहे च यज्ञे च नृपदर्शने ।
सन्ध्यावन्दनवेलायां दोषोऽयं न कदाचन ॥

No. 12024. चाटुश्लोकाः.

CĀṬUŚLŌKĀḤ.

Pages, 54. Lines, 22 on a page.

Begins on fol. 323*a* of the MS. described under No. 11836.

Similar to the above.

Beginning:

चरन् वनान्ते नवकुन्दरेषु न षट्पदो गन्धफ(ली)मजिघ्रत् ।
सा किं न रम्या स[illegible](लि)[illegible] न रक्तो बलीयसी केवलमीश्वरात्ता ॥

605-A

अमर भ्रमरा(ता)दिगन्तराले क्वचिदासादितमीक्षितं श्रुतं वा ।
वद सत्यमपास्य पक्षपातं यदि जाजीकुसुमानुकारि पुष्पम् ॥

End:

भवित्री रम्भोरु त्रिदशवदनग्लानिरधुना
न रामो न (स ते रामः) स्थाता न युधि पुरतो लक्ष्मणसखः ।
इयं यास्यत्युच्चैर्विपदमधुना वानरचमूः
लघिष्ठेदं षष्ठाक्षरपरविलोपात्पठ पुनः ॥
बहूनामल्पसाराणां संयोगः कार्यसाधकः ।
तृणैराबध्य(रभ्य)ते जन्तु(रज्जु)स्तेन नागोऽपि बध्यते ॥

No. 12025. चाटुश्लोकाः.
CĀṬUŚLOKĀḤ.

Substance, paper. Size, 9 × 6¼ inches. Pages, 52. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Prasaṅgaratnākara 27*a*.

Similar to the above.

Beginning:

मन्त्राक्षता विप्रकरेण मुक्ताः पतन्ति ये मानवमस्तकेषु ।
शिलाश्च देवा मनुजा नरेन्द्रा वन्ध्याङ्गना पुत्रवती भवेयुः ॥
दुर्गुणोऽपि सुगुणां सभां गतो दुर्गुणत्वमपयाति सर्वदा ।
अन्त्यजाङ्गणविनिस्सृतं पयो गाङ्गतोयमभिगम्य पावकम् ॥

End:

ब्राह्मणी गणको वेश्या सारमेयश्च कुक्कुटः ।
दृष्टमात्रेण कुप्यन्ति न जाने तत्र कारणम् ॥
आतुरे व्यसनं प्राप्ते दुर्भिक्षे राष्ट्रसङ्कुले ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥

No. 12026. चाटुश्लोकाः.
CĀṬUŚLOKĀḤ.

Pages, 7. Lines, 7 on a page.

Begins on fol. 19*a* of the MS. described under No. 1282.

Contains 35 stanzas.
Similar to the above.

Beginning:

ब्रह्मायुश्चिरमातनोतु सततं नारायणो रक्षतात्
शत्रून् संहरताद्धरस्तु विजयं कुर्याद्बलारिस्तव ।
आरोग्यं कु(रुतात्सहस्र)किरणो दद्याद् बलं मारुतिः
वक्त्रे नृत्यतु भारती च सदने लक्ष्मीश्चिरं तिष्ठतु ॥
यः पूतनामारणलब्धयोगः काको(दरो येन विनीत)दर्पः ।
यशोदयालङ्कृतमूर्तिरव्यान्नाथो यदूनामथवा रघूणाम् ॥

End:

भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किञ्चित्फलं
त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला ।
भुक्तं मानविवर्जितं परगृहेष्वाशङ्कया काकवत्
प्राप्तः काणवराटकोऽपि न मया तृष्णे सकामा भव ॥

No. 12027. चाटुश्लोकाः.
CĀṬUŚLŌKĀḤ.

Pages, 37. Lines, 8 on a page.

Begins on fol. 43*a* of the MS. described under No. 12015.
Similar to the above.

Beginning:

द्वाविमौ पुरुषौ लोके भेत्तारौ सूर्यमण्डलम् ।
परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः ॥
उत्खातान् प्रतिरोपयन् कुसुमितान् चिन्वन् लघून्वर्धयन्
अत्युच्चान्नमयन् पृथूंश्च लघयन् विश्लेषयन् संहतान् ।
वक्रान् कण्टकिनो बहिर्नियमयन् संरोपितान् पालयन्
मालाकार इव प्रयोगकुशलो राजा चिरं जीवति ॥

End:

अधरं निपीय मधुरं प्रियं पतौ य(त)मानमानमसमानभाषणम् ।
अरं विधाय परिरम्भ[illegible][मा][illegible]रादुररीचकार बदरीफलस्तनी ॥

No. 12028. चाटुश्लोकाः.
CĀṬUŚLŌKĀḤ.

Pages, 56. Lines, 8 on a page.

Begins on fol. 49*a* of the MS. described under No. 1467.
Similar to the above.

Beginning :

चकोराणां चन्द्रः कुवलयकदम्बो मधुलिहां
सरोजानां भानुः कुसुमसमयः काननशुभां(भुवाम्) ।
मयूराणां मेघः प्रथयति यथा चेतसि सुखं
तथास्माकं प्रीतिं जनयति तवालोकनमिदम् ॥
लक्ष्मीश्चेन्न सरस्वती तदुभयं यद्यस्ति नोदारता
तच्चापि त्रितयं घटेत यदि चेत्पुण्यैरगण्यैरपि ।
सौजन्यं न विजृम्भते तदपि चेन्नास्त्येव धर्मे रतिः
तत्सर्वं जगदीश्वरस्य कृपया त्वय्येव सन्दृश्यते ॥

End :

असम्पादयतः कञ्चिदर्थं जातिक्रियागुणैः ।
यदृच्छाशब्दवत्पुंसः संज्ञायै जन्म केवलम् ॥
सर्वदेवमयो राजा ऋषिभिः परिकीर्तितः ।
. . . . ॥

No. 12029. चाटुश्लोकाः.
CĀṬUŚLŌKĀḤ.

Substance, palm-leaf. Size, $14\frac{5}{8} \times 1\frac{3}{8}$ inches. Pages, 38. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Śukasaptatikathā 20*a*.
Incomplete.
Similar to the above.

Beginning :

लोकानन्दन चन्दनद्रुम सखे नास्मिन् वने स्थीयतां
दुर्वंशैः परुषैरसारहृदयैराक्रान्तमेतद्वनम् ।
ते अन्योन्यनिघर्षजातदहनज्वालावलीसङ्कुला
न स्वान्येव कुलानि केवलमपि सर्वं दहेयुर्वनम् ॥

End:

दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः
करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः ।
इदानीं लोकेऽस्मिन्ननुपमशिखानां पुनरयं
नखानां पाण्डित्यं प्रकटयति(तु) कस्मिन् मृगपतिः ॥

No. 12030. चाटुश्लोकाः.

CĀṬUŚLŌKĀḤ.

Substance, palm-leaf. Size, 14 × $1\frac{1}{8}$ inches. Pages, 24. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Subhāṣitasudhānandalaharī 13*a*, Saṅgītaviṣaya 34*a*.

Wants beginning.

Similar to the above.

Beginning:

द्वारि वारणपतिर्बहिरास्ते मन्दिरे वसति बालबिडालः ॥
सदसि विदुरभीष्मद्रोणशारद्वतानां
पतिभिरमितवीर्यैः पञ्चभिः पालितापि ।
अहह परिभवस्य द्रौपदी पात्रमासीत्
बलवति सति दैवे बन्धुभिः किं विधेयम् ॥
कल्याणं वः क्रियासुर्मिलदटनियुगस्थास्नुगीर्वाणभोगि-
श्रेणव्यत्यस्तकल्पद्रुमकुसुममनोहारिहारावलीनि ।
नालीकाश्लिष्टलक्ष्मीकरतलकमलोद्भ्रान्तमाध्वीकधारा-
तिर्यक्फालेक्षणानि त्रिपुरहरधनुर्ज्यालताकर्षणानि ॥

End:

शूली जातः कदशवचना(नवशा)द्भैक्षचर्यात्कपाली
वस्त्राभावाद्दिगतवसनः स्नेहशून्याज्जटावान् ।
इत्थं राजंस्तव परिचयादीश्वरत्वं मयाप्तं
राजापि त्वं मम नरपते नार्धचन्द्रं ददासि ॥

No. 12031. चाटुश्लोकाः.

CĀṬUŚLŌKĀḤ.

Substance, palm-leaf. Size, $15\frac{5}{8}$ × $1\frac{1}{4}$ inches. Pages, 48. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Incomplete.

Similar to the above. These stanzas are written again beginning from fol. 24*a*.

Beginning:

अनारम्भो मनुष्याणां प्रथमं बुद्धिलक्षणम् ।
आरब्धस्यान्तगमनं द्वितीयं बुद्धिलक्षणम् ॥
दुर्जनो दोषमादत्ते दुर्गन्धमिव सूकरः ।
सज्जनस्तु गुणग्राही हंसः क्षीरमिवाम्भसः ॥

End:

सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम् ।
असद्भिः शपथेनापि वचः प्रोक्तं जले लिपिः ॥
मानुष्ये सति दुर्लभा पुरुषता . . . ।

No. 12032. चाटुश्लोकाः.

CĀṬUŚLŌKĀḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 59*b* of the MS. described under No. 11939.

Similar to the above.

Beginning:

इन्दुं निन्दति तस्करो गृहपतिं जारः सुशीलं खलः
साध्वीमप्यसती कुलीनमकुलोत्पन्नो जरन्तं युवा ।
विद्यावन्तमनक्षरो धनपतिं निस्स्वः सुरूपोज्ज्वलं
वैरूप्यैकनिधिः प्रबुद्धमबुधश्शिष्टं निकृष्टो जनः ॥
दुष्टे सरुषि मध्यस्थे राजनि त्रिविधा गुणाः ।
दोषा गुणा गुणा दोषा दोषा दोषा गुणा गुणाः ॥

End:

वाचाटोक्तौ वागमृते वा सुकवीनां स्तोकप्रज्ञास्तुल्यदृशो हन्त भवन्ति ।
गोमायूनां कोकिलयूनामपि शब्देष्वेकाकारा मानसवृत्तिर्महिषाणाम् ॥

No. 12033. चाटुश्लोकाः.

CĀṬUŚLŌKĀḤ.

Substance, paper. Size, 12¼ × 8½ inches. Pages, 12. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 282*a*. The other works herein are Kādambarī 1*a*, Śilpaśāstra 87*a*, Prasaṅgaratnāvalī 194*a*.

Similar to the above.

Beginning :

न चेतश्चाम्पेयस्तवकनिकुरुम्बेऽभिकमते
समुत्कण्ठा काचिन्नवविकचपुन्नागमुकुले ।
न मल्लीवल्लीनामपि मधुनि वाञ्छा मधुलिहः
समाघ्राय त्यक्तो यदवधि लवङ्गीपरिमे(म)लः ॥
कचित्कचिदयं यातु रन्तुं प्रेमवशंवदः ।
न विस्मरति राजीवमाजीवमलिनं हृदि ॥

End :

विधिरेव विशेषगर्हणीयः करट त्वं रट कस्तवापराधः ।
सहकारतरौ चकार यस्ते सहवासं सरलेन कोकिलेन ॥
आबद्धकृत्रिमसटाजटिलांसभित्तिरारोपितो मृगपतेः पदवीं यदि श्वा ।
मत्तेभकुम्भतटपाटनलम्पटस्य नादं करिष्यति कथं हरिणाधिपस्य ॥

No. 12034. चाटुश्लोकाः.
CĀṬUŚLŌKĀḤ.

Substance, palm-leaf. Size, 17⅝ × 1½ inches. Pages, 10. Lines, 7 on page. Character, Telugu. Condition, good; but the ends of leaves ai broken. Appearance, old.

Same work as the above.

No. 12035. चाटुश्लोकाः.
CĀṬUŚLŌKĀḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 9*a* of the MS. described under No. 768 of the Tamil D.C., Vol. II.

Similar to the above.

Beginning :

वाच्माधुर्यात्सर्वकार्येषु सिद्धिः वाक्पारुष्यात्सर्वकार्येषु नष्टः(ष्ट्) ।
किं तेन(स्यात्)कोकिलेनोपकारः किं तेन(नाहो)गर्दभेनापकारः ॥
माताप्येका पिताप्ये[illegible] मम तस्य च पक्षिणः ।
अहं मुनिभिरानीतः[illegible] मा[illegible]ा)नीतो गवाशनैः ॥

End:

वीणाप्येकगुणेन राजरमणीनीरन्ध्रपीनस्तन-
द्वन्द्वे खेलति शुष्कदारुनिचया निस्सारतुम्बीफला ।
चण्डं पार्वणशर्वरीपरिवृढप्रौढप्रभाभासुरं
मुक्ताजालमपीह निर्गुणतया योग्यं न संजायते ॥

No. 12036. चाटुश्लोकाः.

CĀṬUŚLŌKĀḤ.

Substance, palm-leaf. Size, $10\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 71. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on foll. 1*a* and 42*b*. The other works herein are Kṛṣṇamaṅgalāśāsana 37*a*, Mahālakṣmīkavaca 38*a*.

Incomplete.

Similar to the above.

Beginning:

राजास्ते तरुणीविभुः स रमते विष्णोः पदे नेह किं
दातैतन्मम वाञ्छितस्य सततं काञ्चीपतिस्तादृशः ।
काञ्चीदेशपतिस्तु कः स्मरवरः कास्ते गृहे स्वेऽधुना
तादृक् चेन्मम दर्शयास्तु लिकुचद्वन्द्वं करे गृह्यताम् ॥
शान्ते मन्मथसङ्गरे रणजिता संमानमातन्यते
वासोऽदाज्जघनस्य पीनकुचयोर्हारं श्रुतेः कुण्डलम् ।
वक्त्राब्जस्य तु वीटिकां वरतनोः पाण्यो रणत्कङ्कणे
पश्चाल्लम्बिनि केशपाशनिचये बन्धो हि युक्तक्रमः ॥

End:

नानावेदविशालपल्लवयुतं शास्त्रप्रसूनाङ्कितं
विद्वत्कोकिलकूजितं सुललितं सत्तर्कशाखोन्नतम् ।
संवित्कल्पतरुं नमामि सततं वेदान्तचिन्ताफलं
राजन् सत्कविबृन्दकीरनिनदं क्रीडास्पदं श्रीपतेः ॥

No. 12037. चाटुश्लोकाः.

CĀṬUŚLŌKĀḤ.

Substance, palm-leaf. Size, $14\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 9. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 15*b*. The other work herein is Bhāminīvilāsa 1*a*.

Contains 52 stanzas.
Similar to the above.

Beginning:

गर्जन्नम्बु ददाति तच्च कणिकारूपेण यत्र क्वचित्
कालापेक्षतया प्रदानसमये नैल्यं विधत्ते मुखे ।
पश्चात्पाण्डुरतामुपैति लघुतामभ्येति भूयस्तरां
वीरश्रीपृथुरत्नशेखरमणे दाता कियान्वारिदः ॥

End:

अन्तश्छिद्राणि भूयांसि कण्टका बहवो बहिः ।
कथं कमलनालस्य मा भूवन् भङ्गुरा गुणाः ॥

No. 12038. चाटुश्लोकाः.
CĀṬUŚLŌKĀḤ.

Substance, palm-leaf. Size, $12\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 12. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Contains 50 stanzas.
Similar to the above.

Beginning:

किं तृष्णाकारि कीदृग्ग्रथचरणमलं रौति कः काञ्चिकाञ्ची
कोऽपस्मारी भुजङ्गे किमु कलहशमा वाक् च सम्बोधनं किम् ।
का सुन्दर्यामपीन्दुः कथमवनिभृतः का च सम्बुद्धिरग्ने-
र्बीजं किं कावनीजारमणमतिहरा हेमसारङ्गलीला ॥
कः खे चरति का रम्या का दिव्या(जप्या) किं विभूषणम् ।
को वन्द्यः कीदृशी लङ्का वीरमर्कटकम्पिता ॥

End:

शीतेऽतीते वसनमशनं वासरान्ते निशान्ते
क्रीडारम्भं कुवलयदृशां यौवनान्ते विवाहम् ।
सेतोर्बन्धं पयसि चलिते वार्धके तीर्थयात्रां
वित्ते नष्टे वितरणमहो कर्तुमिच्छन्ति मूढाः ॥

No. 12039. चाटुश्लोकाः.
CĀṬUŚLŌKĀḤ.

Substance, palm-leaf. Size, 13 × 1 inches. Pages, 14. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Dharmaśāstra-vacanāni 8*a*, Śivastōtra 13*a*, Rāmāyaṇakathādisāra 16*a*.

Contains 39 stanzas.

Similar to the work described above.

Beginning:

कूपोदकं वटच्छाया गृहान्तं तरुणीस्तनम् ।
शीतकाले भवेदुष्णमुष्णकाले तु शीतलः(म्) ॥
ज्वरदण्डोपवासः स्याद्भार्यादण्डं पृथक्शये ।
आम्नायश्छन्दसां दण्डं शत्रोर्दण्डं सुहृत्तथा ॥

End:

शुनके गर्भसंभूत्वा(त्या)शु(शौ)नकादि(केति)महामुनिः ।
तपसा ब्राह्मणो भूत्वा तस्य जातं न कारयेत् ॥
वल्मीके गर्भसंभूत्वा(त्या)वाल्मीकेन(कीति)महामुनिः ।
तपसा ब्राह्मणो भूत्वा तस्य जातं न कारयेत् ॥

No. 12040. चाटुश्लोकाः.
CĀṬUŚLŌKĀḤ.

Substance, palm-leaf. Size, 16½ × 1¼ inches. Pages, 19. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, new.

Similar to the above.

Beginning:

विधिरेव विशेषगर्हणीयः करट त्वं रट कस्तवापराधः ।
सहकारतरौ चकार यस्ते सहवासं सरलेन कोकिलेन ॥
वृथा वृथा धावसि चातक त्वं नायं घनः किन्तु करी मदान्धः ।
स त्वादृशेभ्यो न ददाति दानं मातङ्गदानं मधुपेभ्य एव ॥

End:

आशा यस्य दलीभवन्ति गगनं यस्य द्विरेफायते
गङ्गेयं मकरन्दभावमयते ताराः परागायिताः ।
यस्यान्तस्स्थितराजहंसमिथुनं पूषा च दोषाकर-
स्तत्त्रैविक्रमपद्मपद्ममनिशं शर्माणि निर्मातु वः ॥

No. 12041. चाटुश्लोकाः.
CĀṬUŚLŌKĀḤ.

Pages, 20. Lines, 6 on a page.

Begins on fol. 5*a* of the MS. described under No. 5048.

Similar to the above.

Beginning :

अर्धं दानववैरिणा गिरिजयाप्यर्धं हरस्याहृतं
देवेत्थं जगतीतले पुरहराभावे समुन्मीलति ।
गङ्गा सागरमम्बरं शशिकला नागाधिपः क्ष्मातलं
सर्वज्ञत्वमधीश्वरत्वमगमत् त्वां मां च भिक्षाटनम् ॥
चैत्रे मासि कठोरसूर्यकिरणैः संतप्तगात्रो भवा-
नस्मिन् कुब्जवटे सुशीतलतटे भोः पान्थ विश्राम्यताम् ।
एकाकी च भवानहं च तरुणी शून्या प्रपा वर्तते
लज्जा मे भणितुं त्वमेव चतुरो जानासि कालोचितम् ॥

End :

विघ्नेशो वः स पायाद्विहृतिषु जलधीन् पुष्कराग्रेण पीत्वा
यस्मिन्नुद्धृत्य हस्तं वमति तदखिलं दृश्यते व्योम्नि देवैः ।
काप्यम्भः कापि विष्णुः कचन कमलभूः काप्यनन्तः क च श्रीः
काप्यौर्वः कापि शैलाः कचन मणिगणाः कापि नक्रादिसत्त्वाः ॥

No. 12042. चाटुश्लोकाः.

CĀṬUŚLŌKĀḤ.

Pages, 14. Lines, 6—8 on a page.

Begins on fol. 21*a* of the MS. described under No. 1525, wherein the list of other works has been omitted to be given. They are Upākarmanirṇaya 28*a*, Smṛtivacanāni 30*a*, Jyautiṣaviṣaya 31*a*, Āśirvāda 34*a*, Aṣṭaślōkī 43*a*.

Similar to the above.

Beginning :

ईशस्य कण्ठलग्नोऽपि वासुकिर्वायुभक्षणम्(:)।
महाराजानमाश्रित्य(श्रितस्यापि)फलं भाग्यानुसारि च ॥
रत्नाकर(:)सु(पि)ता यस्य[।]लक्ष्मीश्चापि सहोदरी ।
शङ्खं रुद(व)ति भिक्षार्थं फलं भाग्यानुसारि च ॥
मा गर्वमुद्वह बिडाल महीपतीना-
मन्तर्गृहं मणिमयं निलयं ममेति ।
पट्टाभिषेकसमये ज[illegible]श्वरा[illegible]णां
बाह्यस्थितस्य कल[illegible] हि मण्ड(न)श्रीः ॥

End :

अर्धं दानववैरिणा गिरिजयाप्यर्धं हरस्याहृतं
देवेत्थं जगतीतले पुरहराभावे समुन्मीलति ।
गङ्गा सागरमम्बरं शशिकला नागाधिपः क्ष्मातलं
सर्वज्ञत्वमधीश्वरत्वमगमत् त्वां मां च भिक्षाटनम् ॥

No. 12043. चाटुश्लोकाः, सव्याख्याः.

CATUŚLŌKĀḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 13¾ × 1⅝ inches. Pages, 5. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 8*a*. The other works herein are Nandīśvarāṣṭaka 1*a*, Viṣṇvaṣṭaka 3*b*, Pañcaratna 5*a*.

Similar to the above.

Beginning :

गोमद्गोभवगोयुगो विनु(न)तगोहस्तादिगोपालको
गोजाराधितपादगोजयुगलो गोराशिजागोप्रियः ।
गोभिर्मर्दितगोपवैरिरमणीगोविभ्रमो गोप्रदः
गोपीगोनिचयैकगोस्तलतनुर्गोपालकः पातु वः ॥

गाः धेनवः पालयतीति गोपालकः एतादृक् गोपालकः श्रीकृष्णदेवः कृष्णश्चासौ देवश्च कृष्णदेवः धनकनकवस्तुवाहनच्छत्रचामरान्दोलिकगजाश्वादिश्रेयांसि ददात्वित्याशीर्वादः ।

End :

अम्बुमदम्बुदालिरेव गलरुक् यस्य सः अम्बुमदम्बुदालिगलरुक् कोऽर्थः नीलकण्ठ इत्यर्थः । एतादृग्विशेषणविशिष्टः स देवः मृडः सदाशिवः वः युष्माकं मुदे सन्तोषाय अरम् अत्यम्(त्यन्तम्) स्यात् भवत्वित्याशीर्वादः ॥

No. 12044. चाटुश्लोकाः, केरलटीकासहिताः.

CATUŚLŌKĀḤ WITH MALAYĀḶAM MEANING.

Substance, palm-leaf. Size, 8⅝ × 1¼ inches. Pages, 7. Lines, 6 on a page. Character, Malayāḷam. Condition, slightly injured. Appearance, new.

Begins on fol. 44*a*. The other works herein are Vyāsaśataka 1*a*, Nītiśāstrasamuccaya with Malayāḷam meaning 27*a*.

Similar to the above.

Beginning:

सन्ना नाविकघोरणी निपतिता मध्येजलं क्षेपणिः
पन्थाः पर्वतदन्तुरो घनपथच्छन्ना हि तारापथाः ।
भो भो मारुत दुस्तरो जलनिधिर्जीर्णाशनो यज्जनः
तत्त्वं मज्जय वा तटं नयतु वा हस्ते तवास्ति द्वयम् ॥

End:

.[सुघोषाः ।
न वीणा सुवीणा नटी च प्रवीणा(सु)ताल(ाः)स्वरावहा(सुरावा)मृदङ्गाः
विना गानकाले पुनः कण्ठशुद्धिं ततः किं ततः किं ततः किं ततः किम् ॥

No. 12045. चित्ररत्नाकरः.
CITRARATNĀKARAḤ.

Substance, palm-leaf. Size, 10¾ × 1¼ inches. Pages, 56. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Contains the first four Paricchēdas complete and the fifth incomplete.

Same work as that described under R. No. 1158 of the Triennial Catalogue, Vol. II, Part I-A. The author's mother is here mentioned by the name of Ramā in the colophon which is extracted below.

Foll. 29 and 30 give stanzas on miscellaneous subjects and do not form part of this work.

End:

नूतनाम्भोधरच्छायो महाभोगविराजितः ।
समन्वितो रक्तरुचा नग एव विराजते ॥ नागश्च ॥

Colophon:

कृतौ चक्रकवेः सूनोः श्रीरमालोकनाथयोः ।
परिच्छेदश्चतुर्थोऽभूच्चित्ररत्नाकरे परे ॥
सर्वेषु सत्स्वपि गुणेष्वपहाय गूढं दोषं गृणात्यसकृदेव जनेषु मूढः ।
सत्स्वेव सुन्दरतरावयवेषु नृणामन्तर्निवेश्य वृषणं ग्रसते पिपीली ॥

* * * *

किमस्ति यमुनानद्य[illegible]किं [illegible] वदति जारिणी ।
आहूयते कथं वि[illegible]का धन्यते सदा (?) ॥

No. 12046. चित्ररत्नाकरः.
CITRARATNĀKARAḤ.

Pages, 27. Lines, 20 on a page.

Begins on fol. 1*a* of the MS. described under No. 11857.

Breaks off in the fifth Paricchēda.

Same work as the above. Restored from the MS. described under the previous number.

No. 12047. चित्ररत्नाकरः.
CITRARATNĀKARAḤ.

Pages, 28. Lines, 6 on a page.

Begins on fol. 5*a* of the MS. described under No. 1799.

Breaks off in the third Paricchēda.

Same work as the above.

No. 12048. चित्ररत्नाकरः.
CITRARATNĀKARAḤ.

Substance, Śrītāla. Size, 11 × 2⅛ inches. Pages, 4. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Pātrakēsarīyastuti 3*a*, Ātmānuśāsana with commentary 12*a*, Samādhiśataka with notes 44*a* Dharmāmṛta 56*a*.

Incomplete.

Similar to the above, but the stanzas relate to Jainism.

Beginning :

वक्षो वक्षोजलक्ष्यं वहति जगति कः को विनीतो निषेवे
को वर्णः कीदृशं स्याद्बलमिह बलिनां भूभुजां शं कुतः स्यात् ।
कस्तूरी स्यात् क जाता कुलममलकुलं यादवानां कुतोऽभूत्
कीदृक्षः स्याद्विधाता प्रथमजिनपतिः कः श्रिये नाभिजातः ॥
वर्णः कः स्यात्सटार्थे क च वसति रमा कीदृशः स्याद्दरिद्रः
कः शब्दः स्याद्विकल्पे वदति रतिपतिः पुंस्त्रियो ये प्रशस्ये ।
कोऽत्रान्तस्थासु मुख्यः क [illegible] वसुखं किं कुशीकृत्य वीतं
तार्क्ष्यः कीदृग् गुहो वादि[illegible]ः को जिनो वैजयेयः ॥

End:

कान्ता केव विराजते गुणवतां गेहे कुलीनानिशं
कीदृक्षो विदधे विधुश्च विधिना श्रीनन्दनः पृच्छति ।
भोग्या भूमिभुजात्र का सुविदितो नारायणः कीदृशः
कीदृग्यो दशमो जिनः प्रदिशताच्छ्रीवत्सलक्ष्मा श्रियम् ॥

No 12049. जगन्मोहनम्.

JAGANMŌHANAM.

Substance, palm-leaf. Size, 13⅝ × 1½ inches. Pages, 20. Lines, 4 on a page. Character, Telugu. Condition, good. Appearance, old.

An anthology containing 66 stanzas and describing the characteristics and attractions of women of different castes and countries as also of women in different attire and activity.

Beginning:

शैवस्त्रीवर्न(र्ण)ना—

वी(वि)भूतिरेखाविलसन्निटाला ताम्बूलरागारुणदन्तचेला ।
विराजते राजपथे सुशीला शातोदरी काचन शैवबाला ॥
आबद्धरुद्राक्षमयोरुहारा किरीटकाञ्चीकटकादिभूषा ।
कराक्षमालाकलनानुमेया पञ्चाक्षरीमन्त्रजपास्ति शैवी ॥

End:

कज्जलधारिणी—

रतौ च दन्तक्षतचिह्निताधरा वधूरियं लोहितलोललोचना ।
आदर्शबिम्बप्रतिबिम्बिताननां दधाति नेत्रे घनसारकज्जलम् ॥
वधूः स्फुरन्नीलशिलाञ्चितोर्मिकां(करेण) नेत्रे विनिवेश्य कज्जलम् ।
अन्ये तदङ्गुष्ठमणिप्रभाञ्चितं न्यस्तं पुरो नेति दधाति शङ्कया ॥

No. 12050. नराभरणम्.

NARĀBHARANAM.

Pages, 54. Lines, 17 on a page.

Begins on fol. 35*a* of the MS described under No. 11995.

A choice collection of ethical, moral and worldly-wise sayings in the form of stanzas. This anthology purports to state what may be considered as ornamental qualities of human beings.

Incomplete.

Beginning:

स्वहस्तेनाचरेद्दानं परहस्तेन मर्दनम् ।
भार्याहस्तेन ताम्बूलं मातृहस्तेन भोजनम् ॥
(नर)स्याभरणं रूपं रूपस्याभरणं गुणः ।
गुणस्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा ॥
न्यायो राजविभूषणं वितरणं पाणिद्वयोर्भू(यीभू)षणं
लज्जा स्त्रीजनभूषणं सरसता सख्युः स(दा)भूषणम् ।
विद्या विप्रविभूषणं हरिकथा श्रोत्रद्वयोर्भू(यीभू)षणं
सत्पुत्रः कुलभूषणं सुकविता वाचः सदा भूषणम् ॥

End:

आशापिशाचिकाविष्टः पुरतो यस्य कस्यचित् ।
वन्दते निन्दति स्तौति रोदिति प्रहसत्यपि ॥
आशातुरगमारुह्य नित्यं धावति याचकः ।
न चार्तिर्न श्रमो ह्यस्य न गतौ नापि मन्दता ॥
प्रातः क्षालितलोचनः करतलोदश्वत्पवित्राङ्कुरः
तत्तत्स्थानकृतत्रि . . . . . . ।

No. 12051. नीतिद्विषष्टिका.

NĪTIDVIṢAṢṬIKĀ.

Pages, 20. Lines, 7 on a page.

Begins on fol. 29*a* of the MS. described under No. 12021.

A work in 62 stanzas on morals written in the Āryā metre by Sundarapāṇḍya.

Complete.

Beginning:

श्रीमान् सुन्दरपाण्ड्यः श्रुतिस्मृतिप्रसृतसत्पदार्थज्ञः ।
कृतवानार्यां सम्यक्श्रोत्राणां(मोद)वृद्धिक(री)म् ॥
शृणुत श्रुतिजलधौतैः कर्णैः सुश्लिष्टसन्धिसम्बन्धान् ।
श्रुत्वावधारयध्वं दोषान् सन्तो नुदन्त्वत्र ॥
सद्भाषितरत्नानां रत्नानामिव सुदेशजातानाम् ।
हृदि निचयः कर्तव्यः सज्ज[illegible]मानकामेन ॥
परपरिवादः परिषदि क[illegible]न पण्डितेन वक्तव्यः ।
सत्यमपि तन्न वाच्यं य[illegible]वहं भवति ॥

भूमिपतावर्थपतौ विद्यावृद्धे तपोऽधिके बहुषु ।
मूर्खेष्वरिषु च गुरुषु च विदुषो नैवोत्तरं वाच्यम् ॥

End:

यः पठति लिखति (सततं) परिपृच्छति पण्डितानुपासयति ।
तस्य दिवाकरकिरणैः नलिनीव विबोध्यते बुद्धिः ॥
इमां काञ्चनपीटस्थां समेत्य कवयो भुवि ।
आर्यां सुन्दरपाण्ड्यस्य स्नापयन्ती वधूमिव ॥

Colophon:

इति श्रीसुन्दरपाण्ड्यकृतौ नीतिद्विषष्टिकाश्लोकाः ॥

* * * *

कीटोऽपि सुमनः सङ्गादारोहति सतां शिरः ।
अश्मापि याति देवत्वं महाद्भिः सुप्रतिष्ठितः ॥

No. 12052. नीतिशतकम्.
NĪTIŚATAKAM.

Pages, 11. Lines, 7 on a page.

Begins on fol. 33*a* of the MS. described under No. 11939.

A centum of stanzas similar in character to the work described above.

Complete.

Beginning:

ब्रह्मायुश्चिरमातनोतु भवतां नारायणो रक्षणं
शत्रून् संहरतां हरश्च विजयं दद्यात्सुराधीश्वरः ।
आरोग्यं कुरुतां सहस्रकिरणो दद्याद्बलं मारुतिः
वक्त्रे नृत्यतु भारती च भवने लक्ष्मीश्चिरं तिष्ठतु ॥
वन्यानीव पयस्तृणानि गवि दुर्वर्णे रसे काञ्चनं
शुक्तौ मौक्तिकमम्बुधौ च पतितं वारीक्षुकाण्डे रसः ।
शङ्खानेकबकाहली नृतरुणी पुत्रार्थसिंहासनं
छत्रान्दोलनचामरं द्विजमुखे दत्तं हविर्दृश्यते ॥

End:

सच्छिद्रनिकटे वासः कर्तव्यो नैव धीमता ।
घटी पिबति पानीयं ता[illegible]तेन झल्लरी ॥
प्राप्य(प्र)माण(जननीं)प[illegible]स्ते तुलेऽवलेपोऽस्ति ।
नयसि गि(ग)रिष्ठमध[illegible]दितरमुच्चैस्तरां कुरुषे ॥

No. 12053. नीतिशतकम्.
NĪTIŚATAKAM.

Pages, 7. Lines, 7 on a page.

Begins on fol. 51*a* of the MS. described under No. 9358, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Similar to the above.

By Śrīnivāsācārya, son of Śrīnivāsa Tātācārya and brother and disciple of Aṇṇayārya. He is the same as the author of Jijñāsādarpaṇa (4883), Virōdhanirōdha (4996), etc.

Beginning :

लक्ष्मीचरणलाक्षैकलक्षणं शुभवीक्षणम् ।
शेषक्षितिधराध्यक्षमम्बुजाक्षमुपास्महे ॥

सदाक्षिण्यदृशा मित्रममित्रं वामया दृशा ।
वशं नयति यः श्रीमान् सत्यं स पुरुषोत्तमः ॥

राज्ञः कलङ्किनः प्रीतिमनवेक्ष्यानिशोज्वलाः ।
प्रभावतः प्रियाः केचित्कवयः सन्ति सर्वतः ॥

भुजङ्गभोगाकृष्टस्य मन्दरागस्य मज्जनम् ।
कथं भूयान्न भोगानां प्रसादायामृतार्थिनाम् ॥

तरङ्गितरसोल्लासैर्मित्रभेदं वितन्वताम् ।
सरसां सम्पदं हर्तुं शुचेरभ्युदयो भवेत् ॥

End :

इत्थं स्फुरदलङ्कारां सदाश्लेषरसोर्जिताम् ।
अङ्गीकरोतु शृङ्गारी कश्चिन्मे कवितां हिताम् ॥

कलुषाशयमप्याशु प्रसन्नं कुरुते यतः ।
सन्तः पश्यन्तु शतकं शान्तया कलया गिरा ॥

वराहवपुषः श्रिया वसुधया लसद्रोचिषो
वृषाचलशिखाजुषः करगतारिभूरित्विषः ।
घनाघनरुचिद्विषः प्रचुरदानवारिश्लिषः
प्रभोः शुभदमीक्षणं प्रियमनुक्षणं प्रापये ॥

Colophon :

इत्यण्णयार्यसहजः कमला[illegible]र्यसूनुरयमग्रजलब्धशास्त्रः ।
आचार्यदीक्षितकटाक्षधनी [illegible]ानि हृद्यवचनान्यचिनोन्मधूनि ॥

No. 12054. नीतिशास्त्रसमुच्चयः, आन्ध्रटीकासहितः.
NĪTIŚĀSTRASAMUCCAYAḤ WITH TELUGU MEANING.

Pages, 37. Lines, 18 on a page.

Begins on fol. 301*b* of the MS. described under No. 11886.

A collection of stanzas on morals with Telugu meaning.

Beginning:

प्रणम्य शिरसा देवं त्रैलोक्याधिपतिप्रभुम् ।
नानाशास्त्रदृढं(स्त्रोद्धृतं)वक्ष्ये नीतिशास्त्रसमुच्चयम् ॥

. . . . ।

अधीत्यैकमिदं शास्त्रं नरज्ञा(:) साधुतत्त्वतः ॥
धर्मोपदेशे विनयं कार्याकार्यशुभाशुभम् ।

End:

राजा राष्ट्रकृतं पापं राजपापं पुरोहितः ।
भर्ता स्त्रीणां कृतं पापं शिष्यपापं गुरोरपि ॥

. . . .

कृषतो नास्ति दुर्भिक्षो जपतो नास्ति पातकः ।
मौनेन कलहं नास्ति नास्ति जाग्रत(गर)तां भयम् ॥

. . . .

विवादशीलां स्वयमर्थचोरिणीं परानुकूलां बहुपाकभक्षिणीम् ।
आक्रोशनीमन्यगृहोपवासिनीं त्यजन्ति भार्यां दशपुत्रमात(रम्) ॥

No. 12055. नीतिशास्त्रसमुच्चयः, केरलव्याख्यासहितः.
NĪTIŚĀSTRASAMUCCAYAḤ WITH MALAYĀḶAM MEANING.

Pages, 34. Lines, 7 on a page.

Begins on fol. 27*a* of the MS. described under No. 12044.

Complete.

Same work as the above, but with different end and colophon. By Cāṇakya. According to the stanza in the end these 70 stanzas are said to have been taught by Cāṇakya to Candragupta.

End:

श्लोकानि मितसप्तत्या[illegible]तिसारसमुच्चयम् ।
चन्द्रगुप्ताय चाण[illegible]णोपदिष्टवान् ॥

Colophon:

इति चाणक्यसप्ततिः समाप्ता ॥

No. 12056. नीतिशास्त्रसमुच्चयः, कर्णाटकटीकासहितः.

NĪTIŚĀSTRASAMUCCAYAḤ WITH KANARESE MEANING.

Substance, palm-leaf. Size, $11\frac{1}{2} \times 1\frac{1}{8}$ inches. Pages, 66. Lines, 4 on a page. Character, Kanarese. Condition, good. Appearance, old.

Contains 90 stanzas.

Same work as the above.

No. 12057. नीतिशास्त्रसमुच्चयः, कर्णाटकटीकासहितः.

NĪTIŚĀSTRASAMUCCAYAḤ WITH KANARESE MEANING.

Substance, palm-leaf. Size, $13\frac{5}{8} \times 1\frac{1}{4}$ inches Pages, 52. Lines, 4 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Complete.

Same work as the above.

No. 12058. नीतिशास्त्रसमुच्चयः, कर्णाटकटीकासहितः.

NĪTIŚĀSTRASAMUCCAYAḤ WITH KANARESE MEANING.

Substance, palm-leaf. Size, $11\frac{3}{4} \times 1\frac{3}{4}$ inches. Pages, 44. Lines, 4 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Incomplete.

Same work as the above.

No. 12059. नीतिशास्त्रसमुच्चयः, आन्ध्रटीकासहितः.

NĪTIŚĀSTRASAMUCCAYAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{5}{8}$ inches. Pages, 27. Lines, 5 on a page.

Begins on fol. 6*b*. The other works herein are Jānakīnāyaka-śatakamu 1*a*, Bhāgavata (Daśamaskandha) 5*a*.

Incomplete.

Same work as the above.

No. 12060. नीतिशास्त्रसमुच्चयः, आन्ध्रटीकासहितः.
NĪTIŚĀSTRASAMUCCAYAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 14⅜ × 1⅜ inches. Pages, 28. Lines, 5–6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Incomplete.

Same work as the above.

No. 12061. नीतिशास्त्रसमुच्चयः, द्राविडटीकासहितः.
NĪTIŚĀSTRASAMUCCAYAḤ WITH TAMIL MEANING.

Substance, palm-leaf. Size, 10⅛ × 1⅛ inches. Pages, 70. Lines, 5 on a page. Character, Kanarese. Condition, much injured. Appearance, old.

Complete.

Same work as the above.

No. 12062. नीतिसारः.
NĪTISĀRAḤ.

Substance, palm-leaf. Size, 15⅜ × 1⅜ inches. Pages, 32. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Yajñōpavītapratiṣṭhāvidhi 17*a* (2 pages).

Contains 179 stanzas.

Similar to the above. A collection of stanzas inculcating good conduct and morals.

Beginning :

प्रणम्य सर्वलोकेशं श्रीवत्साङ्कं चतुर्भुजम् ।
नीतिसारं प्रवक्ष्यामि सर्वशास्त्रसमुत्थितम् ॥
श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥
अपरिक्षं(रीक्ष्य) न कर्तव्यं कर्तव्यं सुपरीक्षितम् ।
पश्चाद्भवतु(ति)सन्तापं ब्राह्मणी नकुली यथा ॥
आयुः कर्म च वित्तं [illegible]द्या निधनमेव च ।
पञ्चैतानि विलिख्यन्[illegible]स्यैव देहिनाम्(नः) ॥

End :

राजद्वयं राज्यनिपातहेतुर्मन्त्रिद्वयं राजनिपातहेतुः ।
भिषग्द्वयं रोगिनिपातहेतुर्भार्याद्वयं भर्तृविनाशहेतुः ॥
परोऽपि हितवान्बन्धुर्बन्धुरप्यहितः परः ।
अहितो देहजो व्याधिर्हितमारण्यमौषधम् ॥
विश्वामित्रा हि पश्वादीन्वारयत्यप्सु कर्दमे ।
अन्धे तमसि वार्धक्ये यष्टिरिष्टेव सुप्रजाः ॥
दरिद्रस्य द्विभार्यत्वं पथि क्षेत्रं द्विधा कृषिः ।
प्रातिभाव्यं च साक्षित्वं पञ्चानर्थान(:)स्वयङ्कृत(ा): ॥

No. 12063. नीतिसारः, द्राविडव्याख्यासहितः.

NĪTISĀRAḤ WITH TAMIL COMMENTARY.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 48. Lines, 6 on a page. Character, Grantha and Tamil. Condition, slightly injured. Appearance, old.

Contains 100 stanzas.

Same work as the above, but with an additional stanza in the beginning and with a Tamil commentary.

Beginning :

(वेदशा)स्त्रमनधीत्य यः पुमान् वक्तुमिच्छति वचः सभान्तरे ।
बद्धुमिच्छति वने मदोत्कटं हस्तिनं कमलनालतन्तुना ॥

No. 12064. नीतिसारः, द्राविडव्याख्यासहितः.

NĪTISĀRAḤ WITH TAMIL COMMENTARY.

Substance, palm-leaf. Size, $13\frac{3}{8} \times 1\frac{1}{8}$ inches. Pages, 184. Lines, 4 on a page. Character, Grantha and Tamil. Condition, injured. Appearance, old.

Wants the beginning.

Similar to the above.

Beginning :

अनित्यानि शरीराणि (विभवो) नैव शाश्वतः ।
नित्यं सन्निहितो मृत्युः क[illegible]र्मसङ्ग्रहः ॥

अन्योन्यं स्त्रीपुरुषयोर्विकारेण विनश्यति ।
तद्दोषपरिहाराथ देवतानां न निर्धरेत् ।
व्याधीनामाकरं तोयं पापानामाकरं स्त्रियः ।
नाशानामाकरं क्रोधः(आशा)परिभवाकरम् ॥

End :

अनलस्य समिद्धतेजसो वनदाहे च सखा समीरणः ।
यदि हन्ति च दीपिका गृहे विपरीता हि (नर)स्य बन्धवः ॥

No. 12065. नीतिसारः.

NĪTIŚĀRAḤ.

Substance, paper. Size, $6\frac{3}{4} \times 8\frac{3}{8}$ inches. Pages, 86. Lines, 19 on a page. Character, Telugu. Condition, fair. Appearance, old.

Begins on fol. 25*a*. The other works herein are Śataślōkī 1*a*, Viṣṇusthalasaṅgraha 68*a*.

Incomplete.

Similar to the above.

Beginning :

यः प्रीणयेत्सुचरितैः पितरं सु(स)पुत्रो यद्भर्तुरेव हितमिच्छति तत्कलत्रम् ।
तन्मित्रमापदि सुखे च समक्रियं यदेतत्रयं जगति पुण्यकृतो लभन्ते ॥
दैवेन प्रभुणा स्वयं जगति यद्यस्य प्रमाणीकृतं
तत्तस्योपनयेन्मनागपि महान्नैवाश्रयः कारणम् ।
सर्वाशापरिपूरके जलधरे वर्षत्यपि प्रत्यहं
सूक्ष्मा एव पतन्ति चातकमुखे द्वित्राः पयोबिन्दवः ॥

End :

धिक् ताम्बूलविहीनमाननबिलं धिक् पुण्ड्रहीनं मुखं
धिग्वेदाक्षरवर्जितां च रसनां धिक् पाणिमस्वर्णदम् ।
धिग् ग्रामं च तरङ्गिणीविरहितं धिक् . . . शून्याम्.

No. 12066. नीतिसारः, आन्ध्रटीकासहितः.

NĪTISĀRAḤ WITH TELUGU MEANING.

Pages, 6. Lines, 24 on a page.

Begins on fol. 27*a* of the [illegible] described under No. 1909.

Incomplete.

Similar to the above.

Beginning:

सभाकल्पतरुं वन्दे वेदशाखोपजीवितम् ।
शास्त्रपुष्पसमायुक्तं विद्वद्भ्रमरशोभितम् ॥

* * * *

प्रणम्य सर्वलोकेशं देवदेवेश्वरं हरिम् ।
नीतिशास्त्रं प्रवक्ष्यामि सर्वशास्त्रार्थसंमतिम् ॥

* * * *

धर्म उवाच—

सत्यं माता पिता ज्ञानं धर्मो भ्राता दया सखा ।
शान्तिः पत्नी क्षमा पुत्रः षडेते मम बान्धवाः ॥

* * * *

भीम उवाच—

प्राणं वापि परित्यज्य मानमेवाभिरक्षतु ।
अनित्यो भवति प्राणो मान आचन्द्रतारकम् ॥

End:

आत्मबुद्धिः सुखं चैव गुरुबुद्धिर्विशेषतः ।
परबुद्धिर्विनाशाय स्त्रीबुद्धिः प्रलयङ्करी ॥

* * * *

No. 12067. नीतिसारः.
NĪTISĀRAḤ.

Pages, 30. Lines, 21 on a page.
Begins on fol. 1*a* of the MS. described under No. 9336.
Incomplete.
Similar to the above.

Beginning:

पञ्च मे पतयः सन्ति षष्ठोऽपि मम रोचते ।
पुरुषाणामभावे तु सर्वा नार्यः पतिव्रताः ॥

* * * *

मार्जारभक्षिते यद्वद्दुःखं स्याद्गृहकुक्कुटे ।
न तथा खलु दुःखं स्यात्कलविङ्के च मूषके ॥
चातकस्त्रिचतुरान् पयःकणान् [illegible] जलधरं पिपासया ।
सोऽपि पूरयति विश्वमम्भसा [illegible] महतामुदारता ॥

End :

आयातमायातमपेक्षणीयं गतं गतं सर्वमुपेक्षणीयम् ।
अलं कृ(वृ)था मोदनखेदनाभ्यां न लङ्घनीया हि गतिर्विधातुः ॥
नाभोक्तुः क्षीयते कर्म कल्पकोटिशतैरपि ।
अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम् ॥
नेता यस्य बृहस्पतिः.

No. 12068. प्रसङ्गरत्नावलिः.

PRASAṄGARATNĀVALIḤ.

Pages, 106. Lines, 22 on a page.

Begins on foll. 194*a* and 232*a* of the MS. described under No. 12033.

This is an anthology compiled from Purāṇas, Śrutis and Kāvyas by Pōtayārya of Vādhūlagōtra, son of Śiṅganārya by his wife Śiṅgāmbā. The author lived in the village of Kākamrāni which is said to have been founded by the king Mukkuṇḍa. It was written in Śaka 1388 (1466 A.D.) in the month of Vaiśākha, on Thursday, the full moon day of the Pārthiva year.

The first copy beginning on fol. 194*a* contains 41 Paddhatis. Another copy of the same work beginning on fol. 232*a* extends over 93 pages. It contains 65 Paddhatis ; but each Paddhati contains fewer stanzas than those contained in the Paddhatis of the preceding copy. In the introduction the headings of 79 Paddhatis are given.

Beg inning:

रविशशिहुतवहनयनं राजितकरयुगळनागकेयूरम् ।
काकावनिरुहनामग्रामाधीशं नमामि विघ्नेशम् ॥
भूभृत्सुतात्मजं श्रेष्ठं भूभृद्यज्ञोपवीतिनम् ।
भूभृन्निभाननं वन्दे भूभृत्पूज्यं विनायकम् ॥
घनसारवर्णगात्रं गौरीकुचगन्धलिप्तकरकमलम् ।
काकम्रानिपुरीशं प्रमथाधीशं नमाम्यगस्त्येशम् ॥
कुम्भोद्भवतपस्सारं कुम्भिनीधरजापतिम् ।
कुम्भोद्भवेश्वरं देवं सततं प्रणमाम्यहम् ॥
उत्पलदलनिभ[कान्ति]देहमुल्लसिताम्भोजभासमानाक्षम् ।
काकमहीरुहनिलयं केशवदेवं भजामि लोकेशम् ॥
श्रीमदयोध्यानगरे [illegible] सौधे सुखासी(स)नो वरदः ।
सीतालक्ष्मणसहितः [illegible] दिशतु वाञ्छितार्थं मे ॥

पाणौ धृतशुभवीणां नीरजचरणां सुनीलसद्वेणीम् ।
एणीनयनसुरमणीं वाणीमनिशं नमामि कल्याणीम् ॥
मुनिं स्निग्धाम्बुदाभासं वेदावासमकल्मषम् ।
वेदव्यासं सरस्वत्या वास व्यासं नमाम्यहम ॥
कालिदासभवभूतिमयूरान् बाणहर्षजयदेवसुबन्धून् ।
चित्तपादकविवर्यसमूहान् नव्यकाव्यरचनाय नमामि ॥
मुक्कण्टिक्षोणिपेन प्रकटितयशसा चारुदत्ता स्फुरन्ती
सम्यग्विद्याधराढ्या कविबुधसुमनोराजगुर्वादियुक्ता ।
प्रख्याता भूवि(मि)लोके प्रणवसुरसरित्सन्निधौ राजमाना
श्रीमत्काकावनीजावनिविबुधपुरी राजते स्वःपुरीव ॥
शिङ्गाम्बागर्भसम्भूतः शिङ्गनार्यतनूभवः ।
उमापतेः सदा दासः (पो)तयार्यो विजृम्भते ॥
शाकाब्दे वसुहस्तिवह्निशशियुक्श्रीपार्थिवे वत्सरे
वैशाखे सितपूर्णिमाख्यसुदिने वारे गुरोः श्रीमतः ।
काकग्रानिपुरीनिवाससुजनो वाधूलवंशोद्भवः
श्रीमान् पोतयनामको व्यरचयत्प्रासङ्गरत्नावलिम् ॥
प्रसङ्गरत्नावलिसंज्ञितं वरं प्रासङ्गिकानां खलु शारदामयम् ।
सारं पुराणस्मृतिकाव्यसर्व[श]ग्रन्थस्थमादाय निगद्यते मया ॥
अनन्तशास्त्राण्यधिकाश्च विद्या अल्पश्च कालो बहवश्च विघ्नाः ।
यत्सारभूतं तदुपासनीयं हंसो यथा क्षीरमिवाम्बुमध्ये ॥

अथैतद्ग्रन्थे नानाग्रन्थसारविशेषवाग्विधिनानावृत्तयुक्तपद्धतीनां नाम विभज्योच्यते—

Contains the following Paddhatis :—

१. सुभाषितप्रशंसापद्धतिः.
२. आशीर्वादपद्धतिः.
३. दशावतारप्रशंसापद्धतिः.
४. ईश्वरस्तुतिपद्धतिः.
५. काशीप्रशंसापद्धतिः.
६. उमामहेश्वरसंवादपद्धतिः.
७ संसारसारपद्धतिः.
८. चतुर्युगप्रभावपद्धतिः.
९. विप्रप्रशंसापद्धतिः.
१०. विद्याप्रशंसापद्धतिः.
११. कविताप्रशंसापद्धतिः
१२. मित्रलक्षणपद्धतिः.

१३. भाग्यपद्धतिः.
१४ सज्जनपद्धतिः.
१५. दुर्जनपद्धतिः.
१६. सज्जनदुर्जनपद्धतिः.
१७. नरपशुपद्धतिः.
१८. अन्यापदेशपद्धतिः.
१९. आशापञ्चकपद्धतिः.
२०. विधिवशपद्धतिः
२१. शापपद्धतिः.
२२. याचकपद्धतिः.
२३. लाघवपद्धतिः.
२४. मदकारणपद्धतिः.
२५ नमस्कारपद्धतिः
२६. लक्ष्मीकरपद्धतिः.
२७. अलक्ष्मीकरपद्धतिः.
२८. सुपुत्रपद्धतिः.
२९. कुपुत्रपद्धतिः.
३०. धनाढ्यपद्धतिः.
३१. दरिद्रपद्धतिः.
३२. दानफलप्रशंसापद्धतिः.
३३. धर्मपद्धतिः.
३४. परोपकारप्रशंसापद्धतिः.
३५. देशकालपात्रप्रशंसानिर्णय-
पद्धतिः.
३६. अतिथिप्रशंसापद्धतिः.
३७. तीर्थपद्धतिः.
३८. स्वर्गनरकपद्धतिः.
३९. लोभपद्धतिः.
४०. अविश्वासपद्धतिः.
४१. नीतिपद्धतिः.
४२. वैराग्यपद्धतिः.
४३. विंशतिगुणपद्धतिः.
४४. शक्तित्रयनामादिपद्धतिः.
४५. अष्टादशस्मृतिपुराणनाम-
पद्धतिः.
४६. अष्टादशपर्वयोगपीठकनाम-
पद्धतिः.
४७. द्वात्रिंशायुधरागनामपद्धतिः.
४८. षट्पञ्चाशद्देशनामपद्धतिः.
४९. द्विसप्ततिनियोगनामपद्धतिः.
५०. चतुष्षष्टिकलानामपद्धतिः.
५१. भृगुपञ्चगुणपद्धतिः
५२. राजमन्त्रसेवादिगुणपद्धतिः.
५३. तेजःपुरुषपद्धतिः.
५४. ताम्बूलिकापद्धतिः.
५५. शाकविडम्बनापद्धतिः.
५६. सत्यवाक्यपद्धतिः.
५७. स्त्रीणां स्वभावपद्धतिः.
५८. पातिव्रत्यपद्धतिः.
५९. सुमनःप्रशंसापद्धतिः.
६०. उदारपद्धतिः.
६१. दम्भपद्धतिः.
६२. सभास्तुतिपद्धतिः.
६३. उद्योगपद्धतिः.
६४. स्त्रीणामङ्गवर्णनापद्धतिः.
६५. रोमावलीवर्णनापद्धतिः.
६६. बाहुमूलनासाभरणवर्णना-
पद्धतिः.

६७. दीपवर्णनापद्धतिः.
६८. विरहोपरिसुरतपद्धतिः.
६९. ऋतुस्नातापद्धतिः.
७० चन्द्रोदयवर्णनापद्धतिः.
७१. चन्द्रकलङ्कवर्णनापद्धतिः.
७२. नानाराजकीर्तिप्रतापवर्णना-
पद्धतिः.
७३. समस्यापद्धतिः.
७४. षड्टतुपद्धतिः.
७५. अन्तर्लापिकपद्धतिः.
७६. बहिर्लापिकपद्धतिः.
७७. षोडशकलापद्धतिः.
७८. पद्मिन्यादिजातिपद्धतिः.
७९. लेखगुणपद्धतिः.

ततो ग्रन्थ उच्यते—

इतिहासपुराणेषु यत्सारं तत्सुभाषितम् ।
सुभाषितसुधाज्ञानमज्ञानकुलनाशनम् ॥
यस्य सम्पुटिका नास्ति पिता नास्ति न पण्डितः ।
सकृदुक्तं न गृह्णाति कुतस्तस्य सुभाषितम् ॥
[1]यन्मुक्तशास्त्रं वदनं ताम्बूलरसवर्जितम् ।
सुभाषितपरित्यक्तं बिलमेव हि केवलम् ॥
उत्कोचं प्रतिदानं च दूतद्रव्यं सुभाषितम् ।
चोरद्रव्यविभागं च सद्यो गृह्णन्ति पण्डित(ा)ः ॥

* * * *

Colophon:

इत्युमामहेश्वरदासपोतभट्टविरचितायां प्रसङ्गरत्नावल्यां सुभाषितप्रशंसापद्धतिः प्रथमा ॥

End:

साधुरेवार्थिभिर्याच्यः क्षीणवित्तोऽपि सर्वदा ।
शुष्कोऽपि हि नदीमार्गः खन्यते सलिलार्थिभिः ॥

Colophon:

इत्युदारपद्धतिः चतुष्षष्टिः ॥

सुपूगं च सुपत्रं च सुधया च समन्वितम् ।
प्रदत्वा द्विजदेवेभ्यः ताम्बूलं चर्वयेत्ततः ॥

* * * *

[1] यन्मुखं शास्त्रविभ्रष्ट... ाठान्तरम्.

चूर्णापर्णं वर्जयित्वा ताम्बूलं कारयेद्विजः ।
धिग्वदनमताम्बूलं धिक्ताम्बूलमसाक्षिकम् ॥

No. 12069. प्रसङ्गरत्नावलिः.

PRASAṄGARATNĀVALIḤ.

Pages, 20. Lines, 18 on a page.

Begins on fol. 27*a* of the MS. described under No. 12025, wherein this work has been mentioned as Prasaṅgaratnākara in the list of other works.

Contains from the 6th stanza to the 159th stanza of the work described under the last number and some additional stanzas.

The colophon is apparently wrong.

Same work as the above.

मुखं च चन्द्रप्रतिमं तिमंतिमं स्तनौ च पीनौ कठिनौ ठिनौठिनौ ।
कटिर्विशाला रभसा भसा भसा अहो विचित्रं तरुणीं रूणीरूणी ॥

Colophon:

(प्रसङ्ग)रत्नावली समाप्ता ॥

No. 12070. प्रसङ्गरत्नावलिः.

PRASAṄGARATNĀVALIḤ.

Substance, paper. Size, $10\frac{7}{8} \times 8\frac{1}{2}$ inches. Pages, 275. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, old.

Breaks off in the Ṣaḍṛtu-paddhati.

Same work as the above.

No. 12071. प्रसङ्गरत्नावलिः.

PRASAṄGARATNĀVALIḤ.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 99. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Breaks off in the Tāmbūla-paddhati.

Same work as the above.

No. 12072. प्रसङ्गरत्नावलिः.

PRASAṄGARATNĀVALIḤ.

Substance, paper. Size, $13\frac{1}{2}$ × [illegible] inches. Pages, 255. Lines, 19 on a page. Character, Telugu. [illegible]dition, good. Appearance, new.

Breaks off with the Ṣaḍṛ[illegible]hati.

Same work as the above.

No. 12073. प्रसङ्गरत्नावलिः.
PRASAṄGARATNĀVALIḤ.

Substance, palm-leaf. Size, $13\frac{5}{8} \times 1\frac{5}{8}$ inches. Pages, 178. Lines, 6 on a page. Character, Telugu. Condition, good Appearance, old.

Breaks off in the Padminyādijāti-paddhati.

Same work as the above.

No. 12074. प्रसङ्गरत्नावलिः.
PRASAṄGARATNĀVALIḤ.

Substance, palm-leaf. Size, $11\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 88. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, new.

Breaks off in the Cāturya-paddhati.

Same work as the above.

No. 12075. प्रसङ्गरत्नावलिः.
PRASAṄGARATNĀVALIḤ.

Pages, 140. Lines, 21 on a page.

Begins on fol. 289*a* of the MS. described under No 12011.

On fol 288*a* a table of contents is given. Contains up to the Parōpakāra-paddhati.

Same work as the above, but without the introductory stanzas and with index.

No. 12076. प्रसङ्गरत्नावलिः.
PRASAṄGARATNĀVALIḤ

Pages, 110. Lines, 6 on a page.

Begins on fol. 9*a* of the MS. described under No. 1500.

Breaks off in the Parōpakāra-paddhati.

Same work as the above.

No. 12077. प्रसङ्गरत्नावलिः.
PRASAṄGARATNĀVALIḤ.

Substance, palm-leaf. Size, $14\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 30. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Breaks off in the Dēśakālapātra[illegible]sa-paddhati.

Same work as the above.

No. 12078. प्रसङ्गरत्नावलिः.

PRASAṄGARATNĀVALIḤ.

Substance, palm-leaf. Size, 17 × 1⅝ inches. Pages, 98. Lines, 5 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Wants nine leaves in the beginning. Contains up to the Dānaphalapraśaṁsā-paddhati.

Same work as the above

No. 12079. प्राणाभरणम्, सव्याख्यानम्.

PRĀṆĀBHARAṆAM WITH COMMENTARY.

Substance, paper. Size, 11½ × 4⅜ inches Pages, 13. Lines, 10 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, new.

Complete.

This is a poem containing wise and witty stanzas by Paṇḍitarāja-Jagannātha, son of Vallabhabrahma Pēramabhaṭṭa of the Trailiṅga family and belonging to the Vēgināṭi class of Brahmans There is a brief commentary on certain select stanzas.

Beginning :

विद्वांसो वसुधातले परवचश्श्ला(घा)सु वाचंयमा

भूपालाः कमलाविलासमदिरोन्मीलन्मदापू(घू)र्णिताः ।

आस्ये धास्यति कस्य लास्यमधुना धन्यस्य कामालस-

स्ववोमाधरमाधुरीमध(र)यन्वाचां विपाको मम ॥

विद्वांस इत्यादि । प्रायदर्शनाभिप्रायमेतत् । तेन सहृदयैर्न मनागपि विमनायितव्यम् । भावध्वनिरयम् । उत्तरार्धप्रतिपाद्यार्थालम्बनाया एतत्पद्यप्रयोगानुभावायाः कविगतचिन्तायाः प्राधान्याभिव्यक्तेः अनुपात्तोभयनिमित्तको व्यतिरेकालङ्कारः । कामालसत्वं वामाविशेषणमधरमाधुरीप्रकर्षकम् ॥

* * * *

पारीन्द्राणां धुरीणैरवनिधरगुहागर्भतः प्रो(त्प)तद्भिः

स्वापभ्रंशापराभ्रमचलितनयनप्रान्तमाकर्ण्यमानः ।

त्वत्प्रस्थानान्तरुद्यत्प्रलयजलधरध्वानधिक्कारधीरः

घृष्टक्षीरोदती(ता)रो जगति विजयते दुन्दुभिद्वन्द्वनादः ॥

अत्र राजालम्बनस्य तादृशनादश्रवणोद्दीपितस्य नयनप्रचलनानुभावितस्य गिरिगुहागर्भोत्पतनाभिव्यक्तेन [illegible] संचारिणा परिपोषितस्य पारीन्द्रगतोत्साहस्य स्थायिनो राजविषयकरतिभा[illegible]द्रसालङ्कारत्वम् ; यदाहुः—

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं(ङ्गं) तु रसादयः ।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः ॥ इति

End:

त्रैलिङ्गान्वयमङ्गलालयमहालक्ष्मीदयालालितः
श्रीमत्पेरमभट्टसूनुरनिशं विद्वल्ललाटन्तपः ।
सन्तुष्टः कमठाधिपस्य कवितामाकर्ण्य तद्वर्णनं
भूयः पण्डितराजपण्डितजगन्नाथो व्यधासीदिदम् ॥

Colophon:

इति श्रीपण्डितराजजगन्नाथविरचितं प्राणाभरणं समाप्तम् ॥

The scribe adds—

विजयनामसंवत्सरे वैशाखपौर्णमास्यामिन्दुवासरे वेङ्कटेश्वरेण लिखितं प्राणाभरणं समाप्तम् ॥

एवमेषु पद्येषु सम्भवन्तोऽप्यन्येऽलङ्काराः स्फुटत्वान्न विवेचिताः । सहृदयानां प्रीत्यै यथावश्यकं किञ्चिद्व्याख्यातम् । अन्यत्तु तैरेवोल्लसनीयमित्यलं पल्लवितेन ॥

(व्या ॥) इति श्रीत्रैलिङ्गिवेगिनाटीयवल्लभवंशोपनामकपेरमभट्टात्मजपण्डितराजजगन्नाथेन निर्मितं प्राणाभरणं समाप्तिमगात् ॥

लिपिकृतमेतद्वेङ्कटेश्वरेण स्वार्थम् ॥

शान्तश्रियः परमभागवताः समन्ताद्वैगुण्यपुञ्जमपि सद्गुणतां नयन्ति ।
दोषावलीमपरितापितया मृदूनि ज्योतींषि विष्णुपदभाञ्जि विभूषयन्ति ॥

The scribe adds—

विजयनामसंवत्सरे वैशाखमासे पौर्णमास्यामिन्दुवासरे भरतपुरे हनुमन्मन्दिरे लिखितं प्राणाभरणं समाप्तम् ॥

No. 12080. भर्तृहरिसुभाषितम्.
BHARTṚHARISUBHĀṢITAM.

Substance, paper. **Size**, 7¾ × 6¼ inches. **Pages**, 74. **Lines**, 15 on a page. **Character**, Telugu. **Condition**, good. **Appearance**, new.

Begins on fol. 1*b*. The other works herein are Bhartṛharisubhāṣitavyākhyā 48*a*, Mukundānandabhāṇa ... Prasannarāghava 200*a*.

Complete.

This is an anthology consisting of three Śatakas, viz., Nīti (morals and good conduct), Śṛṅgāra (erotics) and Vairāgya (renunciation). By Bhartṛhari. This is also called Subhāṣitatriśatī as it contains about 300 stanzas.

Beginning:

विघ्नेशं विघ्नहर्तारं गणराजं नमाम्यहम् ।
शारदां वरदां नौमि जा(ड्या)पनुत्तये तथा ॥
दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ।
स्वानुभूत्येकरूपाय नमः शान्ताय तेजसे ॥
यां चिन्तयामि सततं मयि सा विरक्ता
साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः ।
अस्मत्कृते च परितुष्यति काचिदन्या
धिक् तां च तं च मदनं च इमां च मां च ॥
अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति ॥

End:

महीशय्या शय्या विपुलमुपधानं भुजलता
वितानं चाकाशं व्यजनमनुकूलोऽयमनिलः ।
स्फुरद्दीपश्चन्द्रो विरतिवनितासङ्गमुदितः
सुखं शान्तः शेते मुनिरतनुभूतिर्नृप इव ॥
कौपीनं शतखण्ड(जर्जर)तरं कन्था पुनस्तादृशी
नैश्चिन्त्यं निरपेक्षभैक्षमशनं निद्रा श्मशाने वने ।
स्वातन्त्र्येण निरङ्कुशं विहरणं शान्तं प्रशान्तं सदा
स्थैर्यं योगमहोत्सवेऽपि च यदि त्रैलोक्यराज्येन किम् ॥

Colophon:

इति भर्तृहरिणा कृतं वैराग्यशतकं समाप्तम् ।
भूः पर्यङ्को निजभुजलता कन्दुकं खं वितानं
दीपश्चन्द्रः सुमतिवनितालब्धसङ्गः प्रमोदः ।
दिक्कान्ताभिः पवनचमरैर्वीज्यमानः समन्ता-
द्भिक्षुः शेते नृप इव [illegible] त्यक्तसर्वस्पृहोऽसौ ॥
वैराग्यशतकं समाप्तम् ॥

607-A

No. 12081. भर्तृहरिसुभाषितम्.
BHARTṚHARISUBHĀṢITAM.

Pages, 22. Lines, 19 on a page.

Begins on fol. 1*a* of the MS. described under No. 1493.

Contains the Nīti Śataka from the 14th stanza and the Vairāgya Śataka (incomplete).

Same work as the above.

No. 12082. भर्तृहरिसुभाषितम्.
BHARTṚHARISUBHĀṢITAM.

Pages, 33. Lines, 22 on a page.

Begins on fol. 342*b* of the MS. described under No. 11904.

Contains the Śṛṅgāra and the Nīti Śatakas only.

Same work as the above.

No. 12083. भर्तृहरिसुभाषितम्.
BHARTṚHARISUBHĀṢITAM.

Substance, palm-leaf. Size, $14\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 86. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the Nīti, the Śṛṅgāra and the Vairāgya Śatakas complete.

Same work as the above.

The scribe states that the copying of this MS. was begun on the 20th day of the Āvaṇi month in the Bhava year.

No. 12084. भर्तृहरिसुभाषितम्.
BHARTṚHARISUBHĀṢITAM.

Pages, 81. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 5784.

Complete.

Same work as the above.

Copied by Burugapalli Kāmabhaṭlu.

No. 12085. भर्तृहरिसुभाषितम्.
BHARTṚHARISUBHĀṢITAM.

Substance, paper. Size, $12\frac{5}{8} \times 8\frac{1}{4}$ inches. Pages, 57. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Written on one side of paper.

Contains the Śṛṅgāraśataka [illegible]e Nīti Śataka complete and the Vairāgya Śataka incomplete.

Same work as the above.

No. 12086. भर्तृहरिसुभाषितम्.
BHARTṚHARISUBHĀṢITAM.

Substance, palm-leaf (Śrītāla). Size, 10⅝ × 2¼ inches. Pages, 26. Lines, 13 on a page. Character, Kanarese. Condition, good. Appearance, old.

Begins on fol. 103*a*. The other work herein is Bhartṛharisubhāṣita with Kanarese meaning 1*a*.

Complete.

Same work as the above.

No. 12087. भर्तृहरिसुभाषितम्, आन्ध्रपद्यसहितम्.
BHARTṚHARISUBHĀṢITAM WITH TELUGU PADYA.

Substance, paper. Size, 13 × 9 and 7½ × 4⅝ inches. Pages, 31. Lines, 21–16 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the Nīti Śataka only.

Same work as the above. A Telugu metrical rendering of the stanzas is also given.

No. 12088. भर्तृहरिसुभाषितम्.
BHARTṚHARISUBHĀṢITAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 12010.

Contains the Ṛtuvarṇanaviṁśati in the Śṛṅgāra Śataka.

Same work as the above.

No. 12089. भर्तृहरिसुभाषितम्.
BHARTṚHARISUBHĀṢITAM.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 16. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on foll. 1*a* and 27*a*. The other work herein is Bhartṛharisubhāṣitavyākhyā 7*a*.

Contains the Nīti Śataka and the Vairāgya Śataka complete.

Same work as the above.

No. 12090. भर्तृहरिसुभाषितम्.
BHARTṚHARISUBHĀṢITAM.

Substance, palm-leaf (Śrītāla). Size, 15 × 1⅞ inches. Pages, 34. Lines, 9 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Complete.

Same work as the above.

No. 12091. भर्तृहरिसुभाषितम्.
BHARTṚHARISUBHĀṢITAM.

Substance, palm-leaf. Size, $10\frac{3}{4} \times 1\frac{3}{4}$ inches. Pages, 98. Lines, 6 on a page. Character, Kanaiese. Condition, much ijured. Appearance, old.

Contains the Nīti and the Śṛṅgāra Śatakas and ten stanzas in the Vairāgya Śataka.

Same work as the above.

No. 12092. भर्तृहरिसुभाषितम्.
BHARTṚHARISUBHĀṢITAM.

Substance, palm-leaf. Size, $14\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 42. Lines, 5 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Contains from the beginning, but breaks off in the Vairāgya Śataka.

Same work as the above.

No 12093. भर्तृहरिसुभाषितम्.
BHARTṚHARISUBHĀṢITAM.

Substance, palm-leaf Size, $13\frac{5}{8} \times 1\frac{1}{4}$ inches Pages, 31. Lines, 5 on a page. Character, Kanarese Condition, injured. Appearance, old.

Begins on fol. 38*a*. The other works herein are Subhāṣitaślōka 1*a*, Kavitvādilakṣaṇādi 28*a*.

Contains the Nīti Śataka complete and breaks off in the 14th stanza of the Śṛṅgāra Śataka.

No. 12094. भर्तृहरिसुभाषितम्.
BHARTṚHARISUBHĀṢITAM.

Substance, palm-leaf. Size, $18 \times 1\frac{1}{4}$ inches. Pages, 35. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the Nīti, Śṛṅgāra and Vairāgya Śatakas complete.

The copying of this MS. is said to have been completed by Viōjumūri Subbarāyaḍu on Monday, the 5th day of the bright fortnight of the Āśvayuja month in the year Durmati.

Same work as the above.

Colophon:

इति भर्तृहरिमहायोगीन्द्रकृतौ सुभा[illegible]तिशृङ्गारवैराग्यनिरूपणी सम्पूर्णा ॥

No. 12095. भर्तृहरिसुभाषितम्.

BHARTṚHARISUBHĀṢITAM.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 14. Lines, 5 on a page. Character, Grantha Condition, injured. Appearance, old.

Begins on fol. 35a. The other works herein are Śiśupālavadha-vyākhyā 1a, Subhāṣitāni 10a, Amaruśataka 16a

Contains 70 stanzas in the Nīti Śataka

Same work as the above.

No. 12096. भर्तृहरिसुभाषितम्.

BHARTṚHARISUBHĀṢITAM.

Substance, palm-leaf Size, 14½ × 1⅜ inches. Pages, 24. Lines, 5 on a page. Character, Kanarese and Telugu. Condition, injured. Appearance, old.

Begins on fol 78a. The other work herein is Bhartṛharisubhāṣita with Kanarese meaning 1a.

Contains the Śṛṅgāra Śataka complete.

Same work as the above.

Colophon :

इति भर्तृहरियोगीन्द्रकृतौ शृङ्गारशतके षड्तुवर्णनं नाम पञ्चमी विंशतिः ॥

सुभाषितरत्नावल्यां शृङ्गारशतकं समाप्तम् ॥

No. 12097. भर्तृहरिसुभाषितम्.

BHARTṚHARISUBHĀṢITAM.

Substance, palm-leaf. Size, 13¼ × 1¼ inches. Pages, 52. Lines, 6 on a page. Character, Grantha. Condition, injured Appearance, new.

Complete. Leaves 11 and 26 are lost.

Same work as the above, but with the addition of a stanza of the commentary given in the beginning :

[illegible] परिपन्थ्यपि वाममङ्गं भक्तानुकम्पनतया हिमवद्दुहित्रे ।

योऽदात्तमीशमभिवन्द्य वदामि टीकां(ग्र)न्थस्य भर्तृहरिणी(लहरी)शतकत्रयस्य ॥

No 12098. भर्तृहरिसुभाषितम्.

BHARTṚHARISUBHĀṢITAM.

Substance, palm-leaf. Size, 15¼ × 1¼ inches. Pages, 20. Lines, 6 on a page. [illegible] [illegible] Condition, injured. Appearance, [illegible]

Begins on fol. 67*a*. The other work herein is Bhōjacarita 1*a*.
Contains the Nīti Śataka incomplete.
Same work as the above.

No. **12099.** भर्तृहरिसुभाषितम्, कर्णाटकटीकासहितम्.
BHARTṚHARISUBHĀṢITAM WITH KANARESE MEANING.

Pages, 202. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No 12086.
Complete.
Same work as the above, but with Kanarese meaning.

No. **12100.** भर्तृहरिसुभाषितम्, कर्णाटकटीकासहितम्.
BHARTṚHARISUBHĀṢITAM WITH KANARESE MEANING.

Pages, 154. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 12096.
Contains the Śṛṅgāra and the Nīti Śatakas complete.
Same work as the above.

No. **12101.** भर्तृहरिसुभाषितम्, सहृदयानन्दिनीव्याख्यासहितम्.
BHARTṚHARISUBHĀṢITAM WITH THE COMMENTARY, SAHṚDAYĀNANDINĪ.

Substance, palm-leaf. **Size,** 17¼ × 1⅜ inches. **Pages,** 468. **Lines,** 6 on a page. **Character,** Telugu. **Condition,** good. **Appearance,** old.

Contains the Vairāgya complete, the Nīti (eight Daśakas only) and the Śṛṅgāra Śataka complete.

Same work as the above, along with the commentary thereon by Rāmacandra, son of Gaṅgāmbikā and Koṇḍōpaṇḍita of Śāṇḍilyagōtra and belonging to the Āvañca family in the Telugu country. The author states that he was learned in many Darśanas and Śāstras.

Beginning:

अथ रागस्य तृष्णामूलकत्वात्तद्गर्हणं विना न वैराग्यसिद्धिरित्यभिप्रेत्य तत्सिद्ध्यर्थमादौ तावत्तत्परिपन्थिभूतां तृष्णां दूषयति भ्रान्तमित्यादिनवभिः श्लोकैः। तत्र प्रथमं स्वकर्मकष्टनिवेदनपूर्वकं तृष्णां सम्बोध्य त्रिभिर्दूषयति—

(मू) भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किञ्चित् फलं
त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला ।
भुक्तं मानविवर्जितं परगृहेष्वाशङ्कया काकवत्
तृष्णे जृम्भसि पापकर्मपिशुने नाद्यापि संतुष्यसि ॥

(व्या) ॥ अनेकैः बहुभिः दुर्गैः पार्वतवार्क्षजलदुर्गादिभिः विषमं विकटं दुःसञ्चारमित्यर्थः । देशं भ्रान्तं संचरितम् ।

* * * *

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते लोकैः समलोष्टाश्मकाञ्चनः ॥

इत्यादि ।

Colophon:

इति श्रीपरमयोगीन्द्रबृन्दमानसमिलन्मिलिन्दसन्दोहामन्दानन्दलाभाभिनन्दितरघुनन्दनचरणारविन्दमकरन्दास्वादनकन्दलितसारसारस्वतेन अखण्डतपःप्रचण्डमुनिप्रकाण्डमण्डलेश्वरशाण्डिल्यमहामुनिगोत्रावतंसस्यावश्वान्वयसुधापारावारपारिजातस्य धन्वन्तर्यवतारान्तरस्यायजु(यु)र्वेदप्रमुखनिखिलविद्यानवद्यगद्यपद्यनिर्माणचातुरीधुरीणसकलकविकुलसार्वभौमस्य कोण्डोपण्डितवर्यस्य तनूजेन गङ्गाम्बिकागर्भरत्नाकरसुधाकरेण रामचन्द्रबुधेन्द्रेण विरचितायां सुभाषितत्रिशतीव्याख्यायां सहृदयानन्दिन्याख्यायां नीति(वैराग्य)शतकवर्णनं सम्पूर्णम् ॥

वन्देऽहं रघुनन्दनाङ्घ्रिसरसीजातद्वयीमद्वया-
मन्दान(न्द)मरन्दबिन्दुलहरीसन्दोहनिष्यन्दिनीम् ।
यत्रेन्दिन्दिरजातवन्मुनिमनोबृन्दं कृतस्वाश्रयं
काचि(श्चि)तुन्दिलतामविन्दत परानन्दाव[चो]बो(धो)दयात् ॥
शतमखमुखा लेखाः प्रापुर्दिशन्तमुदारतां
निधिमनवधिं दिव्यं चक्षुर्यथा समवाप्य यत् ।
किमपि सुमहोमोहध्वान्तान्तरीकरणक्षमं
शरणममलं यामि श्रीमत्प्रचण्डपिचण्डिलम् ॥
चतुरा चतुराननाननाभजे(ब्जे) प्रतिभाति(प्रतिभात)राजहंसा ।
कमले कमलेव सर्वदा सा सुखदा सत्सुखदा सरस्वती स्यात् ॥
श्रीमांश्चोलिङ्गदेशे स जयति विबुधश्रेणिकोटीरकोटी-
(कोटी)माणिक्यभूतागणितगुणगणोऽखण्डपाण्डित्यशौण्डः ।

धीरः शाण्डिल्यगोत्रः सकलकविकुलाह्लादिसूक्तिप्रवीणो
वीणोदाहार्यविद्याविवरणनिपुणो रामचन्द्रो बुधेन्द्रः ॥
वेदान्तोदन्तचिन्तामतनुत चतुरेणान्तरेणाकुतर्के
तर्के चातर्कयद्यः फणिपतिवचसा सारमादत्त योगी ।
योगे यः साङ्ख्यसङ्ख्यागमसमयविधावप्यलं तन्त्रविद्या-
विद्यामिन्यन्वधीशः स्फुरति निरुपमावश्ववंशाम्बुराशौ ॥
विप्रेणाभूतपूर्वे फलमधितपसालम्भि सूर्यप्रसादा-
ल्लब्ध्वा तस्मात्स्वयं तत्प्रचुरतरजरापश्वताकुश्वनाढ्यम् ।
हित्वा मोहं स्वकान्तास्वतिविमलधिया तं निषेव्यात्मभव्यो
योगे(गी)न्द्रो भर्तृहर्याह्वय इह कुरुतेऽद्यापि विद्याविलास(सम्) ॥
सोऽहमेतत्प्रणीतायाः सुभाषितकृतेः कृती ।
कुर्वे सहृदयानन्दिन्याख्यां व्याख्यां मुदे सताम् ॥
व्याकुर्वन्ति निबन्धगौरवभयान्नैव स्फुटं युक्तिभि-
र्ये तेऽध्येत्य(तृ)जनप्रतारणपराः का नैपुणी वा ततः ।
वैखर्या वचसां कवीशहृदयं प्रख्यापयन्नन्वय-
द्वारैवाहमिहाखिलं प्रवी(सुनिपु)णो मुक्तिव्रजोज्जृम्भितम् ॥

इह खल्वत्रभवानशेषविशेषसंसारपारदृश्वा विश्वातिशायिगुणगरिमाकरो भर्तृहरिनामा महायोगीश्वरो निजयोगमहिमानुसारेण करतलामलकीकृताखिलविरिञ्चिप्रपञ्चस्तृणकणमिव जगज्जालमवलोकयन् परमकारुणिको लोकव्यवहारपरिज्ञानविभिन्नान्तःकरणः लोकानुजिघृक्षया नीतिशृङ्गारवैराग्यवर्णनप्रख्यं सुभाषितत्रिशत्याख्यं कञ्चित् प्रबन्धं प्रारम्भ(भ)माणस्तत्परिपन्थिनिर्मन्थनद्वारा परिसमाप्तिप्रचयगमनलक्षणफलमाशासानः शिष्टाचारपरिप्राप्तविशिष्टपरं ज्योतीरूपेष्टदेवतानमस्कारं मङ्गलमादौ निबध्नाति—दिगिति ।

दिक्कालाद्यनवच्छिन्न(. . .)शान्ताय तेजसे ॥

दिशः प्राच्यादिदिक्प्रदेशाः । कालाः भूतभविष्यद्वर्तमानरूपाः । आदिशब्दसङ्गृहीतानि वस्तूनि । तथाच दिक्काला आदयो येषां तानि दिक्कालादिनि(दीनी)त्यतद्गुणसंविज्ञानो बहुव्रीहिः । अन्यथा तेषामप्राधान्येन विनाभावे शास्त्रविरोधः स्यात् । तैरनवच्छिन्ना अपरिकृता विभुत्वान्नित्यत्वात् [illegible] देशतः कालतो वस्तुतश्चापरिच्छिन्नरूपे ।

End :

तदुक्तमार्यदण्डिना—

मन्येशङ्केध्रुवंनूनंप्रायइत्येवमादिभिः ।
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः ॥ इति ।

शार्दूलविक्रीडितम् ।

Colophon :

इति शृङ्गारव्याख्ये(ख्या)ने रु(ऋ)तुवर्णनं नाम पञ्च(मी)विंशतिः ॥
इति भर्तृहरियोगीन्द्रकृतौ सुभाषितत्रिशत्यां शृङ्गारशतकं सम्पूर्णम् ॥
इति श्रीमदाववरामचन्द्रबुधेन्द्रेण विरचितायां सुभाषितत्रिशतीव्याख्यायां सहृदयानन्दिन्याख्यायां शृङ्गारशतकं सम्पूर्णम् ॥

शृङ्गारशतकव्याख्या सरसामोदवल्लरी ।
सुमनस्सुरभी रामपादपद्मसमर्पिता ॥

No. **12102.** भर्तृहरिसुभाषितम्, सहृदयानन्दिनीव्याख्यासहितम्.

BHARTṚHARISUBHĀṢITAM WITH THE COMMENTARY, SAHṚDAYĀNANDINĪ.

Pages, 66. Lines, 6 on a page.

Begins on fol. 120*a* of the MS. described under No. 11934

Contains the Nīti Śataka complete.

Same work as the above.

No. **12103.** भर्तृहरिसुभाषितम्, सहृदयानन्दिनीव्याख्यासहितम्.

BHARTṚHARISUBHĀṢITAM WITH THE COMMENTARY, SAHṚDAYĀNANDINĪ.

Substance, paper. Size, 7¾ × 7 inches. Pages, 141. Lines, 17 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the Nīti and the Vairāgya Śatakas only, but wants four stanzas in the beginning.

See under the previous number for the beginning.

End :

मातर्मेदिनि तात मारुत सखे(. . .)लीये परब्रह्मणि ॥

अथ फलसाम्यात्परब्रह्मविलयनलक्षणपरमपुरुषार्थसाधनद्वारा निगमयंस्तत्र पञ्चीकृतमहाभूतसंभवकर्मसंचितशरीरं सुखदुःखानां भोगायतनमुक्त्वा ; इत्य

दिना शरीरं पाञ्चभौतिकमिति यदुक्तं वेदान्तिभिस्तदेतदनुसन्धायाह । मातः जननि हे मेदिनि तात जनक हे मारुत तातस्तु जनकः पितेत्यमरः ॥

*　　*　　*　　*

तत्रायं क्रमः । न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुत इति न्यायात् प्रथमं तावत्कर्माचरणमावश्यकम् । तेभ्यस्तत्त्वज्ञानोत्पत्तिः । तस्मान्मिथ्याज्ञान-ध्वंसः । अनन्तरं च सम्यक् परिशीलितादमुष्मादेव सवासनमिथ्याज्ञानध्वंसस्ततो मोक्षप्राप्तिः ।

अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ।
यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुते तथा ॥
ज्ञानं लब्ध्वा ततः शान्तिमचिरेणाधिगच्छति ।

इत्यादि श्रुतिस्मृतिवशादित्यवगन्तव्यम् ॥

वैराग्यशतकं सम्पूर्णम् ॥

Colophon :

मू. इति श्रीभर्तृहरिमहायोगीन्द्रस्य कृतौ सुभाषितनीतिशृङ्गारवैराग्यत्रिशती सम्पूर्णा ॥

कविरसौ सकला[र्थ]गमतत्त्ववित् कृतिरियं विविधार्थविजृम्भितः ।
विलिखिताः प्रभवन्तु न शंसया इह सहन्तु बुधा मम साहसम् ॥

*　　*　　*　　*

लोकेषु प्रतिभाति मध्यमगजस्तत्र त्रिलिङ्गाह्वयो
देशस्तत्र तथात्रिमौनितनयातीरं वरं तत्र च ।
ग्रामः काजलंतीति तत्र महितः श्रीरामचन्द्रः सुधीः
श्रीमानुद्धृतादमुष्य कविताकन्यां रघूणां पतिः ॥

व्या ॥ इति श्रीमत्परमयोगीन्द्रबृन्दमानसेन्दिन्दिरसन्दोहामन्दानन्दलाभा-भिनन्दितरघुनन्दनचरणारविन्दमकरन्दास्वादकन्दलितसारस्वतेनाखण्डतपःप्रच-ण्डमुनिप्रकाण्डमण्डलेश्वरशाण्डिल्यमहामुनिगोत्रपवित्रवेश्वान्वयसुधापारावारपारि-जातस्य धन्वन्तर्यवतारान्तरस्यायुर्वेदप्रमुखनिखिलविद्यासारसर्वज्ञसार्वभौमस्य को-ण्डोपण्डितवर्यस्य तनूजेन गङ्गाम्बिकागर्भरत्नाकरसुधाकरेण रामचन्द्रबुधेन्द्रेण विरचितायां सुभाषितत्रिशतीव्याख्यायां वैराग्यशतकवर्णनं सम्पूर्णम् ॥

No. 12104. भर्तृहरिसुभाषितम्, सव्याख्यानम्.

BHARTṚHARISUBHĀṢITAM WITH COMMENTARY.

Substance, paper. Size, $11\frac{1}{8} \times 5\frac{1}{8}$ inches. Pages, 191. Lines, 7 on a page. Character, Dēvanāgarī. Condition, slightly injured. Appearance, old.

Contains the first two Śatakas and 85 stanzas in the Vairāgya Śataka.

The commentary herein found is different from the one described under the last number. The commentator's name is not given.

Beginning:

विघ्नेशं विघ्नहर्तारं गणराजं नमाम्यहम् ।
शारदां वरदां नौमि जाड्यापनुत्तये तथा ॥
श्रीगोपालं नमस्कृत्य नत्वा गुरुपरम्परान्(:) ।
भर्तृहरिणा कृतो ग्रन्थस्तद्व्याख्यां करोम्यहम् ॥

मू. दिक्कालाद्यनवच्छिन्न(. . .)शान्ताय तेजसे ॥

दिगिति । दशदिशासु तथा(भूत)भविष्यद्वर्तमानत्रिकालेषु अनवच्छिन्ना अत एव अनन्ता अन्तो नास्ति चिन्मात्रमेव ज्ञानमूर्तिः स्वरूपं यस्य तथा । स्वानुभूतिः स्वस्य अनुभवः । स एव सारांशो यस्य एतादृशं(तस्मै)शान्ताय तेजः ब्रह्मरूपम् । तस्मै नमः । ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते मङ्गलमाचरणीयमिति शिष्टाचारोऽस्ति । अथ ग्रन्थकर्त्रा मङ्गलं नमनात्मकं(कृतम्) । प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तते एवं नीतिर्वर्तते । तर्हि केन कारणेन ग्रन्थः कृतस्तत्कारणं येन वैराग्येणोत्पत्तिस्तल्लिखति ॥

See under the next number but one for the end.

No. 12105. भर्तृहरिसुभाषितव्याख्या.

BHARTṚHARISUBHĀṢITAVYĀKHYĀ.

Pages, 102. Lines, 15 on a page.

Begins on fol. 48*a* of the MS. described under No. 12080.

Contains the first two Śatakas and 85 stanzas in the Vairāgya Śataka.

Same commentary as the above.

Colophon:

इति भर्तृहरिणा कृतं वैराग्यशतकव्याख्यानं समाप्तम् ॥

No. **12106**. भर्तृहरिसुभाषितम्, सव्याख्यानम्.

BHARTṚHARISUBHĀṢITAM WITH COMMENTARY.

Substance, paper. Size, 7½ × 9⅜ inches. Pages, 192. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 89*a*. The other work herein is Bhōjacarita 1*a*.

Complete.

Same work as the above.

See under No. 12104 for the beginning.

End:

जह्नुकन्यायाः गङ्गायाः पयसा जलेन पूताः पवित्रा ग्रावाणः पाषाणा यत्र तादृशे गिरीन्द्रस्य पर्वतश्रेष्ठस्य कन्दरे गुहायां या दरी अभ्यन्तरे गुहा, तत्र यत् कुञ्जं तस्मिन् यन्निवासः क्रियते केवलमेतदेव सुधियां शोभनबुद्धियुक्तानां पुरुषाणां युक्तमुचितम् ॥

Colophon:

वैराग्यशतकं समाप्तम् ॥

No. **12107**. भर्तृहरिसुभाषितम्, सव्याख्यानम्.

BHARTṚHARISUBHĀṢITAM WITH COMMENTARY.

Pages, 40. Lines, 22 on a page.

Begins on fol. 359*a* of the MS. described under No. 11904, wherein this work has been omitted to be mentioned in the list of other works given therein.

Contains 101 stanzas in the Vairāgya Śataka.

Same work as the above.

No. **12108**. भर्तृहरिसुभाषितव्याख्या.

BHARTṚHARISUBHĀṢITAVYĀKHYĀ

Pages, 40. Lines, 7 on a page

Begins on fol. 7*a* of the MS. described under No. 12089.

Contains the Nīti Śataka only.

This commentary is different from the above, and the commentator's name is not given.

Beginning:

पश्चायुषस्य परिपन्थ्यपि देहमर्धं भक्तानुकम्पनतया हिमवद्दुहित्रे ।
योऽदात्तमीशमभिवन्द्य वदामि टीकां ग्रन्थस्य भर्तृलहरीशतकत्रयस्य ॥

दिगिति । तत्र भगवान् भर्तृलहरिः प्रारिप्सितस्य ग्रन्थस्य निष्प्रत्यूहपरि-समाप्तये शिष्यप्रशिष्यद्वारा लोके प्रचयगमनाय च शिष्टाचारपरिप्राप्तविशिष्टाभिष्ट-

देवतां ब्रह्मरूपां ग्रन्थादौ नमस्करोति---दिगित्यादिना । दिक् पूर्वादिः । कालः काष्ठादिः । दिशा वा कालेन वा आदिशब्दात् वितस्तिहस्तक्रोशगव्यूत्यादिना वा ।

End:

उक्तं च—

पृथिव्यामन्नपूर्णायां वयमन्नस्य काङ्क्षिणः ।
सौमित्रे नूनमस्माभिर्न ब्राह्मणमुखे हुतम् ॥

Colophon:

इति भर्तृ[ल]हरिनीनिशतकव्याख्यानं संपूर्णम् ॥

No. **12109.** भल्लटशतकम्.

BHALLAṬAŚATAKAM.

Substance, paper. Size, 8 × 6⅝ inches. Pages, 52. Lines, 12 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

See pages 7 and 91 of M Seshagiri Sastri's Report No. 1 for description and extract.

No **12110** भल्लटशतकम्.

BHALLAṬAŚATAKAM.

Substance, palm-leaf. Size, 18¼ × 1¼ inches. Pages, 26. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 39*a* The other works herein are Sūktimuktāvali 1*a*, Sarasasaṁvāda 52*a*.

Complete.

Same work as the above.

No. **12111.** भामिनीविलासः, सव्याख्यः.

BHĀMINĪVILĀSAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 12⅞ × 6⅝ inches. Pages, 86. Lines, 14 on a page. Character, Dēvanāgarī. Condition, much injured. Appearance, new.

Complete in four Vilāsas

This is a short poem by Paṇḍitarāja-Jagannātha. It consists of four chapters, containing unconnected stanzas grouped under the following four heads :—(1) Prāstāvika, (2) Śṛṅgāra, (3) Karuṇā, (4) Śānta. The author is said to have lived for some time in the Court of Delhi.

Beginning:

दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः
करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः ।
इदानीं लोकेऽस्मिन्ननुपमशिखानां पुनरयं
नखानां पाण्डित्यं प्रकटयतु कस्मिन् मृगपतिः ॥ १ ॥

(व्याख्या) दिगन्तेत्यादि । मदमलिनगण्डाः करटिनः दिगन्ते श्रूयन्ते । मदेन मलिनाः मदमलिनाः गण्डाः (येषां ते) करटिनः दिगन्ते श्रूयन्ते । दिशाम् अन्तः दिगन्तः ; तस्मिन् दिगन्ते ; श्रूयन्ते न तु दृश्यन्ते । तथा । करिण्यः कारुण्यास्पदम् । करिण्यो नाम हस्तिन्यः । कारुण्यास्पदं कृपापात्रम् ; भवन्तीति शेषः । तथा मृगाः असमशीलाः । मृगाः हरिणाः । न समम् असमम् असमं शीलं येषां ते असमशीलाः ; विषमस्वभावा इत्यर्थः । खल्विति हेत्वर्थे । इदानीं नाम अस्मिन् काले अस्मिन् लोके । मृगपतिः सिंहः । अनुपमशिखानां न विद्यते उपमा यासां ता अनुपमाः शिखा येषां ते अनुपमशिखाः तेषामनुपमशिखानाम्; अतुलिताग्राणामित्यर्थः । नखानां पाण्डित्यं महिमानम् ; विलक्षणकौशिल्य(शल)मिति यावत् । कस्मिन् प्रकटयतु प्रकटीकरोतु ; अपि तु प्रतियोग्यभावान्न कस्मिन्नपीत्यर्थः ।

End:

मद्वाणि मा कुरु विषादमनादरेण मात्सर्यमग्नमनसां सहसा खलानाम् ।
काव्यारविन्दमकरन्दमधुव्रतानामास्येषु धास्यसितमां कियतो विलासान् ॥

* * * *

खेदे जीवन्तोऽपि मृतकाः मृतका एव येषां जगन्नाथफणितिः काव्यरूपजगन्नाथोक्तिः आनन्दं प्रमोदं न जनयति नोत्पादयतीत्यर्थः ॥

* * * *

स्पष्टोऽर्थः ॥

Colophon:

इति श्रीमत्पण्डितराजजगन्नाथविरचिते भामिनीविलासे शान्तश्चतुर्थो विलासः सम्पूर्णः ॥

No. 12112. भामिनीविलासः.

BHĀMINĪVILĀSAḤ.

Pages, 28. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 12087.

Contains the first Ullāsa complete and 61 stanzas in the second Ullāsa.

Same work as the above.

No. 12113. भामिनीविलासः.
BHĀMINĪVILĀSAḤ.

Pages, 8. Lines, 8 on a page.

Begins on fol. 14*a* of the MS. described under No. 12018.

Contains the first Ullāsa complete.

Same work as the above.

No. 12114. भामिनीविलासः.
BHĀMINĪVILĀSAḤ.

Substance, palm-leaf. Size, 14¼ × 1⅜ inches. Pages, 17. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the first Ullāsa complete.

Same work as the above.

No. 12115. वर्णनासारसङ्ग्रहः.
VARṆANĀSĀRASAṄGRAHAḤ.

Substance, palm-leaf. Size, 18¼ × 2 inches. Pages, 200. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

A collection of stanzas relating to various subjects (a list of which is given below) and grouped under them.

By Nīlakaṇṭhadīkṣita, who is said to have been given the title of Prabandhasāgara by Rāmavarman, a king of the Vañci country (Travancore).

Contains the following Śatakas :—

१. चन्द्रशतकम्.
२. कीर्तिशतकम्.
३. प्रतापशतकम्.
   (*a*) प्रतापवर्णनम्.
   (*b*) खड्गवर्णनम्.
४. राजवर्णनशतकम्.
५. अन्यापदेशशतकम्.
६. कवीश्वरवर्णनशतकम्.
७. राजनिन्दाकविनिन्दाशतकम्.
८. (*a*) अयोध्यापुरवर्णनम्.
   (*b*) दशरथवर्णनम्.
   (*c*) विश्वामित्रवर्णनम्.
   (*d*) रामवर्णनम्.
   (*e*) रावणवर्णनम्.

९. (a) परशुरामवर्णनम्.
(b) रामवर्णनम्.
(c) बाणवर्णनम्.
(d) कृष्णवर्णनम्.
(e) रङ्गस्वामिवर्णनम्.
(f) कृष्णवर्णनम्.
(g) त्रिविक्रमवर्णनम्.
(h) वराहवर्णनम्.
(i) वामनवर्णनम्.
(j) रामकृष्णवर्णनम्.

१०. (a) त्रिपुरविजयवर्णनम्.
(b) शिववर्णनम्.
(c) काशीवर्णनम्.
(d) गङ्गावर्णनम्.
(e) कालहस्तिवर्णनम्.
(f) हालास्यवर्णनम्.
(g) गङ्गावर्णनम्.

११. (a) उदयवर्णनम्.
(b) अस्तमयवर्णनम्.
(c) अन्धकारवर्णनम्.
(d) तारकवर्णनम्.
(e) चन्द्रिकावर्णनम्.
(f) चन्द्रवर्णनम्.

१२. (a) वसन्तवर्णनम्.
(b) विरहवर्णनम्.
(c) आरामवर्णनम्.
(d) मन्दानिलवर्णनम्.
(e) ग्रीष्मवर्णनम्.
(f) मध्याह्नवर्णनम्.

१३. (a) वर्षाकालवर्णनम्.
(b) शरत्कालवर्णनम्.
(c) हेमन्तवर्णनम्.
(d) हिमवर्णनम्.
(e) पर्वतसामान्यवर्णनम्.

१४. (a) स्त्रीवर्णनम्.
(b) प्रौढावर्णनम्.
(c) पुंभाववर्णनम्.
(d) स्त्रीवर्णनम्.

१५. (a) यौवनप्रादुर्भाववर्णनम्.
(b) स्तनवर्णनम्.
(c) रोमराजिवर्णनम्.
(d) गर्भवर्णनम्.
(e) पुत्रजननवर्णनम्.
(f) यौवनवर्णनम्.
(g) पट्टाभिषेकवर्णनम्.

१६. (a) पुरक्षोभवर्णनम्.
(b) पुरवर्णनम्.
(c) समुद्रवर्णनम्.
(d) सेनावर्णनम्.
(e) युद्धवर्णनम्.
(f) कलिवर्णनम्.
(g) महाराष्ट्रदेशवर्णनम्.
(h) पाण्ड्यदेशवर्णनम्.
(i) ताम्रपर्णीवर्णनम्.
(j) चोलवर्णनम्.
(k) कावेरीवर्णनम्.

१७. (a) अश्वमेधवर्णनम्.
(b) मीनाक्षीजननवर्णनम्.

(c) मीनाक्षीदिग्विजयवर्णनम्.
(d) कल्याणवर्णनम्.
१८. (a) सेतुवर्णनम्.
(b) रामेश्वरलिङ्गवर्णनम्.
(c) विश्वेश्वरवर्णनम्.
(d) अन्नपूर्णावर्णनम्.

Beginning :

वन्देऽगजास्याम्बुजभानुमन्तं वक्रेण हस्तीनतिरोहितो यः ।
पारम्परी यस्य पयोधयत्सु शार्ङ्गीयते दानजलेषु भार्ङ्गी ॥
नीलश्रीघटितेऽम्बरे निजरदव्याजाद्दहन् लेखिनी-
मादौ यः प्रणवं मृगाङ्कमिषतो मध्येनभोलाञ्छनम् ।
आलिख्योडुततिच्छलेन विलिखत्युच्चावचांस्त्वद्गुणान्
श्रीमन् सत्प्रभुसार्वभौम स गणाधीशोऽवतु त्वां सदा ॥

* * * *

श्रीमन् राममहीमहेन्द्र तुलयन् धाता त्वदीयं यशः
कैलासेन विलोक्य तत्र लघुतां किं प्राप्तवान् पूर्तये ।
उक्षाणं तदुपर्युमासहचरं तन्मूर्ध्नि गङ्गाजलं
तस्याग्रे फणिपुङ्गवं तदुपरि स्फारं सुधादीधितिम् ॥
एकैकामेव कीर्तिं घटयति गगने षोडशानां नृपाणां
साम्याद्यत्ते यशोभिस्तुहिनकरकलाच्छद्मना पद्मसूतौ ।
तारामार्गे तुलायां तदनु कलयता तेन तन्न्यूनभावं
क्षिप्तः श्रीरामभूपः स्फुरति तदुदरे लोहटङ्कः कलङ्कः ॥

End :

स्तन्यास्वादकृते निरुध्य पुरतः संतन्वते प्रार्थनां
सेनान्ये नरपूर्वकायमसकृत्स्थित्वा दिशन्तीं स्तनौ ।
अस्तस्वेदपयःकणां प्रणयिनो हस्तेन वक्त्रादुमा
अष्टाङ्गार्पणमर्थिनां विदधती मेधां ममालम्भ्यते ॥

Colophon :

इति श्रीमद्वञ्चिमहीमहेन्द्रश्रीरामवर्ममहाराजदत्तप्रबन्धसागराभिधानेन श्री-
श्रीकण्ठदीक्षितेन विलिखिते वर्णनासारसङ्ग्रहे सेतुरामेश्वरकाशीविश्वेश्वरान्नपूर्णा-
वर्णनप्रकरणम् ॥

No. 12116. विदग्धमुखमण्डनम्.
VIDAGDHAMUKHAMAṆḌANAM.

Pages, 34. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 12051.

Complete.

A poem in four Paricchēdas containing witty and cleverly composed stanzas on various unconnected subjects. By Dharmadāsa.

Beginning :

एषोऽञ्जलिः सममसज्जनसज्जनौ द्वौ वन्दे नितान्तकुटिलप्रगुणस्वभावौ ।
एकं भिया निरभिसंहितवैरिभावं प्रीत्या परं परमनिर्वृतिपात्रभूतम् ॥
किं मेऽथवा हतखलप्रणतावपि स्यात् स स्वीकरोतु सुजनः खलु मां गुणज्ञः ।
चन्द्रेण चारुचरितेन विकासितं यत् संकोचितं भवति किं कुमुदं तमोभिः ॥
सिद्धौषधानि गुरुमोहमहागदानां पुण्यात्मनां परमकर्णरसायनानि ।
प्रक्षालनैकसलिलानि मनोमलानां शौद्धोदनेः प्रवचनानि चिरं जयन्ति ॥
जयन्ति सन्तः सुकृतैकभाजनं परार्थसम्पादनसद्व्रतास्थिताः ।
करस्थनीरोपमविश्वदर्शिनो जयन्ति वैदग्ध्यभुवः कवेर्गिरः ॥

आक्रान्तेव महोपलेन मुनिना शप्तेव दुर्वाससा
सातत्यं बत मुद्रितेव जतुना नीतेव मूर्च्छां विषैः ।
बद्धेवातनुरज्जुभिः परगुणं वक्तुं न शक्ता सती
जिह्वा लोहशलाकया खलु(ल)मुखे स्यूतेव संलक्ष्यते ॥

* * * *

प्रीत्यै सतां तदनुभावकृतः प्रसादः सन्त्यक्तगूढरचनं प्रतिभानुरूपम् ।
क्षिप्रावबोधकरणक्षममीप्सितार्थं चक्रे विदग्धमुखमण्डनमप्र(प)श्रम् ॥
यद्यस्ति सभामध्ये वक्तुं स्थातुं सदा मनः सुधियः ।
ताम्बूलमिव गृहीत्वा विदग्धमुखमण्डनं विशत ॥
प्राहुर्व्यस्तं समस्तं च द्विर्व्यस्तं द्विस्समस्तकम् ।
तथा व्यस्तं(स्त)समस्तं च द्विर्व्यस्तकसमस्तकम् ॥
सद्विस्समस्तकं व्यस्तमेकालापं प्रभिन्नकम् ।
भेदभेदकमोजस्वि सालङ्कारं सकौतुकम् ॥

Colophon :

इति धर्मदासस्य कृतौ विदग्धमुखमण्डने प्रथमः परिच्छेदः ॥

End :

पूर्णचन्द्रमुखी रम्या कामिनी निर्मलाम्बरा ।
तनोति कस्य न स्वान्तमेकान्तमदनातुरम् ॥

इति च्युतदत्ताक्षरजातिः ॥

Colophon :

इति धर्मदासस्य कृतौ विदग्धमुखमण्डने चतुर्थः परिच्छेदः ॥

* * * *

अनेकसुषिरं वाद्यं कान्तं स्त्रीमुखपङ्कजम् ।
विद्धि तत् त्र्यक्षरं राजन् चक्षुश्श्रोत्रसुखावहम् ॥ वल्मीकम् ।
गरुडः पृच्छति नागरिकां नागरवनिता तु तं गरुडम् ।
कति शम्भोर्नयनानि सूकरवदनानि कीदृङ्कि(दृंशि) ॥ नागरिपोत्रीणि ।
बाणश्च पञ्चबाणश्च द्वाविमौ हृदयंगमौ ।
याभ्यां कादम्बरीहर्षचरितार्थः कृतो जनः ॥

Colophon :

विदग्धमुखमण्डनं संपूर्णम् ॥

No. 12117. विदग्धमुखमण्डनदीपिका.
VIDAGDHAMUKHAMAṆḌANADĪPIKĀ.

Pages, 21. Lines, 7 on a page.

Begins on fol. 18*a* of the MS. described under No. 12021.

Breaks off in the fourth Paricchēda.

A commentary on the work described above.

Beginning :

सिद्धौषधानीति । शौद्धोदनेः बौद्धस्य । सातत्यं सततम् । पृष्टमित्यादि । यत् पृष्टं यदुत्तरवाक्यं केवलेनैव पदविभागेन प्रोच्यते यदुत्तरवाक्यं केवलेन पदेन प्रश्नविभागेम परिहा(रो)भवति यत्तत् व्यस्तं स्यात् । समुदायेन प्रश्नसमुंदायेन परिहारो भवेत् तत्समस्तं स्यात् । प्रलम्बासुरविद्विषः बलदेवस्य । सुः पूजायाम् ना नरः । सीरं हलम् । राः स्वर्णम् । मा श्रीः ॥

End :

विसमरणं विषमयुद्धं विषसञ्जातमरणम् । इति शुद्धभागधीयम् । आण आणित्यतिशुद्धलौकिकजातिः ॥

Colophon :

इति विदग्धमुखमण्डनदीपिकायां तृतीयः परिच्छेदः ॥

शक्ती [आरा] स्त्री रिमध्यनाम्नी मध्यरीत्यक्षरयुक्ता

* * * *

प्रसत्त्यै प्रसादाय । उत्क्रमार्गस्थ! आयादेशः । सम्प्रदानगुप्तम् ॥ अत्यन्तमलिनः । शिलीमुखानां साम्यात् अलिनोऽपि बिभेति । सरसीतः । पञ्चम्यास्तसिल् । कं जलम् । दर्पकारणम् । ए विष्णौ । कान्तारोपितप्रीतिः.

No. 12118. शार्ङ्गधरपद्धतिः.

ŚĀRṄGADHARAPADDHATIḤ.

Substance, palm-leaf. Size, 18½ × 1½ inches. Pages, 144. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains 1 to 75 Paricchēdas complete.

An anthology compiled by Śārṅgadhara, son of Dāmōdara.

This work has been printed in the Bombay Sanskrit series. A list of the subjects dealt with is given in the printed edition as well as in the Anukramaṇikā portion of this MS.

The author gives his genealogy thus :

Hammīra Bhūpati
[of Śākambharī country]
|
Rāghava
|
Gōpāla — Dāmōdara — Dēvadāsa
|
Śārṅgadhara — Lakṣmīdhara — Kṛṣṇa

Beginning:

यस्मिन्बुद्बुदसङ्कुरा यि(इ)व बहुब्रह्माण्डभाण्डाः कचि-
द्भान्ति कापि च शीकरा यि(इ)व विरिञ्च्याद्याः स्फुरन्ति भ्रमा[मा]त् ।
चिद्रूपा लहरीव विश्वजननी शक्तिः कचिद्द्योतते
स्वानन्दामृतनिर्भरं शिवमहापाथोनिधिं तं नुमः ॥
पुरा शाकम्भरीदेशे श्रीमान् हम्मीरभूपतिः ।
बाहुबाणालयो जातः ख्यातः शौर्यादिवार्जुनः ॥
तस्याभवत् सभ्यजनेषु मुख्यः परोपकारव्यसनैकमुख्यः ।
पुरन्दरस्येव गुरुर्गरीयान् द्विजाग्रणी रा(घ)वदेवनाम(ा) ॥

गोपालदामोदरदेवदाससंज्ञा बभूवुस्तनयास्तदीयाः ।
नेत्रावतारा इव चन्द्रमौलेरपाकृतध्वान्तगुणास्त्रयोऽपि ॥
तेषां मध्ये यस्तु दामोदरोऽभूदुत्पाद्य त्रीनात्मजान् वीतरागः ।
भागीरथ्यां शुद्धदेहं विधाय ज्ञानात्मत्वे देवनिष्ठां जगाम ॥
ज्येष्ठः शार्ङ्गधरस्तेषां लघुर्लक्ष्मीधरस्ततः ।
कृष्णानुजस्ततस्तेऽपि त्रयस्त्रेताग्निसन्निभाः ॥
जयति शार्ङ्गधरस्त्रिपुरारिपद्द्वयकुशेशयकोशमधुव्रतः ।
सरससूक्तिसुधौघकलानिधिः कविकरीन्द्रकदम्बमृगाधिपः ॥
यद्यपि गुणौघनिलयः खलशैलध्वंसने जिष्णुः ।
तदपि विमलहृदयान्तरसज्जनलोकस्य दासोऽसौ ॥
ते सज्जनाः सुकविशाखिकबिल्वपुष्पाण्यादाय गुम्भितवतः स्वगुणैर्ममैतत् ।
संधारयन्तु कुसुमोज्ज्वलहारभूतं कण्ठे सुभाषितमपास्तसमस्तदोषम् ॥
न शार्ङ्गधरपद्धतिः खलजनस्य योग्या भवेत्
सुभाषितमहोर्मयः सुकृतलोकपेया यतः ।
सुधामदितिनन्दना दिवि पिबन्ति हृष्टान्तरा-
स्तथैव तमसश्शिरो झटिति खण्डितं श्रूयते ॥
आनन्दाय सतां भूयात्सुभाषितमिदं मम ।
पृथुपद्धतिसम्मिश्रं परिच्छेदैर्मनोरमम् ॥
आद्यैर्मदुदितैः पद्यैः कियद्भिरपरैरपि ।
युता पद्धतिरेषास्तु सज्जनानन्ददायिनी ॥

Colophon:

इति श्रीशार्ङ्गधरेण श्रीदामोदरसूनुना विरचितायां (पद्धत्यां) कविवंशवर्णनं नाम प्रथमः परिच्छेदः ॥

End:

मध्ये भानोस्तु माणिक्यं पूर्वे वज्रं तु भार्गवम् ।
आग्नेय्यां मौक्तिकं त्विन्दोर्याम्ये भूजस्य विद्रुमम् ॥
नैरृत्यां राहुगोमेधं वारुण्यां मन्दनीलकम् ।
वायव्ये केतुवैडूर्यं पुष्यरागमुदग्गुरोः ॥
ज्ञस्यैशान्ये मरकतं स्थापनीयं विचक्षणैः ।
एतल्लक्षणसंयुक्ता मुद्रा दारिद्र्यनाशिनी ॥

माणिक्यं तरणेस्तथैव विमलं मुक्ताफलं शीतगो-
र्माहेयस्य च विद्रुमो मरकतं सौम्यस्य रागोत्तरम् ।
देवेज्यस्य च पुष्यरत्नमुदितं शुक्रस्य वज्रं शने-
र्नीलं निर्मलमन्ययोस्तु गदिते गोमेधवैडूर्यके ॥

एते राजनीतिभ्यो भारताच्च श्लोकाः ॥

Colophon:

इति श्रीशार्ङ्गधरविरचितायां पद्धत्यां राजनीतिपरिच्छेदः ॥

No. 12119. सभारञ्जनम्.

SABHĀRAÑJANAM.

Pages, 6. Lines, 10 on a page.

Begins on fol. 4*a* of the MS. described under No. 11993.

Complete.

Same work as that describad under R. No. 1428(*b*) of the Triennial Catalogue of MSS., Vol. II, Part I-B. By Nīlakaṇṭhayajvan.

No. 12120. सभारञ्जनम्.

SABHĀRAÑJANAM.

Pages, 13. Lines, 5 on a page.

Begins on fol. 26*a* of the MS. described under No. 11939.

Complete.

Same work as the above.

No. 12121. समयोचितश्लोकाः.

SAMAYŌCITAŚLŌKĀḤ.

Substance, palm-leaf. Size, 9½ × 1½ inches. Pages, 50. Lines, 8 on a page. Character, Kanarese. Condition, very much injured. Appearance, very old.

Wants the beginning and the end.

A collection of stanzas containing wise and witty observations. The stanzas are not properly arranged according to the subjects dealt with therein.

Beginning:

रम्भाफलं रचितपुण्यफलं नराणां रम्भा . . . . . . लोके ।
रम्भादिदम्भमपि ते प्रविडम्बयन्ति . . . . . सबनुओमिनं एव सत्यम् ॥

हास्यप्रकरणम्॥

प्रपायां पीयते वारि सत्रागारेषु भुज्यते ।
सुप्यते देवतागारे यभ्यते यत्र लभ्यते ॥
गते तु पत्यौ मदनाग्निदग्धा मुहुर्मुहुर्निश्वसितायताक्षी ।

End:

पक्षौ विक्षिप्य धून्वन् स्फुटिततरतनुप्रान्तविस्तारितात्मा
प्रागेवोड्डीननिद्रः स्फुरदरुणतरोद्भासितालोलचूडः ।
प्रातः प्रोत्थाय नीडस्थिततरलतनुर्घुर्घुरध्वानमुच्चै-
रुद्ग्रीवः पूर्वकायोन्नतिविकटसटः कुक्कुटो रोरवीति ॥

No. 12122. सिन्दूरप्रकरः.

SINDŪRAPRAKARAḤ.

Pages, 38. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 9424.

Complete.

An anthology of 100 stanzas compiled by a Jain named Sōmaprabha, disciple of Vijayasiṁhācārya, a Guru who succeeded in the line of the teachers of religion that followed Ajitadēvācārya. The subjects dealt with herein are given below.

The MS. is dated 1850 A.D.

१. द्वारवृत्तम्.	११. मायाप्रक्रमः.
२. पूजाप्रक्रमः.	१२. लोभप्रक्रमः.
३. गुरुप्रक्रमः.	१३. सौजन्यप्रक्रमः.
४. जिनमतप्रक्रमः.	१४. गुणिसङ्गप्रक्रमः.
५. सङ्घप्रक्रमः.	१५. इन्द्रियदमप्रक्रमः.
६. अहिंसाप्रक्रमः.	१६. लक्ष्मीस्वभावप्रक्रमः.
७. अब्रह्मप्रक्रमः.	१७. दानप्रक्रमः.
८. परिग्रहप्रक्रमः.	१८. तपःप्रक्रमः.
९. क्रोधप्रक्रमः.	१९. भावनाप्रक्रमः.
१०. मानप्रक्रमः.	२०. वैराग्यप्रक्रमः.

Beginning:

सिन्दूरप्रकरस्तपःकरिशिरःक्रोडे कषायाटवी-
दावार्चिर्निचयः प्रबोधदिवसप्रारम्भसूर्योदयः ।

मुक्तिश्रीवदनैककुङ्कुमरसः श्रेयंस्तरोः पल्लवः
प्रा(?)सक्रमयोर्नखद्युतिभरः पार्श्वः प्रभो(भुः) पातु वः ॥
सन्तः सन्तु मम प्रसन्नमनसो वाचां विचारोद्यताः
सूतेऽम्भः कमलानि तत्परिमलं वाता वितन्वन्ति यत् ।
किं वाभ्यर्थनयानया यदि गुणोऽस्त्यासां ततस्ते स्वयं
कर्तारः प्रथनं न चेदथ यशःप्रत्यर्थिना तेन किम् ॥
त्रिवर्गसंसाधनमन्तरेण पशोरिवायुर्विफलं नरस्य ।
तत्रापि धर्मं प्रवरं वदन्ति न तं विना यद्भवतोऽर्थकामौ ॥
यः प्राप्य दुष्प्रापमिदं नरत्वं धर्मं न यत्नेन करोति मूढः ।
क्लेशप्रबन्धेन स लब्धमब्धौ चिन्तामणिं पातयति प्रमादात ।'
स्वर्णस्थाले क्षिपति स रजः पादशौचं विधत्ते
पीयूषेण प्रवरकरिणं वाहयत्येधभारम् ।
चिन्तारत्नं विकिरति कराद्वायसोड्डायनार्थं
यो दुष्प्रापं गमयति मुधा मर्त्यजन्म प्रमत्तः ॥

End:

सोमप्रभाचार्यमभा च यन्न पुंसांत(पुमांस्त)मःपङ्कमपाकरोति ।
तदप्यमुष्मिन्नुपदेशलेशे निशम्यमानेऽनिशमेति नाशम् ॥
अभजदजितदेवाचार्यपट्टोदयाद्रिद्युमणिविजयसिंहाचार्यपादारविन्दे ।
मधुकरसमतां यस्तेन सोमप्रभेण व्यरचि मुनिपराज्ञा सूक्तिमुक्तावलीयम् ॥

Colophon:

इति सिन्दूरप्रकराख्यः सुभाषितकोशः समाप्तः ।

संवत् १९०६ वैशाखमासे कृष्णपक्षे तिथौ ३ चन्द्रवासरे श्रीफलटण-ग्रामे श्रीवृषभनाथचैत्यालये श्रीमूलसङ्घे सरस्वतिगछे बलात्कारगणे श्रीकुन्द-कुन्दाचार्यान्वये भट्टारकश्रीधर्मचन्द्रतत्पट्टे भट्टारकश्रीदेवेन्द्रकीर्तितत्पट्टे प्रिय-शिष्यब्रह्ममहति सागरजी तत् उपदेश्यात् शाहा . . . . . ॥

No. 12123. सुभाषितकौस्तुभः.
SUBHĀṢITAKAUSTUBHAḤ.

Substance, palm-leaf. Size, 16 × 1¼ inches. Pages, 18. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old. Complete.

An anthology in five Paddhatis, the subjects dealt with therein being given below. By Veṅkaṭācārya, son and disciple of Raghunātha of Ātrēyagōtra. He is the same as the author of Viśvaguṇādarśa.

१. अविवेकपद्धतिः.
२. सज्जनपद्धतिः.
३. दुर्जनपद्धतिः.
४. वदान्यपद्धतिः.
५. पिशुनपद्धतिः.

Beginning:

वन्दे वाञ्छितदायि वेङ्कटगिरेर्वेदस्य चोत्तंसकं
पुंसः कंसजितस्तदङ्घ्रिकमलं पूरेण यज्जन्मना ।
शम्भुः शाश्वतशेखरो जलनिधिर्जोग्रङ्ग्रिद्वितीयाश्रमः
सञ्जातः सगरान्वयोऽप्यमृतवान्नाको नदीमातृकः ॥
श्रीवेङ्कटार्यमखिना रघुनाथसूरेः सम्प्राप्तजन्मयुगलेन यथामनीषम् ।
आतन्यते सुमनसामनसूयकानां हर्षाय सम्प्रति सुभाषितकौस्तुभोऽयम् ॥
तत्तादृशपुरुषोत्तमहृदयङ्गममिममभङ्गगुणबद्धम् ।
सुधियः साधु सुभाषितकौस्तुभमनघं परीक्ष्य नन्दन्तु ॥
विदग्धव्याहारैर्न जडमतिरानन्दति मनागनालापज्ञानां न च वचनतः खेदमयते ।
न विन्दत्यानन्दं जरठमहिषश्चन्दनरसैरसौ पङ्कालेपैरपि खलु विषादं न जुषते ॥

* * * *

Colophon:

इत्यात्रेयवेङ्कटाचार्यस्य कृतिषु सुभाषितकौस्तुभे अविवेकपद्धतिराद्या ॥

End:

. . . . तै
राहारैः परिपूरितोदर इभस्तृप्यत्यनाथा स्थितिः ।
अत्यल्पोदर एष पश्य मशको हा हन्त नक्तन्दिवं
. . . . विशन्नष्टासु काष्ठास्वपि ॥

Colophon:

इत्यात्रेयवेङ्कटार्ययज्वनः कृतिषु सुभाषितकौस्तुभः संपूर्णः ॥
. . . . . . नभस्यमासे ग्रन्थं प्रतीतं वरदो लिलेख ।
श्रीशङ्खपुर्यन्वयसिन्धुरत्नश्रीराघवार्यादुदितः प्रमोदात् ॥

No. 12124. सुभाषितकौस्तुभः.

SUBHĀṢITAKAUSTUBHAḤ.

Pages, 20. Lines, 20 on a page.

Begins on fol. 29*a* of the MS. described under R. No. 4470.

Breaks off in the fifth Paddhati.

Same work as the above.

The following stanza is added in the beginning :—

पर्यायवेदचूडार्येश्वकास्तु हृदि मे सदा ।
आत्रेयवेङ्कटाचार्यः कविर्विद्वच्छिखामणिः ॥

No. 12125. सुभाषितनीवी.
SUBHĀṢITANĪVĪ.

Substance, palm-leaf. Size, 8⅝ × 1¼ inches. Pages, 32. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

By Vēdāntadēśika. Same work as that described under R. No. 310 of the Triennial Catalogue, Vol. I, Part I-A. According to the Vaiṣṇavaguruparamparā tradition this work was composed for the king Sarvajña Śiṅgama.

No. 12126. सुभाषितनीवी.
SUBHĀṢITANĪVĪ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 8*a* of the MS. *described* unedr No. 12002.

Contains the Paddhatis one to three complete and two stanzas in the fourth Paddhati.

Same work as the above.

No. 12127. सुभाषितनीवी, सव्याख्या.
SUBHĀṢITANĪVĪ WITH COMMENTARY.

Substance, paper. Size, 11 × 8⅝ inches. Pages, 150. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Same text as the above, along with the commentary of Narasiṁha.

Beginning :

श्रीमान् वेङ्कटनाथार्यः (. . .) सदा हृदि ॥
प्रथमसुजनाय पुंसे (.) सकृदुपकारामकाराभ्याम् ॥
निगममौलिगुरोश्चरणाब्जयोर्विरचितप्रणतिर्नरकेसरी ।
तदुपदिष्टसुभाषितनीविकाविवृतिमातनुते सुधियां मुदे ॥

व्या—शिष्यहितोपदेशरूपां सुभाषितनीवीं चिकीर्षुरादौ भगवन्तं नमस्करोति । प्रथमसुजनाय पुंसे नमः, प्रथमदुर्जनाय मह्यमपि नम इत्यन्वयः ।

कुर्वे इति-शेषः । सौजन्यमानुकूल्यम् । प्रथमत्वं मुख्यत्वम् । प्रथमश्चासौ सुजनश्चेति विग्रहः सर्वोत्तमानुकूलायेत्यर्थः । प्रतियोगिनो विशेष्यानुपादाना-न्निष्प्रतियोगिकमानुकूल्यं प्रतीयते ।

End:

तद्गुणनान्तर्गता प्रियपद्धतिभूषिता पद्यो हृतिः पद्धतिः प्रियस्य पद्धतिः प्रियपद्धतिः नायकसंचारः । तस्य भुवि उषिता प्रियपद्धतिभूषिता नायक-संचारगृहे नियमितस्थितिरित्यर्थः । सैषा स्त्री जयति ॥

कविकथकसिंहकथितं (. . .) सर्वलोकहितम् ॥

Colophon:

परीक्षकमुखपद्धतिद्वौदशी ॥

No. 12128. सुभाषितनीवी, सव्याख्या.
SUBHĀṢITANĪVĪ WITH COMMENTARY.

Substance, palm-leaf. Size, 17 × 1⅛ inches. Pages, 84. Lines, 6 on a page. *Character, Grantha. Condition, good. Appearance, new.*

Breaks off in the seventh Paddhati.

Same commentary as the above.

No. 12129. सुभाषितनीवी, सव्याख्या.
SUBHĀṢITANĪVĪ WITH COMMENTARY.

Pages, 76. Lines, 6 on a page.

Begins on fol. 51*a* of the MS. described under No. 10100.

Commences with the 6th stanza of the 8th Paddhati and breaks off in the 11th stanza of the 9th Paddhati; contains also the 11th Paddhati which begins on fol. 69*a*.

Same work as the above.

No. 12130. सुभाषितश्लोकाः.
SUBHĀṢITAŚLOKĀḤ.

Pages, 54. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 12093, wherein this work has been mentioned as Subhāṣitapadāvalī in the list of other works given therein.

Contains 318 stanzas.

A collection of stanzas containing wise and witty sayings. There is apparently no arrangement of the subjects. Some of the stanzas are taken from other anthologies.

Beginning:

शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।
प्रभुर्धनपरायणः सततदुर्गतिः सज्जनो
नृपाङ्गण(गतः)खलो मनसि सप्त शल्यानि मे ॥
मणिः शाणोल्लीढः समरविजयी हेतिदालितो
मदक्षीणो नागः शरदि सरिदा(श्या)नपुलिना ।
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता
तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नराः ॥

End:

संसारसारः—

कर्पूरो नवमालती मलयजं कस्तूरिका कुङ्कुमं
ताम्बूलं नवयौवनं सुकविता गीतं च शीतोदकम् ।
वीणा सज्जनसङ्गतिः प्रियतमाः शुभ्राम्बरं चन्द्रमाः
संसारोऽयमसार एव हि गुणैश्चित्रैर्व्रजेत्सारताम् ॥
रम्या रामा यदि कुलवधूस्त्यागभोगाय नित्यं
वक्त्रे वाणी सरसमधुरा शङ्करे चित्तवृत्तिः ।
यद्यप्येवं वपुषि दृढता सत्कुले जन्म पुंसां
धिग्धिग् दूरा(द)नशनपदं स्वर्गमेकान्तदुर्गम् ॥

No. 12131. सुभाषितश्लोकाः.
SUBHĀṢITAŚLŌKĀḤ.

Substance, palm-leaf. Size, 16½ × 1¼ inches. Pages, 4. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 41*a*. The other work herein is Vikramōrvaśīya 1*a*.

Contains the stanzas 11 to 52.

From the note in the margin on fol. 1*a*, this collection appears to have been made up of stanzas quoted in a commentary on the Subhāṣitatriśatī probably of Bhartṛhari. But these stanzas are not found in any of the printed commentaries.

Beginning:

श्रीदुर्गोक्तम्—

भगवतोक्तम्—

मात्रास्पर्शाश्च कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥ इति ।

End:

धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभेति भगवद्वचनम् ।
यस्तु पर्यटते देशान् यस्तु सेवेत पण्डितान् ।
तस्य विस्तारिता बुद्धिस्तैलबिन्दुरिवाम्भसि ॥ इति ।

No. 12132. सुभाषितश्लोकाः.
SUBHĀṢITAŚLŌKĀḤ.

Pages, 9. Lines, 8 on a page.

Begins on fol. 54*b* of the MS. described under No. 9358.

Complete.

A poem consisting of stanzas containing wise and ethical maxims : by Śrīnivāsācārya at the instance of Kōsala Vēṅkaṭa Rao.

Beginning:

श्रेयांसि भूयांसि स मे रमेशो देयान्मुदे यो दिविषज्जनानाम् ।
अन्यापदेशादुदधीशकन्याविन्यासदेशं हृदयं व्यतानीत् ॥
जातः पद्मात् पद्मनाभस्य नाभेर्भाषायोषाश्लेषदाता विधाता ।
सत्यासक्तः क्वापि पूजां न लेभे पुण्यः सर्वैः पूज्यते न त्वपुण्यः ॥
देवर्षेर्वरगुणवर्षितं चरित्रं मित्रत्वं सकलजनस्य सौमनस्यात् ।
शत्रूणामपि कृपयोपयासि गेहं दूष्यस्त्वं किल कलहोद्यतो यतोऽसि ॥

End:

चिन्तामणिं च सुरभिं हरिचन्दनं च हन्तादितेयविभवे विभवाय दत्वा ।
आत्माश्रयैकशुचिवाडवजीवनाय पत्नी स्वजीवनमुपैष्यदये जडात्मा ।
अस्ति स्वस्तिकरः कराश्चितगलद्धारालधारामिलत्-
क्षेत्रग्रामललब्ध . . इयादावद् . . . प्रस्तूयमानस्तुतिः(?) ।
श्रीमत्कोसलवंशवारिधिशशी श्रीवेङ्कटक्ष्मापति-
स्तत्सन्तोषकृते कृति(तिं)मविदधे श्रीश्रीनिवासः सुधीः ॥

No. 12133. सुभाषितश्लोकाः.
SUBHĀṢITAŚLŌKĀḤ.

Pages, 46. Lines, 5 on a page.

Begins on fol. 10*a* of the MS. described under No. 12095.

A collection, gleaned from various sources, of stanzas of ethical import and wise maxims.

Foll. 31 to 34 contain an unarranged index of the initial words of the stanzas contained herein.

Beginning:

अनक्षरज्ञेन जनेन भाषणमनादरस्यापि नृपस्य सेवनम् ॥
आलिङ्गनं लम्बपयोधराणां प्रत्यक्षदुःखं त्रयमेव लोके ॥
सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम् ।
असद्भिः शपथैः प्रोक्तं जले लिखितमक्षरम् ॥

End:

कृते तु रेणुका मृत्युस्त्रेतायां जनकात्मजा ।
द्वापरे द्रौपदी मृत्युः कलौ मृत्युर्गृहेगृहे ॥
राक्षसाः कलिमाश्रित्य जायन्ते ब्रह्मयोनिषु ।
ब्राह्मणा नैव जायन्ते तत्रापि श्रोत्रियान्(ः) कृशान्(ः) ॥

No. 12134. सुभाषितश्लोकाः.
SUBHĀṢITAŚLŌKĀḤ.

Substance, paper. Size, 8½ × 7 inches. Pages, 258 (one side). Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

Similar to the above. The stanzas are not properly arranged.

Beginning:

केशव पालय देवसमूहैः पूजितभासुरपादपयोज ।
नीरदकान्तिसमानशरीर माकुचचूचुककाषसुवत्स(क्षः) ॥
येन चक्रीकृते चापे स्वर्गपातालवासिनः ।
चक्रुरन्योन्यसंलापं स पायाद् गिरिकार्मुकः ।
ऐश्वर्यं चावसै(शै)र्नित्यं मनोवागादिभिः सुरैः ।
वन्दनीयं भजे देवं स्वाभीष्टफलसिद्धये ॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥
सुभाषितसुधाज्ञानमज्ञानविषनाशनम् ।
पुराणे भारते काव्ये यत्सारं तत्सुभाषितम् ॥

सुभाषितसुधानन्दलहरी यदि लभ्यते ।
अलङ्कारैः किमाहारैर्विहारैरपि योषिताम् ॥
सुभाषितेन गीतेन युवतीनां च लीलया ।
यस्य न द्रवते चित्तं स वै मूढो यथा पशुः ॥
यन्मुखं वेदविभ्रष्टं ताम्बूलरसवर्जितम् ।
सुभाषितपरिभ्रष्टं तन्मुखं बिलमुच्यते ॥
धर्मारम्भ ऋणच्छेदे कन्यादाने धनागमे ।
शत्रुविद्याग्निकालेषु कालक्षेपं न कारयेत् ॥

End:

जीवग्राहं गृहीत्वा द्रुपदनृपमदाद्दक्षिणं चापवेद-
स्वाध्यायान्ते गुरुभ्यस्त्रिपुरविजयिनं पूजयामास बाणैः ।
सुत्रामारक्षितं तद्वनमखिलमदादाहुतिं खाण्डवं यः
काण्डाग्नौ पाण्डुसूनुः स खलु हरिसखः सङ्गरेष्वेकयोद्धा ॥
अम्भोधिः स्थलतां स्थलं जलधितां धूलीलवः शैलतां
मेरुर्मृत्कणतां तृणं कुलिशतां वज्रं तृणप्रायताम् ।
वह्निः शीतलतां हिमं दहनतामायाति यस्येच्छया
लीलादुर्ललिताद्भुतव्यसनिने देवाय तस्मै नमः ॥

Colophon:

इति सुभाषितश्लोकाः ॥

No. 12135. सुभाषितसुधानन्दलहरी.
SUBHĀṢITASUDHĀNANDALAHARĪ.

Substance, palm-leaf. Size, 9⅛ × 1¼ inches. Pages, 92. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old. Incomplete.

Similar to the above. The stanzas herein are arranged according to their subject-matter.

Beginning:

सुभाषितं सथारत्नमज्ञानविषनाशनम् ।
पुराणे भारते काव्ये यत्सारं तत्सुभाषितम् ॥
सिद्धमन्नं फलं पक्वं नारीप्रथमयौवनम् ।
सुभाषितं च ताम्बूले सुधो गृह्णाति पण्डितः ॥

सुभाषितेन गीतेन युवतीनां च लीलया ।
यस्य न द्रवते चित्तं स वै मूर्खोऽथवा पशुः ॥
सुभाषितपरित्यागि ताम्बूलरसवर्जितम् ।
यन्मुखं वेदविभ्रष्टं तन्मुखं बिलमुच्यते ॥
पृथिव्यां त्रीणि रत्नानि जलमानसुभाषितम् ।
अरत्नो रत्नपाषाणं रत्नशब्दो निरर्थकः ॥

End:

उच्छिष्टोच्छिष्टसंस्पृष्टा (ष्टः) शुना शूद्रेण वा द्विजः ।
उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति ॥
अनुच्छिष्टेष्टसंस्पृष्टं स्नानमेव विधीयते ॥
अथवा जाप्यते येन गायत्र्या चरितत्रयम् ॥
अश्वत्थमेक पि . . . .

No. 12136. सुभाषितसुधानन्दलहरी.

SUBHĀṢITASUDHĀNANDALAHARĪ.

Pages, 13. Lines, 9 on a page.

Begins on fol. 39*a* of the MS. described under No. 12021.
Contains 113 stanzas.
Similar to the above.

Beginning:

सुभाषितसुधानन्दलहरी यदि लभ्यते ।
अलं हारैः किमाहारैः विहारैरपि योषिताम् ॥
सुभाषितेन (. . . . .) मूढोऽथ वा पशुः ॥
सुजनं व्यजनं मन्ये महावंशसमुद्भवम् ।
स्वपरिभ्रमणेनैव तापं हरति देहिनाम् ॥
यद्यप्युपद्रवशतैरुपहन्यमानाः सन्तः सदा व्यपनयन्ति परस्य खेदम् ।
चन्द्रो विधुन्तुदमुखग्रसितैकपार्श्वः पार्श्वान्तरेण जगदार्तिमपाकरोति ॥

End:

बहूनामल्पसाराणां समवायो दुरत्ययः ।
तृणैरावर्त्यते रज्जुस्तया नागोऽपि बध्यते ॥
बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु बलं कुतः ।
पश्य सिंहं मदोन्मत्तं शशकेन निपातितम् ॥

No. 12137. सुभाषितसुधानन्दलहरी.
SUBHĀṢITASUDHĀNANDALAHARĪ.

Pages, 41. Lines, 6 on a page.

Begins on fol. 13*a* of the MS. described under No. 12030.

Contains 92 stanzas.

Similar to the above

Beginning:

सुभाषितसुधानन्द (. . . .) योषिताम् ॥
सुभाषितेन गीतेन (. . . .) मूढोऽथ वा पशुः ॥
दातृत्वं प्रियवक्तृत्वं धीरत्वमुचितज्ञता ।
अभ्यासेन न लभ्यन्ते चत्वारः सहजा गुणाः ॥

End:

यशस्करे क(र्मणि)मित्रसंग्रहे प्रियासु नारीष्वधनेषु बन्धुषु ।
क्रतौ विवाहे व्यसने रि(पुक्ष)ये धनक्षयोऽष्टासु न गण्यते बुधैः ॥
उत्क्रोशमप्रीतिदान . . . .

No. 12138. सुभाषितसुधानिधिः
SUBHĀṢITASUDHĀNIDHIḤ.

Substance, paper. Size, 12 × 9½ inches. Pages, 235. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Copied from a MS. in the Mysore Library on 29-3-1895.

Same work as that described under R. No. 797 of the Triennial Catalogue of MSS., Vol. I, Part I-C. By Sāyaṇācārya, who is here said to be the son of Māyaṇa and the brother of Mādhava. The work is said to have been composed at the instance of Kampabhūpati.

Contains the following Paddhatis, the arrangement of which is different from that given in R. No. 797 :—

१. उपोद्घातपद्धतिः.
२. प्ररोचनापद्धतिः.
३. नमस्कारपद्धतिः.
४. मङ्गलश्लोकपद्धतिः.
५. राजचाटुपद्धतिः.
६. पुरोहितपद्धतिः.
७. दुष्पुरोहितपद्धतिः.
८. द्वास्थपद्धतिः.
९. वैद्यपद्धतिः.
१०. असद्वैद्यपद्धतिः.
११. कविप्रशंसापद्धतिः.
१२. कुकविपद्धतिः.

१३. काव्यप्रशंसापद्धतिः.
१४. अन्तरङ्गनिन्दापद्धतिः.
१५. पुत्रपद्धतिः
१६. असत्पुत्रपद्धतिः.
१७. सद्भ्रातृपद्धतिः.
१८. असद्भ्रातृपद्धतिः.
१९. भृत्यपद्धतिः.
२०. असद्भृत्यपद्धतिः.
२१. विश्वासपद्धतिः.
२२. अविश्वासपद्धतिः.
२३. सुदपद्धतिः.
२४. मन्त्रिपद्धतिः.
२५. दुष्टमन्त्रिपद्धतिः.
२६. बुद्धिप्रशंसापद्धतिः.
२७. दूतपद्धतिः.
२८. चारपद्धतिः.
२९. वैरपद्धतिः.
३०. विग्रहपद्धतिः.
३१. यानपद्धतिः.
३२. दुर्निमित्तपद्धतिः.
३३. आसनपद्धतिः.
३४. अभियुक्तपद्धतिः.
३५. द्वैधीभावपद्धतिः.
३६. समाश्रयपद्धतिः.
३७. राजलेखकपद्धतिः.
३८. कायस्थनिन्दापद्धतिः.
३९. [illegible]कनिन्दापद्धतिः.
४०. [illegible]कनिन्दापद्धतिः.
४१. [illegible]पद्धतिः.
४२. अधिकारपद्धतिः.
४३. दुष्टाधिकारपद्धतिः.
४४. मित्रपद्धतिः.
४५. अमित्रपद्धतिः.
४६. कोशपद्धतिः.
४७. कोशहानिपद्धतिः.
४८. अर्थप्रशंसापद्धतिः.
४९ अर्थनिन्दापद्धतिः.
५०. राष्ट्रप्रशंसापद्धतिः.
५१ दुर्गपद्धतिः.
५२. सेनापतिपद्धतिः.
५३. दुष्टसेनापतिपद्धतिः.
५४. रथपद्धतिः.
५५. सारथिपद्धतिः.
५६. गजपद्धतिः.
५७. अश्वपद्धतिः.
५८. पदातिपद्धतिः.
५९. वीरपद्धतिः.
६०. वीरपद्धतिः.
६१. रणपद्धतिः.
६२. कूटयुद्धपद्धतिः.
६३. धीरपद्धतिः.
६४. भीरुपद्धतिः.
६५. मानिपद्धतिः.
६६. मानहीनपद्धतिः.
६७. वीरपत्नीप्रलापपद्धतिः.
६८. अभयप्रदानपद्धतिः.
६९. [illegible]पद्धतिः.
७०. [illegible]

७१. कृतज्ञपद्धतिः.
७२. उदारपद्धतिः.
७३. कृपणपद्धतिः.
७४. लक्ष्मीप्रशंसापद्धतिः.
७५. लक्ष्मीनिन्दापद्धतिः.
७६. राजसेवापद्धतिः.
७७. राजसेवानिन्दापद्धतिः.
७८. दरिद्रनिन्दापद्धतिः.
७९. आशापद्धतिः.
८०. तृष्णायाचनापद्धतिः.
८१. संसर्गगुणपद्धतिः.
८२. संसर्गदोषपद्धतिः.
८३. सामान्यपद्धतिः.
८४. अन्यापदेशपद्धतिः.

Beginning :

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदं तं भक्तानामेकदन्तमुपास्महे ॥
ऐश्वर्यमव्याहतमावहन्तु हेरम्बपादाम्बुजपांसवो नः ।
ये निर्वहन्ति श्रुतिनिर्वहन्तीसीमन्तसिन्दूरपरागलक्ष्माम् ॥

उपोद्घातपद्धतिः—

दन्ताग्रं दारयेद्विघ्नानेकदन्तस्य नः प्रभोः ।
लीलया यस्य संसूतो वलयं कनकाचलः ॥
वीरः श्रीकम्पराजोऽस्ति विदुषां सत्वरनिधिः ।
यत्कीर्तिकामिनीहस्ते ब्रह्माण्डं कन्दुकायते ॥
स्वमुद्रामुद्रितान् कृत्वा प्रायः प्रत्यर्थिपार्थिवान् ।
समुद्राधिपतिर्योऽभून्नाम्बुधीशतया परम् ॥
यस्यातपत्रं विमलं श्यामाकारमलक्षितम् ।
तदन्तर्वर्तिवसुधाच्छायाच्छन्नमिवादरात् ॥
यत्कामकणमध्ये तु बद्धां त्यागाय सद्गुणैः ।
कामधेनुं समालोक्य वृषः सत्त्व उपाजनि ॥
यस्य कीर्तिपयोराशौ मग्नं भूमण्डलं महत् ।
तदन्तर्वारि लीनस्य कूर्मस्य श्रियमावहत् ॥
मतिमांस्तस्य राज्ञोऽभून्मन्त्री मायणसायणः ।
यन्मन्त्रेण न सर्पन्ति नित्यं [illegible] ॥

यस्य दानाम्भसां पूरैः पङ्किले प्राङ्गणे मुहुः ।
भग्नं पादमिवोद्धर्तुं न शक्नोति वृषः कचित् ॥
दानासिंहासनारूढे यस्मिन् लक्ष्म्या सह स्थिरम् ।
तद्भारती च विदुषां जिह्वासिंहासने स्थिता ॥
यं दृष्ट्वा यद्गुणान् वक्तुं श्रोतुं च सततं मुदा ।
शेष(ए)वोचितः सोऽपि भुजङ्गत्वान्न गण्यते ॥
भारद्वाजान्वयभुवा तेन सायणमन्त्रिणा ।
व्यरच्यत विशिष्टार्थः सुभाषितसुधानिधिः ॥
धर्मार्थकाममोक्षाङ्कं यत्र पर्वचतुष्टयम् ।
भवत्वपूर्वसन्दर्भं (सतां) कर्णरसायनम् ॥
स कदाचित्समाजेऽथ कम्पभूपं कलानिधिः ।
अश्रावयदनूनश्रीर्निःश्रेसकरं परम् ॥
दमः शीलं गृहस्थस्य पतिः साध्वी सुशी(लता) ।
अज्ञः सुजनदुर्जन्तुकलिडाम्भिककर्म च ॥
विदुर्दुर्बुद्धिमृत्यू च धर्मसङ्कर एव च ।

End:

कावि समा देव्वगई कलयट्टजणो गुणग्गाभी ।
